नं० ४८५४

नाम- दक्षिणामूर्त्तिसंहिता

कर्त्ता - ×

पत्र सं० - ६५ पत्राणि सं० १७२८

विषय- तन्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

तंत्रविचार

५४६५/१५ ६ मू०

पुस्तकमिदं पाठकोपनामकवैद्यनाथशर्मणः
पत्राणि ५

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

द·सं·
१

॥श्रीगणेशायनमः श्रीमच्छ्रीकोशहृदयंपंचसिंहासनात्मकं फलंकल्पलतानांचवाग्रूरत्न
स्फुरत्कलं १ चतुरायतनानंदिचतुरध्वयकोशगं नित्यानंदिपरंब्रह्मधामनौमिसुखाप्तये २ श्रीदेव्युवाच
कृपांकुरुमहादेवकथयानंदसुंदर किंतद्ब्रह्ममयंधामश्रोतुमिच्छामितत्वतः ३ कथंश्रीसहितंदेवश्रीको
शहृदयंकथं पंचसिंहासनैःसेव्यंकथंकल्पलतात्मकं ४ कथंरत्नात्मकंदेवकथमातृनात्मकम्
कथयामाम्नायसंसेव्यंकथंनित्यात्मकंप्रभो ५ ईश्वरउवाच एतत्सर्वात्मकंवक्ष्येत्रिपुरापरमेश्वरी
चतुर्लक्ष्मीसेव्यमानातदाकामदुघावरा ६ श्रीविद्याचतथालक्ष्मीर्महालक्ष्मीस्तथैवच त्रिशक्तिःस
र्वसाम्राज्यलक्ष्मीःपंचचक्रीर्तिताः ७ वाग्रूपांतंवह्निसंस्थंदीर्घनेत्रसमावितं बिंदुनादात्मकंबीजंलक्ष्मी

राम
१

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्र उदाहृतः ॥ ८ ॥ ऋषिर्भृगुर्निचृच्छंदस्तथा श्रीर्देवता प्रिये ॥ शान्तये वीजशक्ती च कीलकं रेफ उच्यते ॥ ९ ॥ द्वितीये
नवत्रेर्थेन षाष्ठेनार्केण सुंदरि ॥ इंद्रेण चंद्रकलया विद्यां संसेव्य सुंदरि ॥ १० ॥ षडंगानि न्यसेन्मंत्री हृच्छिरश्च शिखां
ततः ॥ कवचं नेत्रमस्त्रं च नमः स्वाहा क्रमेण व ॥ ११ ॥ वषट् हुं वौषट् अस्त्रं च फडेभिः सह विन्यसेत् ॥ अष्टपत्रं लिखेद्यंत्रं वहि
र्विंवमालिखेत् ॥ १२ ॥ मध्ये पुष्पं विनिक्षिप्य पीठशक्तीः समर्चयेत् ॥ विभूतिः सन्नतिः कांतिः सृष्टिः कीर्त्तिश्च सं
नतिः ॥ १३ ॥ व्युष्टिः सत्कृष्टिः ऋद्धिश्च वसुदिक्षु प्रपूजयेत् ॥ मध्ये सिंहासनं पूज्यं सर्वशक्तिमयं प्रिये ॥ १४ ॥ ध्यायेत्त
तः श्रियं रम्यां सर्वदेवनमस्कृताम् ॥ तप्तकार्त्तस्वराभासां दिव्यरत्नविभूषिताम् ॥ १५ ॥ आसिंच्यमानाममृतैर्मुक्ता
रत्नद्वैरपि ॥ शुभ्राभ्राभेभयुग्मेन सुऊर्ध्वऊरपि प्रिये ॥ १६ ॥ रत्नौघबद्धमुकुटां शुद्धक्षौमांगरागिणीं ॥ पद्माक्षीं प

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ध्यानामेन हृदि चिंत्यां स्मरेद्बुधः ॥१७॥ एवं ध्यात्वा त्यजेद्देवीं पद्मयुग्मधरां सदा ॥ वरदाभयशोभाढ्यां चतुर्वक्त्रां त्रिलो
२ चनाम् ॥१८॥ आवाहनादिमुद्राश्च क्रमेणैव प्रदर्शयेत् ॥ उत्तानांजलिमध्यः कुर्यादियमावाहनी भवेत् ॥१९॥ इयं तु वि
परीता स्यात्तदा वै स्थापनी भवेत् ॥ ऊर्ध्वांगुष्ठमुष्टियुतं तदेयं संनिधापनी ॥२०॥ अंतरंगुष्ठमुष्टिभ्यां तदेयं संनिरो
धिनी ॥ तर्जनीभ्यां परिभ्राम्य सकलीकरणं भवेत् ॥२१॥ अंजलिं वार्घ्यवत्कृत्वा परमीकरणं भवेत् ॥ परिवर्त्य क
रौ मंक्षीत तर्जन्यौ चक्रनिष्ठिके ॥२२॥ मध्यमानामयुगले स्थापयेत्तु परस्परम् ॥ अमृतीकरणं देवि मुद्रेयं धेनुरू
पिणी ॥२३॥ एताः समानमुद्राश्च दर्शयित्वा यजेत् श्रियै ॥ गंधपुष्पादिभिः सम्यक् सर्वकामार्थसिद्धये ॥२४॥ राम॰
अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनम् ॥ बलाका विमलं चैव कमला वनमालिका ॥२५॥ विभीषिका मालिका च २

© Dharmartha Trust J&K. Digitized by eGangotri

शांकरीवस्त्रमालिका ॥ उरश्चादिक्रमेणैव पश्चाद्दक्षिणेण्ये न्यसेज्जयेत् ॥ १६ ॥ इंद्राग्निर्यमनैर्ऋत्यवरुणानिलसंज्ञका
न् ॥ कुबेरेशानलोकेशान् भूमिं विक्रमाद्यजेत् ॥ १७ ॥ ब्रह्मा विष्णुश्च लोकेशा ह्यूर्ध्वं दिक्क्रमतो यजेत् ॥ अर्कल
क्षं जपेन्मंत्रं तद्दशांशेन होममथ चरेत् ॥ १८ ॥ पद्मैस्त्रिमधुमिश्रैश्च क्ष्मतरश्चारीततो भवेत् ॥ एवं संसिद्धमंत्रस्य सर्वसाम्रा
ज्यदो भवेत् ॥ १९ ॥ ॥ इति श्रीदक्षिणामूर्तिसंहितायां एकाक्षरलक्ष्मीपूजाविधिर्नाम प्रथमः पटलः ॥ ईश्वर उवा
च ॥ अथ वक्ष्ये महादेवि लक्ष्मीहृदयमुत्तमम् ॥ यस्य स्मरणमात्रेण पलायंते महापदः ॥ १ ॥ प्रणवं पूर्वमुच्चार्य स्वरे ह२
मात्मकमुच्चरेत् ॥ श्रीपुटं वाथ कमले कमलालये प्रसीद च ॥ २ ॥ लवमध्यगतां भूमिं स्वस्थाने तु प्रयोजयेत् ॥ प्रसी
दपूर्वबीजानि संपुटत्वेन योजयेत् ॥ ३ ॥ महालक्ष्म्यै हृदंतो एउरष्टाविंशतिवर्णवान् ॥ दक्षः प्रजापतिः पश्चाद्दृषिश्छं

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ३ 3 दृष्टैवच ॥ ४ ॥ गायत्रंदेवतालक्ष्म हृदयंपरिकीर्त्तितं ॥ द्वितीयंचतृतीयंचबीजशक्तीक्रमेणच ॥ ५ ॥ अणवंकीलकंदे
वितंतोगानिन्यसेत् ॥ कमले हृदयंज्ञेयंशिरःस्यात्कमलालये ॥ ६ ॥ शिखाप्रसीदतेनेवकवचंचततुरक्षरं ॥ नेत्र
त्रयंततोश्रंचत्रिबीजप्रदितंपृथक् ॥ ७ ॥ अंगानिपूर्ववद्देविन्यसेन्मंत्रीसमाहितः ॥ रत्नौघहस्तपद्मंचपद्मस्थंगमंचहेम
कम् ॥ ८ ॥ अग्ररत्नावलीराजन्नादर्शंदधतींपरां ॥ चतुर्भुजांस्फुरद्रत्ननूपुरांमुकुटोज्ज्वलां ॥ ९ ॥ ग्रैवेयांगदहार्यां
कंकणांरत्नकुंडलां ॥ पद्मासनसमासीनांइतीभिर्मंडितांसदा ॥ १० ॥ शुक्लांगरागवसनांमहादिव्यगणीनतां ॥
एवंध्यात्वार्चयेद्देविशर्वयंत्रेचपूर्ववत् ॥ ११ ॥ आदावंगानिसंपूज्यपूर्ववत्परमेश्वरी ॥ भारतीपार्वतीचांद्रीशचीदिक्षु राम॰
प्रपूजयेत् ॥ १२ ॥ श्रीधरश्चहृषीकेशोवैकुंठोविश्वरूपधृक् ॥ विदिक्षुपूजयेदेतान्सर्वसिद्ध्यर्थहेतवे ॥ १३ ॥ अनुरागो ३

© Dharmartha Trust J&K. Digitized by eGangotri

विसंवादो विजयो वल्लभो मदः ॥ हर्षो विलस्वते जस्वी उरआरभ्य प्रजपेत ॥ १४ ॥ इंद्रादयश्च संपूज्याः पुनर्देवीं यजेत
सुधीः ॥ लक्षत्रयं जपेन्मंत्रं नियमेन तु साधकः ॥ १५ ॥ तद्दशांशेन पद्मैः स्फुऊनेत्संपत्तिमिछता ॥ महागजतुरंगाश्च
जायंते तस्य मंदिरे ॥ १६ ॥ सुवर्णरत्नभूषादिमंडितः साधको भवेत ॥ १ ॥ इति श्रीदक्षिणामूर्त्तिसंहितायां महा
लक्ष्मीपूजाविधिर्नाम द्वितीयः पटलः ॥ ईश्वर उवाच ॥ त्रिशक्तियजनं वक्ष्ये सर्वसिद्धिप्रदं नृणां ॥ श्रीवीजं च परा
वीजं कामवीजं समालिखेत ॥ १ ॥ इयं त्रिशक्तिर्देवेशि त्रिषु लोकेषु दुर्लभा ॥ ऋषिर्ब्रह्मास्य गायत्रं छंदो पिक
थितं प्रिये ॥ २ ॥ त्रिशक्तिर्देवता ङ्गानि द्विरावृत्या यजेत प्रिये ॥ अथ यंत्रं प्रवक्ष्यामि साधकानां हिताय च ॥ ३ ॥ षट्
कोणं पूर्वमालिख्य मध्ये विद्यां लिखेत सुधीः ॥ वीप्सायां तां तु षट्कोणकोणेषु क्रमतो यजेत ॥ ४ ॥ वाह्ये वसुद

© Dharmartha Trust J&K. Digitized by eGangotri

लंकार्यद्दीर्घस्वरविभूषितं॥ चतुरस्रंचतुर्द्वारभूषितंमंडलंलिखेत॥५॥ मध्येवाह्यसमादेवींध्यायेत्सर्वसमृद्धिदा
म्॥ नवहेमस्फुरद्भूमौरत्नकुट्टिममंडपे॥६॥ महाकल्पवनांतर्गरत्नसिंहासनेवरे॥ कमलासनशोभाढ्यांरत्नमं
जीरमंडिताम्॥७॥ स्फुरद्रत्नलसन्मौलिरत्नकुंडलमंडितां॥ अनंतरत्नघटितनानाभूषणभूषितां॥८॥ वाणां
कुशाब्जयुगलपाशचापानिविभ्रतिं॥ षड्भुजाभिंदुवदनांइतीभिःपरिवारिताम्॥ वामचामरहस्ताभिरत्ना
दर्शस्तुपाणिभिः॥९॥ तांबूलस्वर्णपात्राभिभूषापेटीस्तुपाणिभिः॥ तत्रकार्न्तस्वराभासांपूर्वोक्तेमंडलेयजेत॥१०
उपचारैःसमाराध्यततोंगावरणंयजेत॥ पूर्ववत्परमेशानिपरिवारानथोयजेत॥११॥ लक्ष्मीहरिंस्वगिरिजांशि
वंरतंगजौक्रमात॥ अग्रकोणादिसंपूज्यततःषट्कोणपार्श्वयोः॥१२॥ शंखपद्मनिधीपूज्यौवसुपत्रेषुमातरः॥ ब्रा

© Dharmartha Trust J&K. Digitized by eGangotri

ह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥१३॥ वाराहीचैवमाहेंद्रीचामुंडासप्तमीभवेत् ॥ महालक्ष्मीर्महादेवीपुर
श्चादिषुप्रजपेत् ॥१४॥ इंद्रादयश्चसंपूज्याः कामिनीरूपधारिणः ॥ उत्तुंगयौवनोन्मत्त देव्याराध नतत्पराः ॥१५
लक्षत्रयंजपेन्मंत्री नियमेनजितेंद्रियः ॥ तद्दशांशेनदेवेशि किंशुकैर्होमयेत्सुधीः ॥१६॥ अनेनविधिनामंत्रीपु
रश्चारीभवेत्प्रिये ॥ इतिश्रीदक्षिणामूर्तिसंहितायांत्रिशक्तिमहालक्ष्मीपूजाविधिर्नामतृतीयःपटलः ॥ ॥ ईश्व
रउवाच ॥ अथवक्ष्येमहादेविसर्वसाम्राज्यदेवतां ॥ यस्याआराधनाद्भिक्षुर्भूलक्ष्मीपतिःस्वयं ॥१॥ चंद्रेशमा
दनक्षेशवह्निदीर्घाक्षिमंडितं ॥ बिंदुझारेश्वरीयुक्तंविद्येयंवैष्णवीप्रिये ॥२॥ श्रीबीजसंपुटांकुर्यात्सर्वसाम्रा
ज्यदायिनी ॥ ऋषिर्हरिस्तथाछंदोगायत्रंवास्यसन्मनाः ॥३॥ देवतामोहिनीलक्ष्मीर्महासाम्राज्यदायिनी ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
५
5

वीजंकूटंसमाख्यातंशक्तिःश्रीवीजमुच्यते ॥ ४ ॥ षड्भिर्दीर्घैःस्वरैर्मीत्वाषडंगानिशविन्यसेत् ॥ अतसीपुष्पसं
काशांरत्नभूषणभूषिताम् ॥ ५ ॥ शंखचक्रगदापद्मशार्ङ्गवाणधरांकरैः ॥ षड्भिःकराभ्यांदेवेशिवरदाभयशो
भितां ॥ ६ ॥ एवमष्टभुजांध्यात्वारविलक्षंजपेद्बुधः ॥ तद्दशांशेनपद्मैश्चजुहुनेत्साज्यसिद्धये ॥ ७ ॥ जितेन्द्रि
यःसम्यग्विधिवद्यज्ञोह्यारभ्यफणिश्रिये ॥ त्रिकोणंवाष्टपत्रंचभूविंबंचततोलिखेत् ॥ ८ ॥ चतुर्द्वारस्तुशोभाढ्यंयंत्र
मेतत्समालिखेत् ॥ अस्मिन्समावाह्यदेवींपूजयेदुपचारकैः ॥ ९ ॥ पूर्ववत्परमेशानिषडंगावरणंयजेत् ॥ गाय
त्रींचैवसावित्रीसरस्वतीत्रयभागतः ॥ १० ॥ क्रमेणपूजयेन्मंत्रीब्राह्म्याद्याःस्वस्वरैःपृथक् ॥ अष्टपत्रेषुभूविंब राम॰
त्वेकोच्चारेणपूजयेत् ॥ ११ ॥ अष्टादशमहाकोटियोगिनीभ्योनमोलिखेत् ॥ अनेनमन्त्रनापश्चादिंद्रादीन्पूज ५

पेन्नतः ॥ १२ ॥ पुनर्देवीसमभ्यर्च्यगंधपुष्पाक्षतादिभिः ॥ वटुकक्षेत्रपालेभ्योयोगिनीभ्योवलिंहरेत् ॥ १३ ॥ इतिश्री
दक्षिणामूर्त्तिसंहितायांसाम्राज्यदायजनंनामचतुर्थःपटलः ॥ ईश्वरउवाच ॥ अथश्रीकोशविद्यानांचतुष्कं
शृणुपार्वति ॥ यस्यविज्ञानमात्रेणपुनर्जन्मनविद्यते ॥ १ ॥ श्रीविद्याचपरंज्योतिःपरंनिष्कलदेवता ॥ अजपामातृ
काचैवपंचकोशाःप्रकीर्त्तिताः ॥ २ ॥ प्रणवंपूर्वमुच्चार्यमायांहंसःपदंलिखेत् ॥ ततःसोहंशिरोदेविवस्तुवर्णयमी
रिता ॥ ३ ॥ प्रणवाच्चित्कलाज्ञेयामाययाव्याप्तिरूपिणी ॥ हंसःपदेनदेवेशिसाक्षादात्मस्वरूपिणी ॥ ४ ॥ तत्रस
विंदुश्चितयासृष्टिस्थितिलयात्मिका ॥ प्रसूतेविंदुनाद्येनवामेयंब्रह्मरूपिणी ॥ ५ ॥ विंदुनाथद्वितीयेनपा
लयंतीजगतत्रयम् ॥ ज्येष्ठेयंवैष्णवीमायाचाद्यामसत्वगुणाप्रिये ॥ ६ ॥ अंसेनविंदुनासर्वंग्रसंतीतमसाहृता ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं. ६ रोद्गीर्विंदुत्रयंदेवित्रस्तेषांविकातदा ॥७॥ आत्मानंदर्शयत्येषाहंसाख्यासंहतिर्यदा ॥ तदेयंदर्प्पणाकाःरान्ततोज्यो
तिर्मयोभवेत् ॥८॥ वर्णाभ्यांवह्निजायायाःपरंज्योतिरियंप्रिये ॥ एवंविचारयन्मंत्रीसाक्षाद्ब्रह्मभवेन्नरः ॥९॥ ऋ
6 षिर्ब्रह्मास्यमंत्रस्यगायत्रंछंद उच्यते ॥ परंज्योतिर्मयीसाक्षाद्देवतापरिकीर्त्तिता ॥१०॥ प्रणवांत्यद्वयंबीजशक्तीशेष
तुकीलकं ॥ स्वाहांतु हृदयंसोहंशिरोहंसःशिखाभवेत् ॥११॥ माययाकवचंतारबीजेननयनत्रयम् ॥ स्वच्छामंत्रेण
देवेशिसमग्रेणास्त्रकंभवेत् ॥१२॥ ज्ञानाग्नौ मातृकावर्णैर्हविषाचाक्षराहुतिम् ॥ अनेनमंत्रेनाहुत्वाक्षणंनिर्वा
णगोभवेत् ॥१३॥ इतिश्रीदक्षिणामूर्त्तिसंहितायांमात्माष्टाक्षरपरंज्योतिर्विधानंनामपंचमःपटलः ॥ ईश्वर राम. ६
उवाच ॥ अथवक्ष्येमहादेविपरनिष्कलदेवतां ॥ यस्याःस्मरणमात्रेणचिदानंदायतेनरः ॥१॥ अनुग्रहादिदेवेशिविन्दु

© Dharmartha Trust J&K. Digitized by eGangotri

नादकलात्मकः ॥ परनिष्कलदेवीपरब्रह्मस्वरूपिणी ॥ १ ॥ शुक्लांबरपरीधाना शुक्लमाल्यानुलेपना ॥ ज्ञानमु-
द्रांकिता योगिपतिवृंदेन सेविता ॥ २ ॥ ऋषिर्ब्रह्मास्य गायत्रं मनोस्य छंदः क्रमाद्भवेत् ॥ ब्रह्मैव देवता बीजशक्ती
अ उं क्रमेण तु ॥ ४ ॥ मकारः कीलकं मोक्षफलज्ञानप्रदायिनी ॥ स्वरहं हस्यमध्ये तु द्विह्रात्स्कावतु ष्ठयं
५ ॥ अं आं ल्हलृवृंदेवे शिषडंगानि प्रविन्यसेत् ॥ ततो यंत्रं लिखेन्मंत्री त्रिकोणं चाष्टपत्रकम् ॥ ६ ॥ चतुरस्रं च तु
हरिमंडितं ज्ञानदं भवेत् ॥ ब्रह्मरंध्रे विचिंत्याथ तत्रावाह्य परेश्वरीम् ॥ ७ ॥ गंधपुष्पादिभिः सम्यक्समनोज्ञैरु-
पचारकैः ॥ अग्नीशासुरवायव्यमध्यदिक्षु गणार्चनम् ॥ ८ ॥ अकारेण च ऋग्रूपं ब्रह्माणं पुरतो यजेत् ॥ सामवे-
दसहितमुकारेण हरिं यजेत् ॥ ९ ॥ देवीदक्षिणतः पश्चाद्दंत्यकोणे शिवं यजेत् ॥ यजुःस्वरूपं कालेन त्रिको-

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
७

णेकथितंप्रिये ॥१०॥ अष्टपत्रेचतुर्दिक्षु उराद्यादिक्रमेणतु ॥ आत्मांतरात्मपरमज्ञानात्मानोयजेत्प्रिये ॥११
निवृत्तिश्चप्रतिष्ठाचविद्याशांतिश्चतुष्टयं ॥ विदिक्षुपूजयेन्मंत्रीततोब्राह्म्यादिकायजेत् ॥१२॥ तेष्वेवचवसुपत्रेषु
चतुरस्रेततःपरम् ॥ इंद्रादिलोकपालांश्चपूर्वादिक्रमतोयजेत् ॥१३॥ गंधपुष्पादिनैवेद्यंतर्प्पणैःक्रमतोयजे
त् ॥ ज्ञानरूपोभवेन्मंत्रीमोक्षस्तस्यकरेस्थितः ॥१४॥ इतिश्रीदक्षिणामूर्त्तिसंहितायांप्रणवविद्यापरनि
ष्कलदेवतायजनंनामषष्ठःपटलः ॥ ईश्वरउवाच ॥ अजपाराधनंदेविकथयामितवानघे ॥ यस्याविज्ञानमा
त्रेणपरंब्रह्मैवदेशिकः ॥१॥ हंसःपदंपरेशानिप्रत्यहंजपतेनरः ॥ मोहबद्धोनजानातिमोक्षस्तस्यनविद्यते
॥२॥ श्रीगुरोःकृपयादेविज्ञायतेजप्यतेतदा ॥ उच्छ्वासनिश्वासतयातदाबंधक्षयोभवेत् ॥३॥ उच्छ्वासेचैवनिश

राम॰
७

© Dharmartha Trust J&K. Digitized by eGangotri

वासेहंसमुत्पद्यतेरहर्द्वयं ॥ तस्मात्प्राणश्च हंसाख्य आत्माकारेण संस्थितः ॥ ४ ॥ षष्टिश्वासैर्भवेत्प्राणः षट्प्रा
णनाडिकामता ॥ षष्टिनाड्याऽहोरात्रं जपसंख्याजपामनोः ॥ एकविंशतिसाहस्रं षट्शताधिकमीश्वरि ॥ ज
पतेप्रत्यहं प्राणी सांद्रानंदमयीं पराम् ॥ ५ ॥ उत्पत्तिर्जपआरंभो मृतिस्तस्यानिवेदनं ॥ विनाजपेनदेवेशि जपोभव
तिमंत्रिणः ॥ ६ ॥ अजपेयं ततः प्रोक्ता भवपाशनिकृंतनी ॥ श्रीगुरोः कृपया देवि लभ्यते नान्यथा प्रिये ॥ एवं ज
पं महेशानि प्रत्यहं विनिवेदयेत् ॥ गणेशब्रह्मविष्णुभ्यो हराय च परेश्वरि ॥ ८ ॥ जीवात्मने क्रमेणैव तथैव पर
मात्मने ॥ षट्शतानि सहस्राणि षट् देव तथा पुनः ॥ ९ ॥ षट्सहस्राणि विमले सहस्रं चैतदेव हि ॥ पुनः सह
स्रं गुरवे क्रमेणैव निवेदयेत् ॥ १० ॥ आधारस्वर्णवर्णैर्भिन्नवादिसांतानि संस्मरेत् ॥ दंतसोवर्णानि वर्णानि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
८
४

रमेश्वरि ॥ ११ ॥ स्वाधिष्ठानेविद्रुमाभेवादिलांतानिसंस्मरेत ॥ विद्युत्पुंजप्रभाभानिस्तुनीलमणिप्रके ॥ १२ ॥ डफांतानि
महानीलप्रभाणिवविचिंतयेत ॥ पिंगवर्णेमहावह्निकणिकाभानिविंतयेत ॥ १३ ॥ कादिठांतानिवर्णानिचतुर्थेनाहतेप्रि
ये ॥ विशुद्धेधूम्रवर्णेतुरक्तवर्णान्स्वरान्स्मरेत ॥ १४ ॥ आज्ञायांविद्युदाभायांशुभ्रौहक्षौविचिंतयेत ॥ कर्णरघ्रतिसंदा
जत्सहस्रदलनीरजे ॥ १५ ॥ नादात्मकंब्रह्मरंध्रेजानीहिपरमेश्वरि ॥ एतेषुसप्तचक्रेषुस्थितेभ्यःपरमेश्वरि ॥ १६ ॥ जपंप्रति
वेदयित्वातेस्होरात्रभवंशिये ॥ सहजंपरमेशानिन्यासंकुरुविचक्षणे ॥ १७ ॥ अर्षिर्हंसोव्यक्तःस्वर्गगायत्रंछंदउच्यते
देवतापरमादिस्क्ताहंसोहंवीजमुच्यते ॥ १८ ॥ सःशक्तिकीलकंसोहंप्रणवस्त्वमेवहि ॥ नादस्थानंतथाश्वेतोवर्ण
स्तपरमेश्वरि ॥ १९ ॥ उदात्तस्वरश्चैवंमनोरस्यप्रकीर्त्तितः ॥ मोक्षार्थेविनियोगःस्यादेवंजानीहिपार्वति ॥ २० ॥ ततःषडं

रम॰
८

© Dharmartha Trust J&K. Digitized by eGangotri

गविन्यासं कुर्याद्दिहस्मस्तु हृद्ये ॥ स्तर्य्यमोमंतथादेवि निरंजनमतःपरम् ॥ २१ ॥ निराभासं चतुर्थ्यंत स्वाहांतान्क्रमतो न्य
सेत् ॥ कवचांतान् विन्यस्य ततोतत्तुपदं स्मरेत् ॥ २२ ॥ तत्तुस्स्क्ष्मचतुर्वर्णा उक्का देवि प्रशोदयात् ॥ स्वाहांते नैव नय
नमथ्यक्तापदपूर्वकः ॥ २३ ॥ प्रवोधात्माचतुर्थ्यमि ज्ञायते संत्रनिगद्यते ॥ प्राणानायम्य विधिवन्मंत्री सम्यक् समाहि
तः ॥ २४ ॥ मूलमंत्रेण देवेशि वामेनापूर्य्य चोदरं ॥ कुंभके न तु विरा हृत्वा दक्षिणेन च रेचयेत् ॥ २५ ॥ कनिष्ठानामिकांगु
ष्ठैर्यत्रा साउदधारणम् ॥ प्राणायामः स विज्ञेयः स्तर्जनीमध्यमे विना ॥ २६ ॥ अस्य हंसस्य देवेशि निगमागमपक्षको
अग्नीषोमावथो वापि पक्षौ तारः शिरो भवेत् ॥ २७ ॥ विंदुत्रयं शिखा नेत्रे मुखे नादः प्रतिष्ठितः ॥ शिवशक्ती पदद्वंद्वं कौ
लाग्नी पार्श्वयुग्मकं ॥ २८ ॥ अयं परमहंसस्तु सर्वव्यापी प्रकाशवान् ॥ स्तर्य्यकोटिप्रतीकाशः स्वप्रकाशेन भासते ॥ २९

© Dharmartha Trust J&K. Digitized by eGangotri

द·सं·
९

संहाररूपीहंसोयंविवेकंदर्शयत्यपि॥अजपानामगायत्रीत्रिषुलोकेषुदुर्लभा॥३०॥अजपांजपतोनित्यंपुनर्जन्म
नविद्यते॥षट्शतान्यधिकान्यत्रसहस्राण्येकविंशतिः॥३१॥अहोरात्रंचरेद्धाउःसजपोमोक्षदायकः॥इतिश्रीदक्षि
णामूर्त्तिसंहितायांअजपाविधानंनामसप्तमःपटलः॥ईश्वरउवाच॥अथवक्ष्येमहेशानिमातृकांलोकमातरं
अकारादिक्षकारांतवर्णावयवदेवतां॥१॥ऋषिर्ब्रह्मास्यमंत्रस्यगायत्रंछंदउच्यते॥मातृकादेवतादेविहलोबीजा
निशक्तयः॥२॥स्वरास्तुपरमेशानिजातथान्तिस्तुकीलकं॥अनिर्वाच्याहलोवर्णाःशक्त्याव्यक्ताभवंतिहि॥३॥
शक्त्याविनाशिवेसूक्ष्मेनामधामनविद्यते॥असङ्गपाहलोवर्णाशक्त्यासन्नाःपराङ्मुखाः॥४॥स्फुरन्मात्रास्तदे
वार्यास्यमुखाव्यक्तवर्णकाः॥अर्कान्तत्त्वपरित्यज्यषण्मुखस्वरमध्यगाः॥५॥वर्गाःषट्क्रमेणैवसप्तमःक्षोधसं

राम॰
९

युतः॥ अंते निक्षिप्य देवेशि षडंगानि प्रविन्यसेत्॥ ६॥ कलापत्रां बुजे कंठे स्वरान्सम्यक् प्रविन्यसेत्॥ स्वर्यपत्रां बुजे नित्ये
नाहते द्वादशं न्यसेत् ॥ ७॥ मणिपूरे महादेवि दशपत्रे प्रविन्यसेत्॥ दशवर्णान् लिंगमध्ये षड्दले षड्यथेश्वरि॥ ८॥ चतुर्दले त
थाधारे चतुर्वर्णास्ततो न्यसेत्॥ भ्रूमध्ये द्विदले हक्षौ विन्यसेत्तर्जमात्रकां न्यसेत्॥ ९॥ ब्रह्मरंध्रे तथा वक्त्रे वेष्टनेन नयन द्वये॥ श्रु
ति नासापुट द्वंद्वे गंडोष्ठ द्वयके पुनः॥ १०॥ दंतयुग्मे च मूर्द्धास्य द्वये षोडश विन्यसेत्॥ दोःपत्संधिषु सायेषु पार्श्वयुग्मे न्य
सेत् क्रमात्॥ ११॥ पृष्ठनाभिद्वये चैव जठरे विन्यसेदथ॥ त्वगसृग्मांसमेदोस्थिमज्जाशुक्राणि धातवः॥ १२॥ प्राणजीवौ
च परमो यकारादिषु संस्थिताः॥ क्रमेण देवदेवेशि न्यस्तव्या एतदात्मकाः॥ १३॥ हृद्दोर्मूले षु संन्यस्य तथा परगले न्यसेत्
कक्षाद्वये हृदारभ्य पाणिपाद द्वये तथा॥ १४॥ जठरानन योर्व्याप्तिं न्यसेदित्येक रूपिणीं॥ अनेन न्यासरूपेण मंत्री न्यासस्व

द॰सं॰ रूपवान्॥१५॥ध्यायेद्वर्णस्वरूपाद्यांस्वरवक्त्रांक्रमेणहि॥कवर्गकरांरम्यांटतवर्गपदांतुजां॥१६॥पवर्गवासुपार्श्वांग
१० लमध्यातोदरीपराश॥यशवर्गांगसुभगांपीनोन्नतघनस्तनीश॥१७॥नितंवविंवगहनांशुक्लांक्ष्मींह्लांममध्यमां॥शुक्लांम
10 ल्यानुरागांगीमक्षसूत्रकुंभशोभितां॥१८॥चिंतालिखितसत्पाणिंसमयवरदायिनीम्॥एवंध्यात्वाततोदेवींयजनंचसुधी
श्चरेत्॥१९॥आदौहृत्कंर्णिकास्थंहंसान्तुयहसर्गवान्॥वाह्येष्टदलमालिख्यकेसरेषुस्वरान्लिखेत्॥२०॥युग्मयुग्म
प्रभेदेनततोवसुदलेषुच॥कादिवर्गाष्टकंयोज्यलक्षांतंपरमेश्वरि॥२१॥चतुरस्रंततःकुर्यात्सिद्धिदेदिक्षुसंलिखेत्
ठकाराणांचतुष्कंचरेखांतंवाह्यतस्तथा॥२२॥वासुणंचसमालिख्यदेवीमावाहयेत्सुधीः॥आदौपीठार्चनंकृत्वानव राम॰
शक्तिपुरस्कृतम्॥२३॥मेधाप्रज्ञाप्रभाविद्याधीर्धृतिस्मृतिबुद्धयः॥विश्वेश्वरीचपूर्वादिदिक्षुमध्येप्रपूजयेत्॥२४॥पश्चा १०

© Dharmartha Trust J&K. Digitized by eGangotri

दावाह्यगंधादिउपचारान्प्रकल्पयेत ॥ अग्नीशासुरवायव्यमध्यदिक्षुंगषट्जन्प्रस ॥ २५ ॥ नियोज्यस्वरयुग्मांतेनमस्का
रंपृथक्पृथक् ॥ अष्टधाजपेद्देविकेसरेषुपृथक्पृथक् ॥ २६ ॥ तथैवकादिवर्गेषुनमस्कारंक्षिपेत्पृथक् ॥ अष्टधावर्गा
न्पूजयेत्ततोब्राह्म्यादिभिर्यजेत ॥ २७ ॥ लोकपालैस्ततोदेवींसमाराध्ययजेत्सुधीः ॥ लक्षमात्रंदशांशेनहुनेत्पालाश(
पुष्पकैः ॥ २८ ॥ त्रिमध्वक्तैर्मिताहारःपुरश्चारीततोभवेत ॥ इतिश्रीदक्षिणामूर्त्तिसंहितायांमातृकाविधिर्नामअष्टमः
पटलः ॥ ईश्वरउवाच ॥ पंचसिंहासनगताविद्याजप्यामहेश्वरी ॥ मयातत्कथ्यतेपासेनजप्यातेतक्रमशःप्रिये ॥ १ ॥ अनया
सदृशीविद्यात्रिषुलोकेषुदुर्लभा ॥ प्रणवाद्यंबिन्दुनादसमहितंकृत्वासुव्रते ॥ २ ॥ एतद्वाग्भवमुच्चार्यसहितंकामबीज कलं
कं ॥ वामनेत्रेन्दुबिंदुढ्यंतैसर्गवान्भृगुरव्ययः ॥ ३ ॥ अनुग्रहेणसंयुक्तोविघ्नेच्छकरीभवेत ॥ ऋषिस्तुदक्षिणामूर्त्तिरहंशि

औंकारः यं।

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
११

रसिविन्यसेत॥४॥छंदःपंक्तिस्तुविज्ञेयाउरसेविन्यसेद्देवतां॥हृदयेत्रिपुरेशानीवाग्भवंवीजमुच्यते॥५॥शक्तिवीजं
शक्तिवीजंशक्तिरेवकामवीजंचकीलकं॥एषाविद्यामहेशानिपुरुषार्थप्रदायिनी॥६॥पादादिनाभिपर्यंतमाद्येना
भेस्तथागलं॥मध्यमंशक्तिवीजंचगलादामस्तकंन्यसेत॥७॥वामपाणितलेतद्वद्दक्षपाणौतुपंचन्यसेत॥करयोः
संपुटेचैकमेवंन्यासद्वयंभवेत॥८॥एतत्संपुटितांपश्चान्मातृकांविन्यसेत्सुधीः॥नवयोन्यंकितंन्यासंकुर्या
त्कमललोचने॥९॥कर्णयोश्चिबुकेदेविशंखास्येषुदृशोर्नसि॥अंसयोर्हृदयेदेविन्यसेतकूर्परकुक्षिषु॥१०॥
जानुद्वयांघ्रिपद्द्वंद्वंगुह्येतत्क्रमतोन्यसेत॥पार्श्वहृत्सुस्तनद्वंद्वकंठेष्वपिचविन्यसेत॥११॥वीजत्रिकंक्रमेणै
वनवधाविन्यसेत्प्रिये॥वीस्यथांगानिविन्यस्यपंचवाणान्न्यसेत्सुधीः॥१२॥थकारांतंसमालिख्यद्विधावह्नि

राम॰
११

मूलमन्त्रन्यासः
ध्यानं
यन्त्रोद्धारः
पूजा
आवरणपूजा
धूपदीपरात्रिकर्मैवेद्यहोमाः
वटुकगणेशयोगिनीक्षेत्रपालबलिः
नमस्कारो देव्याहृदयविसर्जनम्
इति पैतावद्दक्षिणामू
र्तिसंहितामन्त्रोक्तम्

© Dharmartha Trust J&K. Digitized by eGangotri

समन्वितम्॥ अनंतवामनेत्राभ्यांबिंदिंदुपरिभूषितम्॥१३॥ कामबीजंचकालादितदादिष्ठथिवीयुतं॥ दीर्घकर्णेन्दुवि
द्धान्यमजपांतंलिखेत्क्रमात्॥१४॥ ललाटगलहृन्नाभिमूलाधारेषुविन्यसेत्॥ उनरेतेषुबीजानिपंचसंख्यानिवि
न्यसेत्॥१५॥ ह्रींक्लींमात्मकवाग्बीजेचतुर्थंवाणमालिखेत्॥ ततस्त्रीमात्मकंपंचकामाएतेषुकीर्तिताः॥१६॥
एवंविन्यस्तदेहःसन्प्राणानायम्यपूर्ववत्॥ ध्यायेद्देवींमहेशानींकदंबवनमध्यगां॥१७॥ रत्नमंडपमध्येतुमहाक
ल्पवनांतरे॥ सुकान्तपत्रछायायांरत्नसिंहासनेस्थितां॥१८॥ अनर्घ्यरत्नघटितमुकुटांकुंडलोज्वलाम्॥ हारग्रै
वेयसद्रत्नविचित्रितांकंकणोज्वलां॥१९॥ हारस्तुकालसद्रूपांशुद्धक्षौमविराजिताम्॥ हीरमंजीरसुभगांरक्तोत्पल
पदांबुजां॥ श्यामांगरागसुभगांकर्पूरशकलोज्वलां॥२०॥ उरस्तकंचाभयंवामेदक्षिणेवाक्षमालिकाम्॥ वरदानरतांदे

© Dharmartha Trust J&K. Digitized by eGangotri

वींसम्यक्क्रमात्स्वतन्त्रदां ॥ २१ ॥ एवं ध्यात्वा जपेन्मन्त्रं वर्णलक्षसमाहितः ॥ तद्दशांशेन जुहुयात् किंशुकैस्त्रिमधुप्लुतैः
॥ २२ ॥ अथ वक्ष्ये महेशानि यन्त्रं सर्वार्थसिद्धिदं ॥ आदौ शक्तिं समालिख्य तस्याउपरि सं लिखेत् ॥ २३ ॥ तामेव विस्तृतां किं-
चित्संपुटीकृत्य वह्निना ॥ संधिभेदक्रमेणैव नवयोनिर्यथा भवेत् ॥ २४ ॥ हसौंकारं लिखेन्मध्ये कामाख्यं चाष्टयोनिषु
बहिर्वृत्तं समालिख्य दलैराजितमष्टभिः ॥ २५ ॥ केसरेषु स्वरा योज्या द्वंद्वशः परमेश्वरि ॥ कचटातपयावर्णासिशद्धाः
परमेश्वरि ॥ २६ ॥ अष्टपत्रेषु संलिख्य ततः शूलाष्टकं लिखेत् ॥ पत्राग्रेषु ततो मन्त्री लिखेद्दुर्गां तु क्रमेण तु ॥ २७ ॥ तेषु
शूलेषु खगघान्सर्वतः क्रमतो यजेत् ॥ ~~ङ्मछ~~ जानमिदिग्भागे झञटान्दक्षिणे लिखेत् ॥ २८ ॥ उढणान्नैर्ऋते भा-
गे थदधान्पश्चिमे यजेत् ॥ नफबान्वायुदिग्भागे भमरांस्तूत्तरे लिखेत् ॥ २९ ॥ लवषानीशदेशे तु ततो वृत्तं समालिखे-

ङ॰छ

© Dharmartha Trust J&K. Digitized by eGangotri

तर॥ वृत्तंमातृकयातीतंततोऽश्विंवंबमालिखेत॥३०॥ चतुर्द्वारविशोभाढ्यंमध्येतुषट्वंविनिक्षिपेत॥ पीठार्चणंततः
कुर्यान्मंत्रीदेवीमनोहरां॥३१॥ वामाज्येष्ठाचरौद्रीचत्वंबिकेच्छाततःपरं॥ ज्ञानाक्रियाकुब्जिकाचविरुवीदेवीवि
षघ्निका॥३२॥ इतराचतथानंदासंपूज्याश्चमितःप्रिये॥ सिंहासनंचसंपूज्यमध्येबीजनमांत्रिकः॥३३॥ सदाशि
वमहाप्रेतपद्मासनपदंलिखेत॥ ॐतंनमोनेनदेविपूजेत्सिंहासनंप्रिये॥३४॥ मुक्ताछत्रंशरच्चंद्रचंद्रिकाका
रचामरे॥ उशीरक्लिन्नसद्वंद्रकलाढ्यजनयुग्मकं॥३५॥ शांतमुक्तावलीराजत्स्वर्णदर्शंचवीटिकाम्॥ अलेक्तास्म
यीपेटीकरंडंशशिशेखरकं॥३६॥ कर्पूरक्षोदभरितवषकंस्वर्णकांतिकं॥ सतुष्पाशूर्णकाश्मीरपात्रंचदधतीःस्त्र
मातः॥३७॥ ध्यात्वावामादिकाःपश्चाद्देवीमावाहयेतप्रिये॥ उपचारैःसमभ्यर्च्यतर्प्पणानिसमर्चयेत॥३८॥ लयां

© Dharmartha Trust J&K. Digitized by eGangotri

त्रकमित्यर्थः

स्वामिमुखं कृत्वा च करांग्रमात्रमि त्यर्थः

द॰सं॰ गंविच्यसेद्देविदेहेमुद्राश्चदर्शयेत॥अग्नीशासुरवायव्यमध्यादिक्ष्वंगसज्जनं॥३९॥क्रमेणतुरश्चारभ्यरतिप्रीतिम

१२ नोभवाः॥त्रिकोणाग्रेषुदेवेशितद्वाह्येवाणदेवताः॥४०॥देवतायादक्षिणेदेहेवामेरूपमग्रतः॥अनंगानंगकुसु

13 मातथाचानंगमेखला॥४१॥अनंगमदनादेविसुभगाचभगातथा॥भगसर्पिण्यथोदेवितथाचभगमालिनी॥

४२॥पुरश्चारभ्यदेवेशिप्रादक्षिण्येनपूजयेत॥अष्टकोणेषुतद्वाह्येवसुपत्रेषुवार्चयेत॥४३॥असितांगंतथाब्रा

ह्मींरुरुंमाहेश्वरींतथा॥चंडंकौमारिकांचैवक्रोधंचैवतुवैष्णवीं॥४४॥उन्मत्तंचैववाराहींतथाचैवकपालि

नं॥माहेंद्रींभीषणंदेविचामुंडांचततःपरं॥४५॥संहारभैरवंदेविमहालक्ष्मींक्रमाद्यजेत॥युग्मयुग्मप्रभेदे रम॰

नस्वेस्वेहृद्वैस्वकभैरवः॥४६॥कामरूपंतथादेविमलयंचद्वितीयकं॥पीठंकोल्लगिरिंपीठंकुलांतकमतःपरं १२

© Dharmartha Trust J&K. Digitized by eGangotri

४१॥ चौहारंचैवदेवेशिजालंधरमतःपरं॥ उड्याणंदेविकोटंचपीठाष्टकमिदंयजेत्॥ ४८॥ वहिर्वृत्तेमहेशानिसं
पूज्याभैरवाद्दश॥ हेतुकंभैरवंचाद्यंद्वितीयंत्रिपुरांतकं॥ ४९॥ वेतालमग्निजिह्वंचकालांतकमतःपरम्॥ कपा
लिनंचैकपादंभीमरूपमतःपरम्॥ ५०॥ अचलंहाटकंचैववजरश्चारथपूजयेत्॥ अथऊर्ध्वंततोदेविचतुरस्रेक्रमे
णतु॥ ५१॥ इंद्रादयस्तुसंपूज्यास्ततस्तुवटुकादयः॥ वटुकंयोगिनींक्षेत्रपालंगणपतिंयजेत्॥ ५२॥ पूर्वादिदि
क्कोणेषुवस्तूनकार्त्तिकमातृप्रिये॥ रुद्रांश्चसर्वभूतांश्चपुनर्देवींसमर्चयेत्॥ ५३॥ वनस्पतिरसोत्पन्नोगंधाढ्यो
गंधउत्तमं॥ आघ्रेयःसर्वभूतानांधूपोयंप्रतिगृह्यतां॥ ५४॥ एतंमंत्रंत्रिवीजांतेधूपमंत्रमुदाहृतः॥ स्वप्रकाशोमहा
दीपःसर्वतस्तिमिरापहः॥ ५५॥ सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतां॥ तथैवदीपमंत्रोयंशृणुएकवीरात्मकांश

नि

© Dharmartha Trust J&K. Digitized by eGangotri

द०सं. ये॥ ५६॥ समस्तचक्रमद्धश्मिमंडलेब्रह्मरूपिणि॥ आरात्रिकंगृहाणेदंत्रिपुरेममसिद्धये॥ ५७॥ आरात्रिकमिदंदेवि
१४ विधांतेमज्रीरितः॥ हेमपात्रगतंदिव्यंपरमान्नंसुसंस्कृतं॥ ५८॥ पंचधाषड्रसोपेतंगृहाणपरमेश्वरि॥ उपहारमउ
14 ईविविधांतेस्वयमीरितः॥ ५९॥ यथाशक्तिजपंकृत्वानित्यहोमंसमाचरेत्॥ पंचाहुतीःक्रमश्चेनषडंगानिचहो
मयेत्॥ ६०॥ नित्यहोमप्रकारोयंसर्वविघ्नानपोहयेत्॥ अथान्यंसंप्रवक्ष्यामिसर्वविघ्ननिकृन्तये॥ ६१॥ अग्निराक्ष
सवाय्यशिवकोणेषुमंत्रवित्॥ त्रिकोणवृत्तभूबिंबमंडितानिसमालिखेत्॥ ६२॥ मंडलानिचत्वारितत्रपुन्न
मन्नंक्षिपेत्॥ वटुकायनमोवांतेगांतेगणपतिंतथा॥ ६३॥ आंयोसबिंदुयांचैवयोगिनीभ्योनमःस्मरेत्॥ क्षंम एम०
तेक्षेत्रपालायनमोमंत्रवर्णचतुष्टयं॥ ६४॥ एभिर्मंत्रैर्वदेसंख्येमंडलानिप्रपूजयेत्॥ एह्येहिदेविपुत्रांतेवटुकांतेतथ १४

© Dharmartha Trust J&K. Digitized by eGangotri

नायव ॥ ६५ ॥ कपिलांते जटाभारभास्वरांते त्रिनेत्र च ॥ ज्वालामुखततः सर्वविघ्नान्नाशय नाशय ॥ ६६ ॥ सर्वो
पचारसहितं बलिं गृह्ण पदद्वयं ॥ वह्निजायान्वितो मंत्रो वटुकस्य उदाहृतः ॥ ६७ ॥ ऊर्द्ध्वे ब्रह्मांडतो वांते दिव्यं
तिगगनेति च ॥ तले भूपद्मालिख्यांते लैं चैव तु निष्कले ॥ ६८ ॥ वा पाताले नले वांते सलिलांते च वा लिखेत् ॥ प
वनांते च यो यत्र कुत्रांते चास्थिता इति ॥ ६९ ॥ वाक्ये चैव पीठोपपीठादिषु च संलिखेत् ॥ ततः सूतपदाद्भूपदी कू
पादिपदं लिखेत् ॥ ७० ॥ केनक्षीताश्च देव्यश्च सदानः शुभसंलिखेत् ॥ बल्यंते विधिना चैव पाताड देवेंद्रसंलिखेत्
७१ ॥ वंघास्वपांसमालिख्य योगिनीभ्यो ग्निवल्लभा ॥ सर्वांतियोगिनीभ्यो चक्रकवचास्त्राग्निवल्लभा ॥ ७२ ॥ योगि म्यो
नीनाम यं मंत्रः क्षेत्रपालमतुं शृणु ॥ षष्ठी दीर्घस्वरभेदे नक्षकारं भेदयेत्प्रिये ॥ ७३ ॥ कवचस्थानशद्वांते क्षेत्र

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
१५
15

ग्नि
पालसमालिखेत॥ धूपदीपादिविहितंवलिंगृह्णाद्विधालिखेत॥७४॥ सर्वकामार्थसूरयामिवल्लभाक्षेत्र
पोमउंगंगांगींगूंगंसमालिख्यगणपांतेतयेलिखेत॥७५॥ वरशंद्विधादांतेततःसर्वजनंपदं॥ मेवशंचा
नयघांत्येततःसर्वोपचारंच॥७६॥ सहितंचवलिंगृह्णाद्विधालिखेतगृह्णास्वाहामंत्रःप्रिये॥ गणेशस्यवरा
रोहेमंत्रैरेभिर्वलिंहरेत॥७७॥ वटुकस्यतुतर्जन्यासहांगुष्ठेनवाप्रिये॥ वामांगुष्ठानामिकाभ्यांक्षेत्रपाल
स्यकथ्यते॥७८॥ तर्जनीकेवलाचाथगणेशस्यतुमध्यमा॥ गजवक्त्राकृतिदेवियोगिनीनांतुकथ्य
ते॥७९॥ तर्जनीमध्यमानामायोन्याकारेणयोजयेत॥ वलिदानविधौमंत्रीमुद्रासंदर्शयेत्क्रमात॥
८०॥ कृत्वानत्वापुनर्देविदेवीमात्मनियोजयेत॥ आत्मविद्याशिवैस्तत्वैर्गुरुसंतोष्यदेवताम॥८१॥

राम॰
१५

© Dharmartha Trust J&K. Digitized by eGangotri

घमंते २

आनंदसहितो मंत्री सर्वकर्माणि साधयेत् ॥ ॥ इति श्रीत्रिपुरासमाराधनविधिः ॥ ईश्वर उवाच ॥ महासिंहास
नगताविद्येयं त्रिपुरेश्वरी ॥ सर्वाम्नायेश्वरी विद्या विद्येयं परमेश्वरि ॥ १ ॥ शिवचंद्राग्निवामाक्षिविंदुनादात्मकांत
तः ॥ चंद्रेशवह्निवामाक्षिविंदुनादमयं प्रिये ॥ २ ॥ शक्तिं कलायोगिनी चतुर्थं बीजमुदाहृतं ॥ श्रीबीजं कूटता
नीयं विद्या वेदाक्षरी भवेत् ॥ ३ ॥ ऊर्मिणी नाम विद्येयं सर्वाम्नायाधिदेवता ॥ अनया विद्यया देवि देवी संमानिता
प्रिये ॥ ४ ॥ सर्वसिंहासनगता भोगमोक्षफलप्रदा ॥ मयैषा सर्वविज्ञेण जप्यते ध्यायते पि सर्वतः ते ॥ ५ ॥ इति श्रीदक्षि
णामूर्तिसंहितायां सर्वाम्नायसिंहासनविद्याविवरणं नाम नवमः पटलः ॥ ईश्वर उवाच ॥ दक्षिणास्येन देवेशि
ललितात्रिपुरा परा ॥ कामेश्वरी रक्तनेत्रा मया ध्याप्यते जप्यते ॥ १ ॥ शक्तिबीजं वाग्भवं तु कामराजं तु सर्ववित् ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं.
१६
16

अंतःशिवसमायुक्तं त्रिपुरेशपाः परेश्वरि ॥ १ ॥ इयं तु ललितादेवी महासौभाग्यवर्द्धनी ॥ न्यासपूजादिकं सर्वं
त्रिपुरेशीवनान्यथा ॥ ३ ॥ ध्यानमस्याः प्रवक्ष्यामि साधकानां तु सिद्धये ॥ उद्यत्सूर्यसहस्राभां माणिक्यमु
कुटोज्ज्वलां ॥ ४ ॥ रक्तकुंडलयुक्तालोपदकांगदभूषितां ॥ रत्नमंजीरसुभगां रक्तवस्त्रानुलेपनां ॥ ५ ॥ पाशांकु
शौ पुस्तकं चदधतीमक्षमालिकां ॥ सर्वांगसुंदरीं ध्यायेत्सर्वसंपत्तिहेतवे ॥ ६ ॥ इति ललितापूजाविधिः ॥ ईश्व
र उवाच ॥ केवलं कामबीजं तु कामेशीबीजमुच्यते ॥ ऋषिः कामोऽस्य मंत्रस्य गायत्रं छंद उच्यते ॥ १ ॥ कामेश्वरी
देवतास्याः कान्तुर्यबीजशक्तिके ॥ पृथिवीकीलकं प्रोक्तं महाविभवकरीपरा ॥ २ ॥ षड्दीर्घस्वरभेदेन षडंगा
नि प्रविन्यसेत ॥ पूर्वोक्तपंचबाणांश्च पूर्ववद्विन्यसेत्प्रिये ॥ ३ ॥ जपाकुसुमसंकाशां धनुर्बाणधरां स्मरेत

रम०
१६

© Dharmartha Trust J&K. Digitized by eGangotri

नानालंकारसुभगांमोहयंतीजगत्त्रयं ॥ ४ ॥ अर्कलक्षंजपेन्मंत्रंवंधूककुसुमैर्हुनेत् ॥ तद्दशांशेनदेवेशि
पुरश्चारीततोभवेत् ॥ अथयंत्रंप्रवक्ष्यामित्रैलोक्याकर्षणक्षमं ॥ त्रिकोणंचाष्टपत्रंचततोभूविंवमालिखेत् ॥ ६
मध्येविदर्भितंवीजंसाध्यसाधकलांछितं ॥ कोणत्रयाग्रेविद्यांचषष्ठस्वरस्तुदलेष्वपि ॥ ७ ॥ दलाग्रेषुचसंलिख्य
चतुरस्रेष्टधालिखेत् ॥ त्रैलोक्यमोहनंयंत्रंत्रिषुलोकेषुदुर्लभम् ॥ ८ ॥ मध्यपुष्पंविनिक्षिप्यततःपीठार्चणंच
रेत् ॥ मोहिनीक्षोभिणीचैवत्रासिनीस्तंभिनीतथा ॥ ९ ॥ आकर्षिणीद्राविणीचतथैवाल्हादिनीक्रमात् ॥
क्लिन्नाचक्लेदिनीचैवदिक्षुमध्येचसंजपेत् ॥ १० ॥ ततःसिंहासनेपद्मेदेवीमावाहयेत्प्रिये ॥ उपचारैःसमा
राध्यपुष्पमुद्रांप्रदर्शयेत् ॥ ११ ॥ अग्नीशासुरवायव्यमध्यदिक्ष्वंगपञ्जनम् ॥ त्रिपुरेशीववाणाघमर्चणंपरमे

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ १७ 17

श्वरि ॥ १२ ॥ आदावनंगरूपां च त्वनंगमदनां तथा ॥ अनंगमन्मथां चैव त्वनंगकुसुमां प्रिये ॥ १३ ॥ पंचमीं च प्रजेत्तद्वदनं
गकुसुमातुरां ॥ अनंगशिशिरां चैव तथा वानंगमेखलां ॥ १४ ॥ अनंगदीपिकामष्टदलेषु क्रमतो यजेत ॥ इंद्रादय
स्त्रसंपूज्याः पुनराराधयेच्छिवां ॥ १५ ॥ इति कामेश्वरीपूजाविधिः ॥ ईश्वर उवाच ॥ अथ वक्ष्ये महादेवि दक्षिणा
म्नायदेवतां ॥ एनां मध्यगतं लिखेत्कामबीजं ततो लिखेत ॥ १ ॥ मदद्रवे कुलेवो न्हा त्रिपुरेश्यामसनं प्रिये ॥ वह्निम
डुद्ववर्णेयं दक्षिणाम्नायदेवता ॥ २ ॥ योगिनीनामविघ्नेयं त्रिषु लोकेषु विश्रुता ॥ अनया विद्यया देवि त्रयं सन्मानि
तं सदा ॥ ३ ॥ इति श्रीदक्षिणाशक्तिसंहितायां दक्षिणाम्नायसिंहासनविद्याविवरणं नाम दशमः पटलः ॥ ईश्वर राम॰
उवाच ॥ देवि पश्चिमवक्त्रेण मया या प्रतिपद्यते ॥ विद्या चतुष्टयं साक्षादस्मातानंदविग्रहम ॥ १ ॥ महासिंहासनग १७

© Dharmartha Trust J&K. Digitized by eGangotri

तांतत्रसंजीविनीशृणु॥मायाबीजंसमालिख्यशिवचंद्रौसमालिखेत्॥२॥अनुस्वारविसर्गाभ्यांमंडितोक्र
मंतंश्रियोसंजीविनीचज्ञेजीवंशाणाग्रंथिस्थमालिखेत्॥३॥ॐकारःशहृत्तृतीयंचवह्निजायान्वितोमंत्रः॥विंश
दर्णाऋषिःशुक्रोगायत्रंछंदउच्यते॥४॥संजीविनीदेवताघाक्षिरंत्यादिबीजकं॥त्रिकंचतुष्कंत्रितयंपंचकंच
क्रुरेवहि॥५॥त्रिकंचक्रमतोदेविषडंगानिविन्यसेत्॥भूर्जेक्षीरेणविलिखेत्षट्कोणंमंडलंसुधीः॥६॥कर्पूरा
भांहीरमुक्ताभूषणैर्भूषितांपरां॥ज्ञानमुद्रामक्षमालांदधतींचिंतयेत्परां॥७॥एवंध्यात्वावाह्यमध्येपूजयेदुपचा
रकैः॥आदावंगानिसंपूज्यषट्कोणेषुप्रपूजयेत्॥८॥संजीविनींतथाबुद्धिपूर्वंसंजीविनींततः॥अहंकारमयींत
त्त्वसंजीविनीप्रिये॥९॥राजसंजीविनींचैवतत्त्वसंजीविनींक्रमात्॥शक्तिबीजेनदेवेशिॐनमोंतःप्रपूजये

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ त ॥ १० ॥ वर्णलक्षं जपेन्मंत्रं पुरश्चरणहेतवे ॥ तद्दशांशेन जुहुयाद्दूर्वास्त्रिमधुराप्लुताः ॥ ११ ॥ इति साधारणपूजाविशेषं श्रु
१८ णु पार्वति ॥ इति पूजां पुरा कृत्वा तत्र चावरणं शृणु ॥ १२ ॥ प्राणापानौ तथा व्यानमुदानश्च समानकः ॥ अग्निकोणे
18 ततं चैव वितनं च तथा वनं ॥ १३ ॥ सुषिरे वै खरीशस्तु द्वितीयके यजेत ॥ पृथिव्यप्तेजश्च आख्यातं वाय्वाकाशौ तृतीयके
१४ ॥ शब्दस्पर्शस्वरूपं च रसगंधौ चतुर्थके ॥ इच्छाज्ञानक्रिया चैव परं माया च पंचमे ॥ १५ ॥ भूर्भुवः स्वस्तपः सत्यं ऋष
ष्ठकोणे क्रमाद्यजेत ॥ सर्वस्यांते वदेद्द्विपञ्चस्तु संजीविनीपरं ॥ १६ ॥ त्रिंशत्संजीविनीपूजा मृत्युंजयति निश्चयात्
॥ इति संजीविनीपूजाविधिः ॥ ईश्वर उवाच ॥ अथ वक्ष्ये महेशानि मृत्युंजयपरापराम् ॥ वदहं हं वाहिनी ति वा ॐ मध्योनि राम॰
क्षिपेत् प्रिये ॥ ११ ॥ हसांकं वाग्भवे देवि क्लिन्ने क्लेदिनि चालिखेत ॥ महाक्षोभं कुरु द्वंद्वं शिवचंद्रकलानलान् ॥ १ ॥ वामा १८
कू

क्लिबिंदुनादांकां स्तारबीजं ततो वदेत् मोक्षं कुरु द्वयं गं ह स्वशक्रस्वरविसर्गमत् ॥३॥ इयं संजीविनी देवि ऋषिरस्याः
सितः प्रिये ॥ गायत्रं छंद आख्यातं देवतेयं तु भैरवी ॥४॥ आदिक्षांतं भवेद्बीजं मध्याक्षरं तु कीलकं ॥ अंत्यक्षरं भवेच्छ
क्तिः साक्षान्मृत्युविनाशिनी ॥५॥ नवशक्त्याष्टवर्णैः स्यान्न्यसेद्धृद्धृच्छिरः शिखां ॥ क्रमेणानेन वोच्चार्य पुनरंत्यत्रयं न्य
सेत् ॥६॥ अथ त्रिकोणमालिख्य ततः षट्कोणमालिखेत् ॥ बहिरष्टदलं पद्मं चतुरस्रं च संलिखेत् ॥ वसुपत्रेका
मपीठं षट्कोणे ज्वालपीठकम् ॥ आद्याणं त्रिकोणे तु विद्याभागत्रयेण तु ॥८॥ ध्यात्वावाहयेद्देवां कदंबवन
मध्यगां ॥ अस्त्रकं वामहस्तेन दक्षिणेनाक्षमालिकां ॥९॥ विभ्रतीं कुंदधवलां कुमारीं चिंतयेत्परां ॥ सर्वोपचा
रैः संतर्प्य षडंगावरणं यजेत् ॥१०॥ वसंतं मदनं चैव द्विविद्याभागत्रयेण तु ॥ त्रिकोणे पूजयेन्मंत्री ईशादक्षिणे नवाग्रतः

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ११॥ ब्रह्मविष्ण्वीशशक्रांतेयजेत्संजीविनीत्रयम् इतिसंजीविनीषट्कंत्रिकोणेप्रजयेत्सुधीः॥१२॥ धर्मार्थकाममोक्षां
१९ तेजयांतेविजयांतिके॥ संजीविनीपदंचोक्त्वाषट्कोणेषुचपूजयेत्॥१३॥ अष्टकांतेतुमातॄणांकुर्यात्संजीविनीपदं
19 अनेनैवविधिनाविद्वान्पूजयेद्दलपत्रके॥१४॥ नियोज्यंलोकपालांतेपदंसंजीविनीतिच॥ क्रमेणानेनदेवेशिपू
जयेच्चतुरस्रके॥१५॥ तारबीजंशक्तिबीजंश्रीबीजंचादिमंकुरु॥ इतिजप्त्वामहेशानीपुरुषार्थप्रदाभवेत्॥१६॥
पुनश्चाराधयेद्देवींगंधपुष्पादिभिःप्रिये॥ पुरश्चरणरीतिश्चपूर्वसंजीविनीवहि॥१७॥ इतिभैरवीसंजीविनीवि
धिः॥ परांबिकेवाग्भवंचकारोमात्मकमक्षरम्॥ ततोनित्यपदंप्रांतेद्वेमायांचसंलिखेत्॥१॥ वज्रेश्याऋषिव एम॰
र्णीयऋषिर्ब्रह्मास्यमन्मनोः छंदोविराट्वज्रेशीदेवतापरिकीर्तिता॥२॥ पंचपंचचतुर्थंचबीजशक्तिक्रमेणतु १९

© Dharmartha Trust J&K. Digitized by eGangotri

तार्त्तीयंकीलकंदेव्यास्तत्तोंगानिश्चविन्यसेत्॥३॥आद्यंतवीजंसंत्यज्यह्रिकंचैकं वरूपकं॥ह्रिकंह्रिकंह्रि
कंदेविषडंगानिश्चविन्यसेत्॥४॥हृत्तेकृत्वामनोरम्यंकर्णिकाष्टकशोभितं॥कामवीजेनतन्मध्येमहासिंहा
सनंयजेत्॥५॥रविपत्रैर्विशोभाढ्यंतत्रविद्यांसमालिखेत्॥चतुरस्रंततःकृत्वामध्येपुष्पंविनिक्षिपेत्॥६॥
ध्यात्वाचावाहयेद्देवींकदंववनमध्यगां॥उक्ताचंद्रकलाचारुमुक्ताहारविभूषणां॥७॥शोणिताध्वितरत्नोतम
हायंत्रोपरिस्थितां॥दाडिमीसायकांश्चैवपाशंचैवश्रुणिंतथा॥८॥चापंकपालंदधतींशोणमाल्यानुलेप
नां॥स्मरेद्दत्वभरांदेवीमुपचारैःसमर्चयेत्॥९॥आदावंगानिसंपूज्यरविपत्रेषुपूजयेत्॥हृल्लेखाक्लेदिनी
नंदाक्षोभिणीमदनातुरा॥१०॥निरंजनारागवतीक्लिन्नाचमदनावती॥खेचरीद्राविणीचैवक्रमाद्वेगवती

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ यजेत॥११॥कामबीजेनसंरुद्ध्यासंज्ञदायांतरेस्थ्रएफ॥ख्यात्वाभूमिविंवांतराष्टपत्रंसमालिखेत॥१२॥मातरस्तत्रसं
१० पूज्याश्चविंवेलोकपालकाः॥पुनर्देवींसमभ्यर्च्यवर्णलक्षंजपेत्सुधीः॥तद्दशांशेनजुहुयादंबुजैरक्तसंनिभैः
20 १३॥इतिवज्रेशीपूजाविधिः॥ईश्वरउवाच॥अथवक्ष्येमहेशानिभैरवींत्रिपुरांपरां॥पंचमुंडासनासीनांमुंडमा
लाविभूषणां॥१॥अताम्रार्कयुतामासांरक्तभूषणभूषितां॥पाशांकुशाभयवरांसाक्षाद्भुवनमातृकां॥२॥
हसाद्यंवाग्भवंवाद्यशिववंद्रकलापरा॥त्रिपुरेशीशक्तिवीजंशिवाद्यंभैरवीमनुः॥३॥सर्वमस्याविधानंतत्रिपुरे
शीचविद्धिहि॥अनयासदृशीविद्यात्रिषुलोकेषुदुर्लभा॥४॥इतिभुवनेशीभैरवीपूजाविधिः॥ईश्वरउवाच राम॰
एतच्चतुष्टयंदेविचतुरार्णवसागरे॥वाग्भवंशक्तिवीजंचश्रीवीजंहसफवानलम्॥१॥रुद्रंस्वरेणसंभेद्यविंदुना १०

© Dharmartha Trust J&K. Digitized by eGangotri

दांकिंतंहसौः एतत्संउद्दिनांविद्यांद्वात्रिंशार्णांलिखेद्बुधः ॥ १ ॥ नमोभगवतिशांतेचतुर्थंश्रणंलिखेत्
ईश्व रार्थंक्रमेणैवकुब्जिकायैपदंततः ॥ ३ ॥ हकारात्मकंपरांपश्चाद्भूमात्मकमतःपरम् ॥ ॐअणंति
नमःपश्चादघोरउखिमं लिखेत् ॥ ४ ॥ छ्रांछ्रींकिणिद्युगंक्विकुब्जिकाशांभवीपरा ॥ पश्चिमाम्नायदेवेशीभोग
मोक्षप्रदायिनी ॥ ५ ॥ महासिंहासनारव्यंतुकथितंयच्चतुष्टयं ॥ अनयाविद्ययायोगीरिसम्यक्संमानितंसदा ॥ इ
तिश्रीदक्षिणाम्नायसंहितायांपश्चिमाम्नायसिंहासनविद्याविवरणंनामएकादशमःपटलः ॥ ईश्वर उवाच
उत्तरास्येनदेवेशिमयायापिप्रजप्यते ॥ महासिंहासनगताभैरवीडामरेश्वरी ॥ १ ॥ उत्तराम्नायविद्येशीभोगमो
क्षफलप्रदा ॥ वंध्रुकाकारउमावासांपंचमुंडाधिवासिनीम् ॥ २ ॥ स्फुरच्चंद्रकलारत्नउकुटांमुंडमालिनीं ॥ त्रिनेत्रां

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ रक्तवसनांपीनोन्नतघनस्तनीम्॥३॥पुस्तकंचाक्षमालांचवरदंचाभयंक्रमात्॥दधतींसंस्मरेन्नित्यमुत्तराम्नाय
२१ मानिताम्॥४॥मदनांतिंफरेमात्ममहाकुंडसमंलिखेत्॥योगे—नामचायाप्तुविधेयंकालिकामतं॥५॥नवाक्ष
रीमहेशानिस्मरेदुत्तरनायिकां॥अनयाविधयादेविसम्यक्संमानिताभवेत्॥६॥न्यासपूजादिकंसर्वंत्रिपुरेशी
चसुंदरी॥महासंपत्प्रदादेवीमहाभयविनाशिनी॥७॥इतिश्रीदक्षिणामूर्तिसंहितायांउत्तराम्नायसिंहास
नेश्वरीडामरेश्वरीभैरवीविधानंनामद्वादशःपटलः॥ईश्वरउवाच॥चतुःसिंहासनाद्याद्याभैरव्यःपरमेश्वरि
वाग्भवंसर्वसाम्राज्यदापिन्यामध्यमंलिखेत्॥१॥चैतन्यभैरवींध्यायेत्पाशांकुशकपालिनीं॥रक्तांशुडस्रजं राम॰
चिवपंचप्रेतासनस्थितां॥२॥कामेश्वरीचसंपूज्यपूर्वसिंहासनाश्रयां॥इतिचैतन्यभैरवीविधिः॥ईश्वरउवा २१

© Dharmartha Trust J&K. Digitized by eGangotri

च॥ उरःस्थमासादनं जीवः शिवएतत्त्रिधा लिखेत् ॥ अर्कतुर्यैन्दुकलया क्रमात्तत्रापि पिंडितं क्रमात् ॥१॥ बिन्दुनादात्मकं
चाद्यं तु गमं मंत्रं विसर्गमितं ॥ ध्यानं त्रिभुवनेश्वर्याभैरव्याश्च सुंदरि ॥२॥ षट्कूटभैरवी देवी दक्षिणाम्नायसेविता
त्रिकोणं चैव षट्कोणं वसुपत्रं क्रमात्मकं ॥३॥ अष्टादि त्रिपुरेशी च सृजां चैव निगद्यते ॥ त्रिकोणे क्रमतो देवि राति
प्रीतिमनोभवा ॥४॥ डाकिनी राकिनी चैव लाकिनी काकिनी तथा ॥ शाकिनी हाकिनी चैव षट्कोणेषु पूजयेत् क्र
मात् ॥५॥ अष्टपत्रेषु देवेशि तथानंगादिसृजनम् ॥ मातरो भैरवैः सार्द्धं तथा पीठादिभैरवाः ॥६॥ इन्द्राद्याश्च सं
पूज्या दक्षिणाम्नायमानिताः ॥ इति षट्कूटभैरवी विधिः ॥ ईश्वर उवाच ॥ षट्कूटभैरवीवर्णान् संसृज्यौं हारक्र
मतो लिखेत् ॥ तथा संयोज्य नित्यर्थं भैरवी भयहारिणी ॥१॥ षट्कूटभैरवी चात्र विधानं सृजनादिकं ॥ पश्चिमाम्ना

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
२२

यत्सामर्थ्यगर्वितेयं स्तुरेश्वरी ॥ १ ॥ अनया सदृशी विद्या त्रिषु लोकेषु दुर्लभा ॥ इति नित्याभैरवीविधिः ॥ ईश्वर उवाच ॥
डामरेश्वरभैरव्याः कादिहित्वोत्स्तुरेश्वरि ॥ विन्दुनादकलाक्रान्तशक्तिबीजं समुद्धरेत् ॥ १ ॥ भयविध्वंसिनीनाम भैरवी
परिकीर्त्तिता ॥ उत्तराम्नायगंभीरा डामरेशी श्रस्तु जयेत् ॥ २ ॥ इति भयविध्वंसिनीभैरवीविधिः ॥ ईश्वर उवाच ॥ हंसखा
ते परे मात्म बीजं संलिख्य मंत्रचित् ॥ भयविध्वंसिनीनामभैरव्या हृदयमालिखेत् ॥ १ ॥ मध्यमं चान्तिमं चैव निधेयं भो
गमोक्षदा ॥ अघोरभैरवी देवी श्यामा मुण्डस्रगाकुला ॥ १ ॥ दक्षिणोत्तरयोः षोढा पंचमुण्डाधिवासिनी ॥ पुस्तकं स्र
क्षमालां च पाशं चैवांकुशं तथा ॥ ३ ॥ खड्गं गंडमसं चैव कपालं शूलमेव च ॥ द धन्ती परमेशानी षड्भुजैषामिव स्रज
येत् ॥ ४ ॥ इत्यघोरभैरवीविधिः ॥ ईश्वर उवाच ॥ चतुःसिंहासनसमां श्रीसंपद्भैरवीं यजेत् ॥ भयविध्वंसिनीनाम

ठा॰
राम॰
२२

© Dharmartha Trust J&K. Digitized by eGangotri

भैरवीशूर्वमालिखेत्॥१॥ आद्येतृतीयेदेवेशिवह्निबीजसमासनं। इयंसंपत्प्रदानामत्रिषुलोकेषुदुर्लभा॥२
चतुःषष्टिमहाकोटियोगिनीशासनक्षमा॥ आताम्रार्कसहस्राभावंद्यमंडलसन्तुखा॥३॥ चन्द्रखंडस्फुर
द्रत्नमुकुटाढ्याममध्यमा॥ नितंबिनीस्फुरद्रक्तवसनारक्तभूषणा॥४॥ पुस्तकंचाभयंवामेदक्षिणेत्वमा
लिकां॥ वरंवदधतीपूज्यात्रिपुरेशीवनाच्यथा॥५॥ इतिश्रीदक्षिणामूर्तिसंहितायांभैरवीवर्णनंनामत्र
योदशोऽध्यायः॥ ईश्वरउवाच॥ अथेशानेनवक्त्रेणमयाह्यापिप्रजप्यते॥ विद्यानांपंचकंदेवित्रिषुलोके
षुदुर्लभं॥१॥ वाग्भवंशिवसंयुक्तंवाग्भवंमध्यमेष्टएफ॥ हकलांतेमहेशानिशिवबीजत्रयंलिखेत्॥२॥ रे
फवामाक्षिबिंदुघटितंतृतीयकं॥ हसान्तग्रहसर्गाढ्यंविद्येकसुंदरीप्रिये॥३॥ अहस्वान्नयोजपेन्मं

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
२३

23

त्रीरवितुर्यमत्रुस्वरैः ॥ अंतःस्थसर्गमाधेहि विन्दुनादकलात्मके ॥ ४ ॥ इयं द्वितीया देवेशि सुंदरी परिकीर्तिता
केवलं वाग्भवं देवि वाग्भवं मध्यमे शृणु ॥ ५ ॥ स एव हसहस्त्रांशुर्वाग्भवेन च योजयेत् ॥ हत्रयं कला हल्लेखा श
क्तिकूटस्य शृणु प्रिये ॥ ६ ॥ चतुष्कं शिवबीजं तोरेफाद्रग्रहसर्गमत् ॥ इयं तृतीया देवेशि सुंदरी चतुरक्षरा ॥ ७
कलांते शिवयुग्मं तु तथा जीवत्रयं शिवं ॥ परया पिंडितं कुर्यात् कूटमेतित्रिधा प्रिये ॥ ८ ॥ वाग्भवे कामराजे
च शक्तिबीजे च संलिखेत् ॥ चतुर्थी सुंदरी ख्याता भोगमोक्षप्रदायिनी ॥ ९ ॥ जीवः शिवयुगं जीव इन्मा दक्का
र" शिवेंदुमत् ॥ एतदाद्यं च मध्यं च हसयुक् इन्माक्षमेंदुमत् ॥ १० ॥ अंत्यं तु सहलक्षें दुईद्याकाशपिक्षणित ए म॰
म ॥ त्रिपुरेशी मनोरेषा पंचमी सुंदरी ॥ ११ ॥ संपत्प्रदा भैरवीं वै ध्यायेत्पंचकसुन्नमं ॥ अघ्यादिस्मृजा विद्धे पाक्रिपुरेशी २३

नवेत९

© Dharmartha Trust J&K. Digitized by eGangotri

वनाच्यथा ॥ २१ ॥ इति श्रीदक्षिणामूर्त्तिसंहितायां त्रिपुरसुंदरीयजनं नाम चतुर्दशः पटलः ॥ ईश्वर उवाच ॥ अथ वक्ष्ये
महेशानि विद्याः कल्पलताः प्रिये ॥ यासां विज्ञानमात्रेण पालयंते महापदः ॥ १ ॥ श्री विद्यापारिजातेशी पंचवाणे
श्वरी तथा ॥ पंचकामेश्वरी देवी कुमारी पंच कीर्त्तिताः ॥ २ ॥ संपत्प्रदाय भैरव्या वाग्भवं बीजमालिखेत ॥ तारेण पर
या देवि संपुटीकृतमंत्रवित ॥ ३ ॥ सारस्वतोस्य ऋद्दंतो यं स्कृ ब्राह्मणी मत्र्गारीरितः ॥ दक्षिणामूर्त्तिर्जप्योस्य गायत्रं छंद उच्यते
४ ॥ पारिजातेश्वरी वाणी देवता परिकीर्त्तिता ॥ तृतीयं च बीज शक्ती च तारकं ॥ ५ ॥ कीलकं परमेशानि महासारस्वत
प्रदा ॥ षड्दीर्घस्वरसंभिन्नबीजेनांगानि विन्यसेत ॥ ६ ॥ वर्णान्विन्यसेद्देवेशी ध्यायेत सारस्वतप्रदां ॥ हंसारूढं
लसन्मुक्ताधवलांशुभवाससां ॥ ७ ॥ शुचिस्मितां चंद्रमौलिं च त्रमुक्ताविभूषणां ॥ विद्यां वीणां सुधाकुंभमस्र

द्विती पं च ३

© Dharmartha Trust J&K. Digitized by eGangotri

देवर

द॰सं॰ २४ मालांचविभ्रती ॥ ८ ॥ एवंध्यात्वाजपेन्मंत्रंरविलक्षंसमाहितः ॥ ऊनेत्सहस्रदशकंशितपद्मैःश्रसन्नधीः ॥ ९ ॥ अ
थवैदिवेशिज्ञ ऊषान्नागचंपकैः ॥ मातृकावह्निरेवयंत्रंपीठंतहृत्सपूजयेत् ॥ १० ॥ तत्रवाणीसमावाह्यपूजयेदुपचा
रकैः ॥ आदावंगानिसंपूज्यापरिवारान्समर्चयेत् ॥ ११ ॥ पार्श्वयोर्देवतायाश्चसंस्कृताशाकृतांचपजेत् ॥ प्रज्ञामेधा
श्रुतिःशक्तिःस्मृतिवागीश्वरीतिच ॥ १२ ॥ सुमतिःस्वतिरित्येतावसुपत्रेषुपूजयेत् ॥ मातरश्चदलाग्रेतुसंपूज्या
ःपरमेश्वरि ॥ १३ ॥ ईंद्रादयश्चभूविंवेपुनर्देवीसमर्चयेत् ॥ पारिजातेश्वरीविद्यादुर्लभाभुवनत्रये ॥ १४ ॥ इतिपारि
जातेश्वरीवाणीपूजनविधिः ॥ ईश्वरउवाच ॥ अथवक्ष्येमहेशानिपंचवाणेश्वरींशिवां ॥ त्रिपुरेशीतंत्रमध्येवाणाः पं॰म॰
शोक्तामयेश्वरि ॥ १ ॥ तैरेवपंचभिर्वाणैर्विद्यापंचाक्षरीमे[illegible]पंचभिसायकैर्वेत ॥ अपिरस्याश्चमदनोगायत्रंछन्द १४

उच्यते ॥ २ ॥ कामेश्वरीच वीजाद्दिदेवता चेयमीश्वरी ॥ व्यस्तैः समस्तैरंगानि वाणैः पंचभिराचरेत् ॥ ३ ॥ सर्ववत्पंचवा
णानां न्यासं कुर्याद्धि चक्षणः ॥ पंचकामांश्च विन्यस्य सर्ववत्परमेश्वरि ॥ ४ ॥ उद्यद्दिवाकराभासां नानालंकारभूषितां
॥ वंधूककुसुमाकाररक्तवस्त्रांगरागिणीं ॥ ५ ॥ इक्षुकोदंडपुष्पेषु विराजितभुजद्वयं ॥ एवं ध्यात्वा जपेन्मंत्रं वर्णल
क्षं समाहितः ॥ ६ ॥ तद्दशांसेन जुहुयाद्वंधूककुसुमैः शिवे ॥ कामेश्वरीवशंसज्यविशेषोवाणसज्जनस्य ॥ ७ ॥ त्रि
पुरेशीवशं सद्यो मोहयेज्जगतीमिमां ॥ इति पंचवाणेश्वरीयजनविधिः ॥ ईश्वर उवाच ॥ अथ वक्ष्ये पंचकामनायि
कां विश्वमातरं ॥ सर्वेषां पंचकामेभ्यः पंचकामेश्वरी भवेत् ॥ १ ॥ ऋषिः संमोहनो नाम गायत्रं छंद उच्यते ॥ द्विती
यं काममाद्यं च वीजं शक्तीतु कीलकं ॥ २ ॥ अन्यत्तत्रयं न्यसेन्मंत्री व्यस्तैश्चैव समस्तकैः ॥ अंगानि सर्ववत्कामवाणं

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ २५

25

न्यासहृद्यंयजेत ॥३॥ रक्तांरक्ताङ्गकल्पांगलेपनांरक्तभूषणां ॥ पाशांकुशौधनुर्बाणान्दधत्तकंचाक्षमालिका
म् ॥४॥ चराभीतीचदधतींत्रैलोक्यवशकारिणीं ॥ अभ्यर्च्यतसर्वश्लजनादिपंचबाणेश्वरीचतु ॥५॥ पंचकामैःपरिहृ
ताविशेषोयंनिगद्यते ॥ इतिपंचकामेश्वरीयजनविधिः ॥ ईश्वरउवाच ॥ अथवक्ष्येमहेशानिकुमारींविश्व
मातरं ॥ कामेश्वरीभगवतीत्रैलोक्याकर्षणक्षमां ॥१॥ वाग्भवंत्रिपुरेशान्याहित्वाततसंक्षिपेत्सुधीः ॥ काम
शक्तिहृद्यांतस्थंविधेयंत्र्यक्षरीभवेत ॥२॥ त्रिपुरेशीक्षमाद्यादिबीजशक्तिक्रमेणतु ॥ आद्यंतेकीलकंमध्यं(
महावश्यकरीप्रिये ॥३॥ द्विराहृत्याषडंगानिपंचबाणान्प्रविन्यसेत ॥ पंचकामांश्चविन्यस्यसकलेनव्यापकंन्य
सेत ॥४॥ कामेश्वरीमहायंत्रमध्येदेवींप्रपूजयेत ॥ विशेषंशृणुतत्रैवबाणस्थानेषुपार्वति ॥५॥ पंचकामाश्च

राम॰ २५

© Dharmartha Trust J&K. Digitized by eGangotri

पूज्याथ रत्नादित्रितयं यजेत् ॥ ततोनंगाद्यष्टकं स्याद्भैरवैः सहमातरः ॥ ६ ॥ अष्टपत्रेषु चाग्रेषु यजेत् पीठाष्टकं प्रिये
इंद्रादयश्च संपूज्या मध्ये देवीं समर्चयेत् ॥ ७ ॥ उरस्थरणाकृतं तत्र त्रिपुरेशीव सुंदरी ॥ एनां स्मरन्महेशानि मोहयेज्ज
गतीमिमां ॥ ८ ॥ उद्यत्सूर्यसहस्राभां माणिक्यवरभूषणां ॥ स्फुरद्रत्नकुंडलाढ्यां नानालंकारभूषितां ॥ ९ ॥ इ
क्षुकोदंडबाणांश्च पुस्तकं चाक्षमालिकां दधतीं चिंतयेन्नित्यं सर्वराजवशंकरी ॥ १० ॥ इति कुमारीयजनविधिः ॥
इति श्रीदक्षिणामूर्तिसंहितायां कल्पलताविवरणे नाम पंचदशः पटलः ॥ देव्युवाच ॥ पंचरत्नमहाविद्याः सूचिता
न प्रकाशिताः ॥ श्रोतुमिच्छामि देवेश कृपां कृत्वा महेश्वर ॥ १ ॥ ईश्वर उवाच ॥ सिद्धविद्यां प्रवक्ष्यामि स्मरणे नापि सि
द्धिदां ॥ कामदां मन्त्रदां नित्यं सर्वैश्वर्यप्रदां प्रिये ॥ २ ॥ शिवाग्निवामनयनबिंदुनादकलात्मकम् ॥ श्रीकामयुगलं चै

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ क्षाहृदंतेभगवत्यपि ॥ ३ ॥ माहेश्वरीचतुर्वर्णमन्त्रश्रेणींततोलिखेत ॥ चतुर्वर्णंवह्निजायान्तारायोमञ्जरीरितः ॥ ४ ॥ हि
२६ दशार्णोमहेशानीग्रातरेवसमर्चयेत ॥ अस्याःस्मरणमात्रेणपलायंतेमहापदः ॥ ५ ॥ ऋषिर्ब्रह्मास्यमंत्रस्यषष्ठीछंदो
26 भिधीयते ॥ अन्नपूर्णेश्वरीसिद्धविधेयंदेवताप्रिये ॥ ६ ॥ वीजशक्तीकीलकंचह्रह्लेखात्रिकमुच्यते ॥ षड्दीर्घस्वरसंभि
न्नांह्रह्लेखांकुरुपार्वति ॥ ७ ॥ एभिरंगानिविन्यस्यवर्णन्यासंसमाचरेत ॥ ब्रह्मरंध्रेवसीमंतेभालभ्रूमध्ययोर्नसि ॥ ८ ॥
वक्त्रेकंठेचहृदयेकुक्षिनाभिष्ठलिंगके ॥ आधारेस्फिक्द्वयेवोरुद्वयेजानुद्वयेतथा ॥ ९ ॥ पादयोर्द्वंद्वदेवेशिपदन्या
संततोपजेत ॥ नवद्वारेषुदेवेशिपदन्यासउदाहृतः ॥ १० ॥ मूलेनव्यापकंन्यासंकुर्यात्हृत्सपुटद्वये ॥ अथयंत्रंप्रव । राम॰
क्ष्यामिभोगमोक्षफलप्रदं ॥ ११ ॥ त्रिकोणंषोडशारंचततोष्टदललीरजं ॥ भूविंवंपरमेशानितारंमध्येविनिक्षिपेत ॥ १२ २६

© Dharmartha Trust J&K. Digitized by eGangotri

कोणत्रयेत्रिबीजानिशादक्षिणेपनयजेत् ॥ अथमारभ्यपूर्वादिकलापत्रेषुपूजयेत्प्रिये ॥ १३ ॥ अवशिष्टाष्टकलावर्णान्
पूर्वादिक्रमतोलिखेत् ॥ अष्टपत्राष्टपत्रेषुलिखेद्दीर्घस्वरान्प्रिये ॥ १४ ॥ एतत्पीठंसमभ्यर्च्यपूजाणावेनत्रिधाबुधः ॥ तत्रावा
ह्यानन्ददांदेवींमुद्रांसाधारणांयजेत् ॥ १५ ॥ गंधपुष्पादिभिःसम्यगभ्यर्च्यपरितोयजेत् ॥ अग्नीशासुरवायव्यमध्यादि
क्ष्वंगषड्जनम् ॥ १६ ॥ ध्यात्वादेवींसिद्धविद्यांमहाज्ञीराज्ञींदेवेबुधः ॥ रत्नद्वीपेलसत्स्वर्णशाकारभवनोज्ज्वले ॥ १७ ॥
कल्पद्रुमविशोभाढ्येसिंहासनसमन्विते ॥ उद्यत्सूर्यसमाभासांविचित्रवसनोज्ज्वलाम् ॥ १८ ॥ चंद्रचूडामन्नदा
ननिरतांरत्नभूषिताम् ॥ स्वर्णकलशाकारस्तनभारमोन्नतां ॥ १९ ॥ रुद्रतांडवसानंदांद्विभुजांपरमेश्वरीं ॥ सु
रतस्तांडवव्रोढरुद्रंसंस्मरेत्प्रिये ॥ २० ॥ द्वितीयेनतुबीजेनतृतीयेनहरिंयजेत् ॥ ब्रह्माणंतुर्यबीजेनकलापत्रे

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
२१
27

ततोयजेत ॥ २१ ॥ आदौनतत्तुरामोक्षदायिनी भयहारिणी ॥ गतिर्हंसीवराक्षीवतीर्थरूपा ततः परम् ॥ २२ ॥ मानदा
हेमदा स्वर्णदात्री रिपुनिकृंतिनी ॥ अनर्थध्वंसिनी देवी नयनानंददायिनी ॥ २३ ॥ शतशर्न्निक्रमेण श्रीचस्वामिनी
हारसुंदरी ॥ षोडशांते तन्त्रश्रर्णायै नमस्कारक्रमेण तु ॥ २४ ॥ वर्णदेवीः समभ्यर्च्य वस्तुपत्रं ततो यजेत ॥ ब्राह्म्यष्टके
न देवेशि चतुरस्रं ततो यजेत ॥ २५ ॥ लोकपालैः पुनर्देवीं गंधपुष्पादिभिर्यजेत ॥ लक्षं जपेत्सुनियमो दशांशं होमयेत
२६ ॥ रम्भपायससर्पिभ्यां सिद्धिदा भवति ध्रुवं ॥ इति ते कथिता सिद्धविद्यान्नफलदायि(नी) ॥ २७ ॥ इति श्रीदक्षिणामूर्ति
संहितायामन्नपूर्णायजनं नाम षोडशः पटलः ॥ ईश्वर उवाच ॥ अथातः संप्रवक्ष्यामि मातंगीरत्नदेवतां ॥ वाग्भवं
कामराजं च सर्गवान् ध्रुवमन्नमे ॥ १ ॥ अनुग्रहेण संपृक्तः पुनरायं परां लिखेत् ॥ श्रीवीजं तारकं चैव नमो भगवती ति

राम॰
२१

© Dharmartha Trust J&K. Digitized by eGangotri

व ॥ २ ॥ मातंगेश्वरी सर्वांतिमनोहरि जनादिकम् ॥ सर्वराजवशंवांतेकरि सर्वसुखांतिके ॥ ३ ॥ रंजनीतितत: सर्वस्त्रीश
दृंखततोवदेत् ॥ उरुषांतेततश्चोल्कावशांते सर्वदुष्टंच ॥ ४ ॥ मृगांतेवशमालिख्य सर्वलोकपदं वदेत् ॥ कार्यादिवश
मालिख्य करिशद्वंततोलिखेत् ॥ ५ ॥ परां श्रीयं कामवीजं वाग्भवं च ततो लिखेत् ॥ सप्तति स्वत्रयो वर्णा मातंगी विग्रहा
श्रिये ॥ ६ ॥ इयं मातंगविद्यानां राज्ञी मोक्षार्थसिद्धिदा ॥ ऋषिर्मतंगो भगवान् गायत्रं छंद उच्यते ॥ ७ ॥ देवतानादस्र(
र्तिर्क्ष्मा मातंगी परमेश्वरी ॥ कामवीजं वाग्भवं च वीजं शक्तीच कीलकम् ॥ ८ ॥ तार्त्तीयं देव देवेशि षडंगान्य यविन्यसेत्
आद्य वीजत्रये पैएैवह्निरा हृत्याषडंगकं ॥ ९ ॥ आभोजार्पितदक्षांघ्रि क्रोमां ध्याये न्मतंगिनीं ॥ कण द्वीणालसन्ना
दश्च्छायां दोलितकुंडलां ॥ १० ॥ दंतपत्र शुभारम्यां शिवां सर्वांगसुंदरीं ॥ क्रादंवसुंड दामाढ्यां वेणवादनतत्परां ॥ ११

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
२८

28

शांभगौरीशं स्वबलयोध्यायेत्सर्वार्थसिद्धये ॥ अथ यंत्रं प्रवक्ष्यामि त्रिकोणं पंचकोणकं ॥ १२ ॥ वसुपत्रं कलापत्रं चतुर्द्दि
लं ॥ चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत् ॥ १३ ॥ आवाह्य देवतां सम्यगुपचारैः समर्चयेत् ॥ अग्नीशासुरवायव्यमध्यदि
क्ष्वंगपूजनं ॥ १४ ॥ अथ वक्ष्ये महेशानि चतुरस्रस्य पूजने ॥ अग्रद्वारि चतुर्द्दिक्षु प्रादक्षिण्येन पूजयेत् ॥ १५ ॥ सरस्वतीं च
लक्ष्मीं च शंखपद्मनिधी प्रिये ॥ विडुं दिक्षु वामभागादि प्रादक्षिण्येन पूजयेत् ॥ १६ ॥ वटुकं गणराजं च क्षेत्रपालं च यो
गिनीः ॥ ततश्चतुर्द्दलायादि सिद्धमातंगिनीक्रमात् ॥ १७ ॥ महालक्ष्मीमयीं सिद्धलक्ष्मीमातंगिनीं यजेत् ॥ महामातं
गिनीं देवि प्रादक्षिण्येन पूजयेत् ॥ १८ ॥ अष्टपत्रे महेशानि त्वसितांगादिभैरवः ॥ असितांगो रुरुश्चंडः क्रोधश्चोन्मत्त
भैरवः ॥ १९ ॥ कपाली भीषणश्चैव संहारश्चाष्टभैरवाः ॥ प्रादक्षिण्येन देवेशि पुरश्चारभ्य पूजयेत् ॥ २० ॥ वामाज्येष्ठाचरौ

राम॰
२८

© Dharmartha Trust J&K. Digitized by eGangotri

ह्रीवशांतिःश्रद्धाचपंचमी॥वागीश्वरीक्रियाशक्तिर्लक्ष्मीःपुष्टिस्तथैवच॥२१॥मोहिनीप्रमथाश्वानीवीचीवेविंड
मालिनी॥सुरानंदानागबुद्धिरेताःषोडशकीर्तिताः॥२२॥उरश्चारभ्यदेवेशिप्रादक्षिण्येनपूजयेत॥षोडशारेततो
देविलक्ष्मीश्चैवसरस्वती॥२३॥रतिःप्रीतिःकीर्तिःशांतिस्तुष्टिःपुष्टिश्चपूर्ववत॥पत्रांतरेणदेवेशिमातृणांचाष्टकं
यजेत॥२४॥पूर्ववत्पंचपत्रेषुद्राविणीशोषिणीतथा॥स्तंभिनीमोहिनीचैवतथाकर्षकारिणी॥२५॥त्रिकोणेपिहिदेवेशि
यजेदग्रेपिपूर्ववत॥प्रादक्षिण्येनमंत्रविद्रतिप्रीतिमनोभवाः॥२६॥पुनःसंपूज्यदेवेशीमर्वोपस्कारकैःप्रिये॥उरश्चरण
कार्यंतुलक्षत्रयमुदाहृतं॥२७॥प्रवालमालयादेवितद्दशांशेनहोमयेत॥मधूकक्षुमसुमैर्मंत्रीत्रिकोणेकुंडकेशुचिः
२८॥एवंसंसिद्धमंत्रस्तुसर्वकर्माणिसाधयेत॥राज्यार्थीमल्लिकाजातीपुन्नागैःश्रीफलच्छदैः॥२९॥श्रीकामुचाशु

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ अपध्नेः पंकजैर्वापि स्तुव्रते ॥ उत्पलैर्भोग कामस्य लक्ष्मीपुष्टै अश्नुते ॥ ३० ॥ जपावंधूकवज्रालकिंशुकैर्वश्यकारि

१९ णी ॥ वश्यार्थी मधुसंयुक्तैर्मधूकक्कास्तु मेरुं नेत् ॥ ३१ ॥ आकर्षणे तिलवणातिलैस्त्रिमधुसंयुतैः ॥ वंजुलैर्वृष्टिकामस्य

२९ स्वर्जुरैश्च गुडूचिभिः ॥ ३२ ॥ आयुकामस्य दूर्वाभिर्धनार्थी हेमपुष्पकैः ॥ काश्यकर्दवक्कास्तु मेर्धान्यार्थी धान्यतंडुलैः

३३ ॥ साज्यान्नैरन्नकामस्य वश्ये कुंकुमरोचनैः ॥ गंधद्रव्यैरस्य सौभाग्यं नंघावर्तैस्स्य वाङ्मये ॥ ३४ ॥ कारिपुष्पैः संपद

र्थी पालाशैस्तेजसे हुनेत् ॥ कापिलेन घृतेनाथ तेजस्वी हवनाद्भवेत् ॥ ३५ ॥ उन्मादकरो होमः उन्मत्तकास्तु मे भवेत्

। विषवृक्षैश्च निर्वैरं श्लेष्मांतक विभीतकैः ॥ ३६ ॥ उल्लूकाकध्वांक्षकैस्स्य निंबतैल परिप्लुतैः ॥ होमयेद्रिपुनाशाय न राम॰

वास्ते वह्निकुंडके ॥ ३७ ॥ यमाशाभिमुखो नग्नो शत्वा हष्टिमलीमसः ॥ उच्चाटनं वायुभागे विदेषो राक्षसो भवेत् ॥ ३८ १९

© Dharmartha Trust J&K. Digitized by eGangotri

इंद्राग्नेयविभागेपिशांतिकेप्राङ्मुखोभवेत् । पश्चिमेस्तंभनंचोक्तमुत्तरस्यांतुदेशिकः ॥ ३९ ॥ साधयेत्सर्वकर्माणियोषि
कादीनिसाध्यकः ‴ पायसैर्गुडखंडैश्चक्रुसीदेकुरसैरपि ॥ ४० ॥ पित्तशांतिकरोहोमस्तन्यंकेवलमेववा ॥ उन्मादना
शनंचूर्णंपायसंघृतसंयुतं ॥ ४१ ॥ मरीचतिलतैलाक्तंकासश्वासहरंभवेत् । निर्गुंडीमूलहोमेनवातदोषविनाशनम् ॥
४२ ॥ मृएवथाकर्षणंशीघ्रमाकृतिश्चितयंजुतः ॥ जीवन्यासंततःकृत्वामृदावक्त्रिंटहेतथा ॥ ४३ ॥ मज्जच्छिष्टेनचान्या
पिलवणेनापिपुत्रिकाम् ॥ कृत्वातन्नामसंकल्पमुद्रांयाकुंडकेन्यसेत् ॥ ४४ ॥ सप्तांगुलमधःपश्चात्यावणीमेखलाद्वि
ताम् ॥ लंबयेदूर्ध्वतःपश्चाद्दृढमाक्षिकसंभवां ॥ ४५ ॥ लवणंपेष्यमधुनालावण्याहोमयेत्सुधीः ॥ आरभ्यदक्षिणंपादं
वामपादावधिप्रिये ॥ ४६ ॥ मनुजानामयंहोमस्त्रीणांदेविविपर्ययः ॥ सप्तरात्रान्महादेविकृष्यंतितिविरहातुराः ॥ ४७ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

पतंतिसाधकस्यांकेभयलज्जाविवर्जिताः॥ लवणंनिंबतैलेनहोमयेच्छत्रुनाशने॥४८॥ हरिद्राचूर्णसंयुक्तंलवणंस्तंभने
ऽर्पयेत्॥ सर्वाह्नोश्शर्वरात्रेचशुभार्थंचयजेद्बुधः॥४९॥ मध्याह्नेमध्यरात्रेचकुर्याज्जप्यादकादिकं॥ मातंगीविग्रहोभूत्वासर्वक
र्माणिसाधयेत्॥५०॥ आवेशनंततःकुर्यात्कन्यानांसंनिधौसुधीः॥ कन्याश्चजावकर्त्तव्यायोगिनीनांविशेषतः॥५१॥ अ
ष्टाष्टकंसमभ्यर्च्यमातंगीत्वभिकांतस्सुधीः॥ बलिंनिवेदयेत्पश्चान्मातंग्याश्चवरानने॥५२॥ दिक्षिशक्तिनमश्चांतेभगव
त्यपिसंलिखेत्॥ आनयेतिचसंयुक्तंद्विठांतोमंत्रउच्यते॥५३॥ अनेनबलिदानेनस्यान्मातंग्याःसिद्धिहेतवे वडुकादि
बलिंसन्नद्धत्समभ्युक्षिप्यमांत्रिकः॥५४॥ साधयेत्सर्वकर्माणिमातंग्याश्चप्रसादतः॥ इतिश्रीदक्षिणामूर्त्तिसंहितायां
मातंगीश्वरीरत्नयजनंनामसप्तदशःपटलः॥ ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिभुवनानंदमंदिरं॥ यस्याविज्ञानमात्रेण

© Dharmartha Trust J&K. Digitized by eGangotri

पलायंते महापदः ॥ १ ॥ शिवं वह्निसमारूढं वामाक्षिपरिभूषितं ॥ विंदुनादकलाक्रांतं विद्येयं भुवनेश्वरी ॥ २ ॥ ऋषिशक्ति
र्वसिष्ठस्य स्तुतश्छंदोत्र कथ्यते ॥ गायत्री देवता बोधवा विसंवित्कलापरा ॥ ३ ॥ शिवतुर्य्यं बीजशक्तिः कीलकं रेफ उच्यते ॥
ददाति भुवनेशानी पुरुषार्थचतुष्टयं ॥ ४ ॥ अनंतरामनेत्राभ्यां वामश्रुत्याधरेण च ॥ अनुग्रहविसर्गाभ्यां विद्यांसंमेघम
र्ववित् ॥ ५ ॥ षडंगानि च विन्यस्य हृल्लेखादिमनुं न्यसेत् ॥ क्षकाराद्यं णपर्यंतं विपरीतक्रमेण च ॥ ६ ॥ मातृकां संहरेत्स्व
हृद्वर्गं वर्गविलोमतः ॥ गुरूपदेशविधिना विलोमस्वरमार्गतः ॥ ७ ॥ संहारमातृकान्यासो ब्रह्मानंदरसोज्ज्वलः ॥ एवं कृत्वा
ततो मंत्री षडंगै रंगुलीर्न्यसेत् ॥ ८ ॥ पुनरंगानि विन्यस्य चिदानंदेन तेजसा ॥ काशपहृदुह्यपादेषु न्यसेत्पंचपरेश्वरी ॥ ९ ॥
हृल्लेखां गगनां रक्तां चतुर्थीं च करालिकां ॥ महोच्छुष्मांश्च विन्यस्य तिस्रः शक्तीश्च विन्यसेत् ॥ १० ॥ गायत्रीं चैव सावि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ त्रींतृतीयांचसरस्वतीं ॥ कंठेवामस्तनेदक्षस्तनेदेवत्रयंततः ॥११॥ ब्रह्मविष्णुशिवाख्यंचवामांसेहृदयेतथा ॥ दक्षांसेचततो
३१ न्यासंमातृणांविन्यसेत्प्रिये ॥१२॥ ललाटेंसेवामभागेपार्श्वेकुक्षौचदक्षिणे ॥ कुक्षौपार्श्वेचमकेस्वांतेशूलेनव्याप
कंन्यसेत् ॥१३॥ पाशांकुशवराभीतिमुद्रासन्नद्धविग्रहः ॥ कुंकुमादिभिरत्युच्चैःस्वद्रव्यैर्विलिखेत्पटे ॥१४॥ स्ववर्णगौरो
31 प्यतांप्राग्दिशिचितैरैंशिकोणेनमः ॥ इंद्रराक्षसवायव्येरेखाभिर्वह्निमंडलम् ॥१५॥ तन्मध्येसाध्यनामांकशक्तिंसंलिख्य
मांत्रिकः ॥ ठकारवेष्टितंकृत्वाकोणाग्रेषुपरांलिखेत् ॥१६॥ स्थानत्रयेपिवंधस्तत्कथ्यतेसिद्धिदायकः ॥ तद्बीजत्रयरे
फांयंचादक्षिणेपनवेष्टयेत् ॥१७॥ इष्टतत्त्रितयंचास्यमायाग्रेणचवेष्टयेत् ॥ अन्योन्यकालपारम्यशक्तिंवंधवदाह राम॰
तः ॥१८॥ त्रिकोणस्यांतरालेषुवामनेत्रंसबिंदुकं ॥ प्रत्येककोणपार्श्वेषुहर्षणंचहराक्षरं ॥१९॥ पुनरेतद्वयंमध्ये ३१

© Dharmartha Trust J&K. Digitized by eGangotri

त्उर्यंचसविसर्गकं ॥ इत्यर्णैर्विशुद्धयेद्ध्यात्वाहस्तृतं क्षत्वावहिस्ततः ॥ २० ॥ पद्मंविरच्यवस्त्वग्रं केसरस्थानकेपुनः हर्यर्णैंवह
रार्णैंचलिखेत्तज्ञातिदलंसुधीः ॥ २१ ॥ एतत्त्रिगुणितंयंत्रं वहिपारयर्णवेष्टितं ॥ कामदंमोक्षदंरम्यं सर्वैश्वर्यप्रवर्त्तक
म ॥ २२ ॥ अस्मिन्संपूजयेत्पीठशक्तीः सर्वार्थसिद्धये ॥ जयांचविजयांचैवअजितांचापराजितां ॥ २३ ॥ नित्यांविलासि
नीदोग्ध्रीमघोरांसर्वमंगलां ॥ अभ्यर्च्यपरितःपीठंनंदिनंपीठमूलगम् ॥ २४ ॥ ध्यात्वाकुंडलिनीरूपांसुघघ्नांस्ववत्स
मुद्युतिम् ॥ पाशांकुशवराभीतिचतुर्वाहुंत्रिलोचनां ॥ २५ ॥ ध्यात्वावाहयेयजेद्देविंउपचारैर्मनोहरैः ॥ आवाहनादिमु
द्राश्चदर्शयेद्देशिकोत्तमः ॥ २६ ॥ अग्नीशासुरवायव्यमध्यदिक्षंगपूजनं ॥ पूजयेद्देशिकवरोभोगांगंभोगसिद्धये ॥ २
उऊऋॠगजडंवर्णादवलास्ताःस्मृपार्थिवाः ॥ अइओंघफठावर्णाधमवाःसम्बंनीरजाः ॥ २८ ॥ इईएखछढाथस्वफ

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ रक्तावह्निसंभवाः ॥ अअआएकवदास्तत्रयपयशाषश्च वायुजाः ॥ २९ ॥ ल्वल्हंत्रं उजणानस्वमसहानामसामताः ॥ उ
३२ वैंद्रयाम्यसोम्यादिग्भ्रतपत्रपरिशजयेत् ॥ ३० ॥ वर्णान्समाहितोमंत्री हल्लेखाद्यंततः परम् ॥ पंचकं शजयेन्नेत्रुस्थानेषु नि
जसिद्धये ॥ ३१ ॥ ऐंद्रनैर्ऋत्यवायव्यकोणेषुक्रमतोयजेत् ॥ गायत्र्यादित्रयंपश्चाद्ब्रह्मादित्रयमर्चयेत् ॥ ३२ ॥ आग्नेयवा
32 रुणेशानदिक्षुपूज्यास्ततः परं ॥ दलेषुमातरः शून्यालोकपालार्चणं ततः ॥ ३३ ॥ इति भुवनेश्वरीत्रिगुणितयंत्रोद्धारः
ईश्वर उवाच ॥ अथातः संप्रवक्ष्यामि यंत्रं षड्गुणितं प्रिये ॥ यस्यविज्ञानमात्रेण सर्वसिद्धीश्वरो भवेत् ॥ १ ॥ उदितं वह्नि
मालिख्यमध्ये शक्तिं नियोजयेत् ॥ तद्वह्निरेफरा --- साध्यनामाक्षरं लिखेत् ॥ २ ॥ तन्तुर्यस्वरभागे तु साधकस्य व राम॰
शं कुरु ॥ साध्यस्योपरि संस्पृष्टं विलिखेत्सर्वसिद्धये ॥ ३ ॥ ठकारवेष्टितं कृत्वा वहिः शक्तिं तु पंचधा ॥ विलिख्य तद्वहिस्त ३२

© Dharmartha Trust J&K. Digitized by eGangotri

द्वक्षीवीजंकामवीजकं ॥ ४ पंक्तिशःपंचधालेख्यततःषट्कोणसाधनं ॥ षट्कोणषट्कोपिवामनेत्रंसविंदुकम
५ ॥ षट्कोणसंधिषुपुनःशक्तिवीजंसमालिखेत् ॥ शर्ववर्छक्तिवंधक्मकार्यःसंस्पर्शवर्जितः ॥ ६ ॥ ऊर्ध्वकोण
त्रयस्यांतरालेषुविलिखेद्बुधः ॥ साधकस्यसविंदूनिनामार्णानिततःपरं ॥ ७ ॥ शक्तिश्रीकामवीजानिलिखेत्तत्रैवदे
शिकः ॥ अधःकोणत्रयस्याथत्वंतरालेषुमंत्रवित् ॥ ८ ॥ साध्याक्षराणिशक्तिश्रीकामवीजानिवक्रमात् ॥ सविस
र्गाणिसंलेख्यविदर्भयुतस्तसेवकः ॥ ९ ॥ कोणपार्श्वेषुसर्वत्रहरिवर्णहराक्षरैः ॥ विलिख्यचततोवाह्यवृत्तंशैर्ग
डुवतक्रमात् ॥ १० ॥ अनुलोमेनतद्वृत्तमध्येपंचाशदक्षरा ॥ तद्वृत्तवाह्यतस्तद्वद्विलोमेनचमातृका ॥ ११ ॥ विज्ञेयावे
ष्टनेदेवितितोभूपुगलंलिखेत् ॥ संपुटत्वेनदेवेशिवसुकोणंततोभवेत् ॥ १२ ॥ महादिक्कुद्वीसिंहस्यवीजमंत्रंसमालि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ खेत॥ह्रौंमात्मकंचटसिंहस्यबीजंजानीहिपार्वति॥१३॥रक्तमातृत्रिपरादेविमन्त्रस्वरविभूषिताः॥विंदुनादक
३२ लाक्रांतोऽयंचिंतामणिःप्रिये॥१४॥कोणेषुविलिखेन्मंत्रीततस्तत्कोणसंधिषु॥विलिखेत्त्रिशूलान्षण्णांवेस्त
तःपद्मंसमालिखेत्॥१५॥दलेद्वादशभीरम्यंराशिवर्णपरिच्छिन्नमितं॥एतत्षड्गुणितंयंत्रंसर्वैश्वर्यप्रवर्तकम्॥
१६॥तत्रपीठंसमभ्यर्च्यसम्भावाह्यचपूर्ववत्॥उपचारैर्गन्धपुष्पैर्धूपदीपमनोभवैः॥१७॥आवाहनादिमुद्राश्चदर्शे
यित्वार्चनंयजेत्॥षट्कोणाग्रेषुनैर्ऋत्यवायुमध्येषुदिक्षुच॥१८॥षडंगावरणंकुर्यात्द्वितीयावरणंततः
ब्रह्मणासहगायत्रीसावित्रीविष्णुनासह॥१९॥सरस्वतीशिवेनैवश्रीस्तथाधनदेनच॥मदनेनरतिःऽश्विर्गी राम॰
णपेनसमर्चयेत्॥२०॥षट्कोणपूर्वकोणादिप्रादक्षिण्येनसंजपेत्॥रक्तानंगादिकामस्तुमातृतीयाकामस्तुमातृ ३२

रा ॥ २१ ॥ नित्यानंगादिमदनाषष्ठीतुमदनातुरा ॥ गौरीवगगनादेवीतथागगनवेगिनी ॥ २२ ॥ पद्माभयघ्नमथनीत
थाचशशिशेखरा ॥ एताद्वादशपत्रेषुपूर्वादिक्रमतोयजेत् ॥ २३ ॥ चतुर्द्दलानिसंतप्यज्यदिक्कुञ्जाहम्पादिकायजेत
भूर्टहेलोकपालोश्चएतत्षट्गुणितंप्रिये ॥ २४ ॥ वागादिसिद्धयःसर्वाजायंतेसाधकस्यतु ॥ भुवनाराध्यनैवेद्यभु
वेश्वराराधनैःपरा ॥ २५ ॥ इतिभुवनेश्वरीषड्गुणितयंत्रोद्धारः ॥ ईश्वरउवाच ॥ अथार्कगुणितंवक्ष्येयंत्रंसर्वोत्तमो
त्तमं ॥ यस्यविज्ञानमात्रेणभुवनाधीश्वरोभवेत् ॥ १ ॥ षट्कोणंपूर्ववद्भूत्वात्वन्यत्तत्संधिभेदतः ॥ षट्कोणांतरसंभूता
द्यंभवेद्द्वादशकोणकम् ॥ २ ॥ तन्मध्येशक्तिमालिख्यपूर्वोक्तेनविधानतः ॥ ठकारमध्येतद्बाह्येवेष्टयेत्सप्ततिलो
मतः ॥ ३ ॥ सम्यग्व्याहृतिभिर्मंत्रीततःषट्कोणसंधिषु ॥ विलिख्यभुवनेशानींद्वादशस्थानसंस्थितां ॥ ४ ॥ पूर्ववक्त्र

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ त्रिवंधंतत्कुर्यात्द्वादशधाप्रिये॥ एकैकांतरितंकुर्वन्मनोज्ञंमंडितंक्रमात्॥५॥ इमात्मकंद्वादशारेस्मविंदुंतुर्यमालि
३४ खेत्॥ तद्धैरविकोणेषुसर्वकामार्थसिद्धये॥६॥ अथद्वादशकोणस्यसंधिबीजांतरालतः॥ स्थलानिविलिखेन्मंत्री
34 ततःकोणकपोलयोः॥७॥ एकैकस्यचकोणस्यगायत्रीचसमालिखेत्॥ तत्पदंसवितुर्वरेणीयंरेवक्रमालिखेत्॥८
भर्गोदेवस्यधीचोत्काधीयोयोनःप्रचोदयात्॥ एतदष्टाक्षरंदेविमह्यादिपरिकीर्तितं॥९॥ चतुर्विंशत्यक्षरेयंगायत्री
वेदमातृका॥ द्वंद्वशोविलिखेद्वर्णान्गायत्र्याश्चविलोमतः॥१०॥ तद्वहिःकोणपार्श्वेषुविलोमाग्नेयमन्मनुं॥ प्रणवं
भूर्भुवःस्वोग्निर्लिखेद्देवतत्षडक्षरं॥११॥ जातवेदइहालेख्यवहमर्वचतुष्टयं॥ कर्माणिसाधयस्वाहाविद्याग्नेयमप्रड गम॰
र्लभा॥१२॥ लिखेन्नतःपरंदेविसर्वकार्यार्थसिद्धये॥ अनुलोमांविलोमांचमातृकांवेष्टयेत्ततः॥१३॥ भूपुरंसर्वबही ३४

© Dharmartha Trust J&K. Digitized by eGangotri

जमंडितं समालिखेत्ततः ॥ तद्बहिस्त्वकलापत्रं द्वात्रिंशत्कोसराञ्चितं ॥ २४ ॥ महार्कउणितं देवि निगमागममंदिरे ॥ पूर्वव
त्पीठमभ्यर्च्य देवीमावाह्य पूर्ववत् ॥ २५ ॥ परिवारार्चणं कुर्यादादावंगार्चणं प्रिये ॥ हृल्लेखापंचकं वर्णसहितं पूर्वव
द्यजेत् ॥ २६ ॥ ब्रह्मादिष्ठगषट्कं तु पृथग्द्वादशधा यजेत् ॥ कोणेषु पूर्वकोणादि कलास्वाणि ततो यजेत् ॥ २७ ॥ कराली
विकराली च तथोमा च सरस्वती ॥ दुर्गा शची त्वषाल क्ष्मीः श्रुतिः स्मृतिर्धृतिस्त्रयं ॥ २८ ॥ श्रद्धा मेधा कृतिः कांतिरा
र्या षोडश कीर्तिताः ॥ पूर्वादिक्रमतः सज्ज्यादलाग्रेषु च संधिषु ॥ २९ ॥ श्रीर्ह्रीः पुष्टिः प्रज्ञा चैव शिनी बाली कुं रुस्त रु
था ॥ रुद्रा वीर्या प्रभानंदा पोषणी ऋद्धिदा तथा ॥ ३० ॥ कालरात्रिर्महारात्रिर्भद्रकाली कपालिनी ॥ विकृतिर्नंदि
नी चैव मुंडिनी च ततः परं ॥ ३१ ॥ इंदुखंडा शिखंडिन्यो निशुंभमथनी तथा । मर्द्दिनी महिषासापितथेंद्राणित

© Dharmartha Trust J&K. Digitized by eGangotri

दे॰सं॰ तःपरं ॥ २२ ॥ रुद्राणी शंकरार्द्धा दिशरीरिण्यपि कीर्त्तिता ॥ नारी नारायणी चैव त्रिशूलिन्यपि पालिनी ॥ २३ ॥ अंबिकाङ्का
३५ दिनी ज्ञेया द्वात्रिंशच्छक्तिमंडलं ॥ तद्बहिः पिंगलाक्षी च विशालाक्षी ततः श्रिये ॥ २४ ॥ समृद्धिर्वृद्धिर्वसुधा स्वाहा [illegible]
35 तथैव च ॥ नित्या च संधरा चैव धात्री त्रैलोक्यधर्षिका ॥ २५ ॥ गायत्री चैव सावित्री तथा च त्रिदशेश्वरी ॥ सुरूपा च बहुरूपा च
तथा चैव ऊर्ध्वरूपिका ॥ २६ ॥ स्कंदमाता च्युता जीतिर्विमला चामला तथा ॥ अरुणी त्वारुणी चैव प्रकृतिर्विकृतिस्तथा
॥ २७ ॥ सृष्टिस्थितिः संहृतिश्च संध्या माता सती तथा ॥ हंसी च मर्हिका वज्री परा देवादिमातृका ॥ २८ ॥ तथा भगवती चैव
देवकी कमलानना ॥ त्रिमुखी च तथा सप्तमुखी देशिकवंदिते ॥ २९ ॥ सुरासुरादिसहितमर्दिनी च ततः परं ॥ लं रामं॰
बोष्ठी चोर्द्ध्वकेशी च बहुशिना वृकोदरी ॥ ३० ॥ वृषोदरी तथा रेखा रथा दिः शशिरेखिका ॥ अपरागमनाद्य वेगा ३५

© Dharmartha Trust J&K. Digitized by eGangotri

पवनवेगिका ॥३१॥ तथा भुवनपाला च तथा च मदनातुरा ॥ अनंगानंदगमना तथानंगादिमेखला ॥३२॥ अनंगकुसु
मा चैव विश्वरूपा भयंकरी ॥ अस्तुराणी तथा क्षोभ्या तथा चैव सत्यवादिनी ॥३३॥ वस्तुरूपा तथा चैव शुचिदत्ता परे
श्वरी ॥ वरदा चैव वागीशी चैताः शक्तीस्तु पूजयेत् ॥३४॥ यादक्षिणप्रहृदये नैव सर्वकामार्थसिद्धिदाः ॥ चतुःषष्टिम
हाशक्तिपूजनं कथितं तव ॥३५॥ तद्बलिर्लोकपालांश्च शक्तींश्च पूजयेत्सुधीः ॥ पुनर्देवीसमभ्यर्च्य नैवेद्यादिसम
र्पयेत् ॥३६॥ इति ते कथितं सम्यग्देवानामपि दुर्लभं ॥ इति श्रीदक्षिणामूर्तिसंहितायां भुवनेश्वरीद्वादशगुणि
तयंत्रोद्धारकथनपूजाविधिर्नामाष्टादशः पटलः ॥ ईश्वर उवाच ॥ भुस्वहूत्तं विन्दुनादकलाढ्यं पाश उच्यते ॥ कामा
ग्नितारसहितमंकुशं विद्धि पार्वति ॥१॥ एतन्मध्यगता विद्या यद्वा शक्त्या सुरेश्वरी ॥ अक्षराद्यपंचार्णताभ्यां संपुटि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
३६
30

तांश्रिये ॥ २ ॥ तदा यदार्गलोद्धारः कथ्यते ऽतिदुर्लभः ॥ येनानुष्ठितमात्रेण त्रैलोक्याकर्षणं भवेत् ॥ ३ ॥ संप्रदायेन देवेशि श्री
गुरोः कृपयान्वितः ॥ सम्यक् शास्त्रेण रचयेत् स्तु हृत्पद्मेऽत्यनुत्तमम् ॥ ४ ॥ ततोऽक्षविंबयुगलं संपुटीकृत्य योजयेत् ॥ अष्टकोणं तथा
देवि जायते दिङ्मनोहरम् ॥ ५ ॥ अष्टदिक्षु तदंशाग्रे रेखां आक्रम्य मांत्रिकः ॥ रेखाग्रे चार्गलं देवि जायते ऽतीव सुंदरं ॥ ६ ॥ ए
केनैव तु मानेन रचयेदर्गलाष्टकं ॥ वृत्तं तदग्रे चंद्रस्य बिंबं वृत्तं च येद्बुधः ॥ ७ ॥ पुना रेखाः समाकृष्य पूर्ववद्यंत्रमुत्तमं ॥ विरच्य
साधकेंद्रः स्कंधस्तु कोष्ठयुग्मं क्रमात् ॥ ८ ॥ यंत्रं यथा भवेद्देवि कोणं चैव स्तु द्वयं ॥ अर्गलानि च रम्याणि यथा सम्यग्भवंति हि
॥ ९ ॥ तथा कार्यं महेशानि त्रैलोक्याकर्षणं भवेत् ॥ शक्तिवीजं साध्य नाम साधकेन च साधितं ॥ १० ॥ पाशांकुश महावीज
युग संपुटितं यजेत् ॥ कर्णिकायामथ यंत्रे संलिखेत् साधकोत्तमः ॥ ११ ॥ अष्टकोणेषु विलिखेत् षडंगानि यथाक्रमं ॥ अ

राम॰
३६

स्रा ३

© Dharmartha Trust J&K. Digitized by eGangotri

मीशास्तु रवायव्य कोणेषु भमस्तु विन्नमः ॥ १२ ॥ कवचांतानि संलिख्य मध्ये नेत्रं यजेद्बुधः ॥ चतुर्द्दिग्गतकोणेषु चतुर्द्धास्त्रं
लिखेत्तथा प्रिये ॥ १३ ॥ हृतादि वस्तुकोणांतं लिखेद्धस्त्वर्गलोत्तुच ॥ बीजहंदं महेशानि संप्रदायक्रमेण हि ॥ १४ ----
---- शक्तिपरित्यज्य तत्र भूषितं तु ततः ॥ तद्बीजं स्वरसंभिन्नं क्षकारं ल्लं विवर्जितं ॥ १५ ॥ एवं द्वादश धा तत्र चतुर्द्वा
रुत्तस्तु हरि ॥ आद्यानि कं पूर्वमुखं लिखेदुत्तरतः सुधीः ॥ १६ ॥ द्वितीयं पूर्वमुखं तु लिखेदुत्तरतः सुधीः ॥ तृतीयं पश्चि
मे भागे तथा दक्षिणतो लिखेत् ॥ १७ ॥ चतुर्थमर्गलं तद्वत् पश्चिमे तत्त्वरांतिकम् ॥ अयं हित्वार्कबीजानां तत्र वा शुं नियो
जयेत् ॥ १८ ॥ अथार्गलाभ्यां चितयमाद्यं पूर्वतस्त्वा लिखेत् ॥ तथा पश्चिमतोप्यन्यत्त्रिकं संलिख्य मांत्रिकः ॥ १९ ॥ म
स्तेर्गलिके तद्वल्लिखेत्पश्चिमतस्त्रिकम् ॥ सर्वतोपि वदेवेशि सर्वकार्यार्थसाधकः ॥ २० ॥ यमार्गला यां देवेशि कथ

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ पामिवराननेने ॥ वाउंहित्वार्कवीजानिवस्तणां तत्रनिक्षिपेत ॥ २१ ॥ सर्वतोप्यादिचितयंद्वितीयंपश्चिमांतगं ॥ अथो
३७ त्तरार्गलायांचलिखेतपश्चिमतः सुधीः ॥ २२ ॥ चतुर्थंसर्वतोदेवियुक्तमार्गेणसुंदरि ॥ नीरंहित्वार्कवीजानांरेफंतत्र
37 विनिक्षिपेत ॥ २३ ॥ लिखेद्दक्षोर्गलायांतुत्रिकमाद्यंत्रिकंपरं ॥ दक्षिणोत्तरतोमंत्रीक्रमाद्वैवार्गलिषुनः ॥ २४ ॥ आ
दावुत्तरतोदेविपश्चाद्दक्षिणमार्गतः ॥ अजराष्टसुकोष्ठेषुकेसराख्येषुसंलिखेत ॥ २५ ॥ पाशंश्रीभुवनेशानीका
मवीजचतुष्टयं ॥ विपरीतंचमंत्रज्ञोवस्तवर्णमिदमालिखेत ॥ २६ ॥ अंत्यपाशंपरित्यज्यक्रोणिंसंयोज्यसाधकः ॥
तद्वहिर्वसुकोणेषुविलिखेत्तुक्रमेणच ॥ २७ ॥ अष्टवर्णान्सर्वरूपानपराह्केसरेषुच ॥ अंतकोष्ठस्वरूपेषुचंड राम॰
कात्यायनीमनोः ॥ २८ ॥ शक्तिगौरीत्रिकंरुद्रदयितेपंचवर्णकं ॥ योगेश्वरीसमालिख्यकवचा~~द्ध्याममेव~~रस्त्राग्नि ३७

© Dharmartha Trust J&K. Digitized by eGangotri

वल्लभा ॥ २९ ॥ चंडकात्पापिनीदेवीत्रिषुलोकेषुदुर्लभा ॥ अथातःसंप्रवक्ष्यामिवहिरस्येववेष्टनं ॥ ३० ॥ हंसःपदंवामने
त्रंविंदिंडपरिभूषितं ॥ उनर्हंसःपदंचैततच्चाग्रेमतुमालिखेत् ॥ ३१ ॥ स्वरहंहोदरगतंसम्प्रार्णचाष्टधाभवेत् ॥ वहिःप
द्मंचाष्टपत्रमतिसुंदरमालिखेत् ॥ ३२ ॥ दलेषुकर्णिकामंत्रांत्रिपंक्त्याष्टसुक्रमात् ॥ पाशांकुशाभ्यांतद्बाह्येवृत्ताका
रेणवेष्टयेत् ॥ ३३ ॥ अनुलोमप्रकारेणमातृकावेष्टनंलिखेत् ॥ तथैवप्रतिलोमंचमातृकावेष्टनंप्रिये ॥ ३४ ॥ एतत्सर्वं
ठकारेणवेष्टयेन्महताप्रिये ॥ घटार्गलंमहायंत्रंसर्वकामार्थफलप्रदं ॥ ३५ ॥ अस्मिन्समावाह्यदेवीमुपचारैःसमर्चयेत्
आदावंगानिदेवेशिदेव्यंगेषुचविन्यसेत् ॥ ३६ ॥ आनंदरूपिणींध्यात्वामुद्रांसन्नद्धविग्रहः ॥ परिवारार्चनंकुर्यात्
प्रथमावरणेप्रिये ॥ ३७ ॥ हृल्लेखापंचकंचाद्यंद्वितीयांगायत्रिःप्रिये । कोणाष्टकेयथापूर्वंततःपद्मदलेषुच ॥ ३८

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ मातरोदेव्यंदेवेशिपूर्वादिपरिपूजयेत्॥ लोकपालांश्चतद्वाह्येपुनरेवंसमर्चयेत्॥ ३९॥ उपचारैर्मनोरम्यैस्तांबूलांतैः
३८ पृथक्पृथक्॥ यथाशक्तिजपंकुर्यान्नियमेनतुसुंदरि॥ ४०॥ अयंनित्यप्रकारस्तुपुरश्चरणकंशृणु॥ रविलक्षं
38 जपेद्दिव्यांतद्दशांशेनहोमयेत्॥ ४१॥ त्रिमध्वक्तैःक्षीरवृक्षसमिद्भिश्चतथातिलैः॥ समासेनतूनेत्सम्यक्पुरश्चारी
ततोभवेत्॥ ४२॥ जातीपुष्पैर्वश्यकामःसंपत्त्यैःकमलैःप्रिये॥ समिद्भिःपुष्टिकामस्तुखादिरैर्जुहुयात्प्रिये॥ ४३॥
एकाक्षरेऽपिदेवेशिसंत्यत्रभुवनानितु॥ व्योमबीजेमहेशानिकैलासादिप्रतिष्ठितं॥ ४४॥ वह्निबीजात्सुवर्णादिनि
ष्पन्नंवैकुधाप्रिये॥ तेनायंवर्त्ततेलोकेभूमिमंडलसंस्थितः॥ ४५॥ तुर्यस्वरेणपातालेशेषरूपेणधार्यते॥ महाभू राम॰
मंडलंतस्मात्पातालस्यापिनायिका॥ ४६॥ अतःपृथङ्महेशानिभुवनाधीश्वरोभवेत्॥ हकारेव्योमतुर्येणस्व ३८

© Dharmartha Trust J&K. Digitized by eGangotri

रेणानिलसंभवः ॥ ४७ ॥ त्रिकोणेसतिरेफेणसाक्षाद्वह्निस्वरूपिणी ॥ वह्निवीर्यंवसुज्ञेयंतस्मादेफेवसुंधरा ॥ ४८ ॥
अतएवमहेशानिरत्नयोःसमताभवेत् ॥ बिंदुचंद्रामृतादेवीह्लौंवयंतीजगत्त्रयं ॥ ४९ ॥ द्रवरूपाभवेत्तस्मात्सृजयं
तीचाईमात्रये ॥ अतएवमहेशानित्रिभुवनेशीतिकथ्यते ॥ ५० ॥ इतिश्रीदक्षिणामूर्त्तिसंहितायांचदार्गलयंत्रोद्धार
साधनंनामैकोनविंशःपटलः ॥ ईश्वरउवाच ॥ पंचमीरत्नविधेशीकथयामिशृणुप्रिये ॥ यस्यास्मरणमात्रेणपव
नोपिस्थिरीभवेत् ॥ १ ॥ वाग्भवंबीजमुद्धार्यगलाद्ग्रहविंदुभिः ॥ नादेनभूषितंबीजंपार्थिवंचोद्धरेत्ततः ॥ २ ॥ पुनरा
घंनमोभांतेभगवतीतिसमालिखेत् ॥ वाग्नीलिगुग्मंवाराहिपुनरेततत्त्रयंलिखेत् ॥ ३ ॥ वाराहिमुखिचह्रंह्रंस
विहीनंततःपरं ॥ अंधेचांधिनिसस्वाएंह्रिंदंतेनभवेत्प्रिये ॥ ४ ॥ रुंधेरुंधिन्यतोस्वजंभेजंभिनिहन्तथा ॥ मोहेमो

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ आ
हिनिरुद्धापितत्तमेस्तंभिनिहन्तथा॥५॥एतदुक्त्वामहेशानिसर्वदुष्टग्रदुष्टैश्चसांनांतत्तंचसर्वेषांसर्ववागीतिचिन्तं
३९ व॥६॥वक्तुर्दुःखगतिशोक्ताजिह्वास्तंभंज्ञानदृदयं॥शीघ्रंवश्यंकरंदृढंवाभवंपार्थिवंपुनः॥७॥चकारत्रितयंस्या चैकं
39 तेकवचास्त्राग्निवल्लभा॥चतुर्दशोत्तरशतंमंत्रवर्णाभवंतिहि॥८॥चतुश्चत्वारिंशतिभिःपदैर्न्यासःप्रकीर्त्यते
मातृकावन्न्यसेद्धक्तोपदानिदशमंत्रवित्॥९॥दोःपत्संधिषुसाग्रेषुन्यसेद्विंशतिसंख्यकान्॥पदार्णानपिविन्य
स्यपार्श्वयोरेकमुत्तमं॥१०॥अनेनैवप्रकारेणमातृकावन्न्यसेत्सुधीः॥ततःषडंगविन्यासंकुर्याद्देहविशुद्धये
॥११॥मार्तण्डपास्त्रपदंहृद्धंहृदयंचततःपरं॥वाराहियुगलेदेविशिरोमंत्रउदाहृतः॥१२॥वाराहिसुखियुगंभ एम॰
शिखास्वाहाकारंततः॥कवचंचततःसप्तवर्णैर्भिर्न्न्यसेत्क्रमात्॥१३॥ततःस्वाहाकारंचास्त्रंषडंगानिन्यसेत्ततःशि ३९

© Dharmartha Trust J&K. Digitized by eGangotri

ये॥ सर्वेण व्यापकं न्यासमाचरेत्सर्वसिद्धये॥१४॥ यंत्रोद्धारं प्रवक्ष्यामि येन त्रैलोक्यमोहनं॥ तांम्रे वा राजते स्वर्ण
मये वा भूर्जपत्रके॥१५॥ लिखेद्रोचनया वापि कुंकुमागरुचन्दनैः॥ हरिद्रया वा रक्तण्या घैर्लिखेच्चक्रं मनोहरं॥१६
त्रिकोणं पंचकोणं च षट्कोणं वसुपत्रकं॥ शतपत्रं सहस्रारं ततो शिविंबमालिखेत॥१७॥ चतुर्द्वारविशोभा
ढ्यं मध्ये सिंहासनं यजेत॥ वाणीश्वबीजपुग्मेन संपूज्याः सर्वमातरः॥१८॥ स्फटिकाचलमध्यस्थं पीठमेतद्वि
चिंतयेत्॥ देवीमावाहयेत्तत्र ध्यानं कुर्याद्विचक्षणः॥१९॥ प्रत्यग्रारुणसंकाशं पद्मांतर्गर्भसंस्थितां॥ इंद्रनी
लमहातेजः प्रकाशां विश्वमातरं॥२०॥ कदंबमुंडमालाढ्यां नवरत्नविभूषितां॥ अनर्घ्यरत्नघटितमुकुटश्री
राजितां॥२१॥ कौशेयार्द्धोरुकां चारुप्रवालामणिभूषणां॥ हलेन मुसलेनापि वरदेनाभयेन च॥२२॥ विराजित

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ चतुर्वाङ्कं कपिलाक्षीं सुमध्यमां ॥ नितंबिनीं सुसलाभ्यां कठोरघनसत्कुचां ॥ २३ ॥ कोलान गां प्रजेद्देवी सुपचा
४० रैः सहेतुभिः ॥ गंधपुष्पादिभिः सम्यक् सर्वकामार्थसिद्धिदां ॥ २४ ॥ सप्ततिस्त्र सहस्राणि पुरश्चरणसिद्धये
40 तद्दशांशेन होमः स्यात् तिलैर्वैधूकपुष्पकैः ॥ २५ ॥ त्रिमधुक्तैर्हैतुभिस्तैर्हरिद्राखंडकैर्जुनेत ॥ लाक्षाचतुरत
द्रव्यैः पिशितैर्विविधैरपि ॥ २६ ॥ सिद्धिर्भवति देवेशि मंत्रिणो नात्र संशयः ॥ स्थापनपूजाविधानं तु देवीमावाह्य
सिद्धये ॥ २७ ॥ आदावंगावृतीर्यष्ट्वा त्वमीशास्त्वरवायुषु ॥ मध्ये दिक्षु त्रिकोणं तु तस्य त्रिषु कोणेषु संस्थापन
२८ ॥ वामवामेतरायेषु क्रमेण त्रितयं यजेत् ॥ जंभिनीं स्तंभिनीं चैव मोहिनीं सर्वसिद्धये ॥ २९ ॥ त्रैविन्या एम॰
यास्त्र देवेशि स्तंभिन्यंताः प्रपूजयेत् ॥ पंचकोणे महादेवि पुरस्त्रादिक्रमेण तु ॥ ३० ॥ मतुस्थाएवनहाहेव ४०

© Dharmartha Trust J&K. Digitized by eGangotri

ततोमात्रार्चणंभवेत॥षडरेष्वरंआरम्पप्राद्दक्षिणेपनप्तजयेत॥२१॥ब्राह्मीमाहेश्वरीचैवकोमारीवैष्णवीप्रिये
माहेंद्रीचैवचामुंडाडाकिन्याद्याःप्रणप्रिये॥२२॥डाकिनीराकिनीदेविलाकिनीकाकिनीतथा॥शाकिनीहा
किनींचैवततःषट्कोणकेयजेत॥२३॥षट्कोणपार्श्वयोःप्रज्येदेव्योसर्वार्थसिद्धिदे॥हलंकपालंदधतींक्रो
धिनींवामतोयजेत॥२४॥मुसलेष्टकरांदेवींस्तंभिनींदक्षिणेयजेत॥चंडोच्चंडमहेशानिषट्कोणाग्रतोयजेत
२५॥नागंकपालंडमरुंत्रिशूलंदधतंप्रिये॥नग्नंनीलंजपाराजन्मस्तकंपंचमीस्मृतं॥२६॥ततोष्टदलपत्रेषुवाता
त्साद्यष्टकंयजेत॥अग्रस्थमेवतस्याग्रेप्तजयेन्महिषाष्टकं॥२७॥शृंगांताद्याश्चरक्तादिकृष्णवक्त्रानिकृंतनं नी
लजीमूतसंकाशंरिपुप्रपातनक्रमं॥२८॥शतपत्रंकमातप्तज्यंतद्वासेवमुदसकैः॥त्रयस्त्रिंशद्दलगतेस्त्रिवारोद्य

द·सं· रितैः पृथक् ॥ ३९ ॥ अवशिष्टदलेयोन्यास्तंभिनीदंभिनीतुता ॥ शातारायेमहेशानिमहासिंहंसमर्चयेत् ॥
४१ ४० ॥ सहस्रपत्रैः संपूज्यवाराहीणांसहस्रकं ॥ अंकुशांतेमहादेविवाराहैयेनमआलिखेत् ॥ ४१ ॥ अनेनमंत्रना
दविसृजयेत्तुसहस्रधा ॥ शिविववडकक्षेत्रयोगिनीगणपान्यजेत् ॥ ४२ ॥ पुनर्देवीसमाराध्यगंधपुष्पादि
तर्पणैः ॥ अक्षमालाहरिद्रायापुरव्यास्तंभनकारिणी ॥ ४३ ॥ इतिश्रीदक्षिणामूर्तिसंहितायांपंचमीक्रमा
र्चणविधिर्नामविंशतिमः पटलः ॥ ईश्वरउवाच ॥ अथातः संप्रवक्ष्यामितर्पणंदुर्लभं ॥ तिलमेरेयवंधू
कक्षस्तुमेस्तर्पयेच्छिवां ॥ १ ॥ मनोहरेस्तुवर्णादिपात्रेसंपूज्यपूर्ववत् ॥ अनेनविधिनादेविश्रियोभवतिनिश्चया एम०
त् ॥ २ ॥ एतस्याएवविद्यायाः कुंडेस्तिपरमेश्वरी ॥ विशेषः कथ्यतेसोत्रसर्ववैरिनिकृंतनः ॥ ३ ॥ एकहस्तमि ४१

© Dharmartha Trust J&K. Digitized by eGangotri

तं कुंडमर्द्धहस्तेन विस्तरं ॥ हस्तखातं मनोरम्यं होमायात्र निगद्यते ॥ ४ ॥ स्तंभने शिवदिग्भागे निग्रहे यमदिग्भवे
त् ॥ अस्मिन्नुक्ते कुंडे महेशानि भैरवाग्निं च पूजयेत् ॥ ५ ॥ लौकिकं वा यजेन्मंत्री वक्ष्यमाणेः परमेश्वरि ॥ हृदयं भुव
नेशान्याश्च भुवनेशी च सं लिखेत् ॥ ६ ॥ तस्मा एव शिरः खांदे वि बीजत्रयमिदं प्रिये ॥ उल्काभैरवसुज्वार्घ्यं च तत्र्यर्थ्यं तेन
मो लिखेत् ॥ ७ ॥ इत्यग्निपूजनं कृत्वा ततो भैराकृतिं यजेत् ॥ पूर्वबीजत्रयं भैरवाग्नये द्विठमालिखेत् ॥ ८ ॥ अ
नेनैकाकृतिं दत्वा नीलोत्पलसंज्ञानले ॥ नीलोत्पले भैरवाग्निं तापिच्छैरपि वा यजेत् ॥ ९ ॥ तापिच्छैः स्तंभने हो
मो विज्ञेयः क्रमचतुःशतं ॥ देवदारुतिलैर्लाक्षाहरिद्राभिस्तथा भवेत् ॥ १० ॥ त्रिमधन्नमध्यरात्रेषु प्रत्येकं साष्टयुक्त
शतं ॥ हरिणीमुद्रया होमः कथितस्तत्र सुंदरि ॥ ११ ॥ दक्षिणे होमकुंडं स्यात् हस्तमात्रं तिलाढ्यं प्रिये ॥ घृतसार्पभांडे

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ स्वर्णादिस्पृष्टेवालोहसंभवे ॥ १२ ॥ कुल्माषशांटीपरिक्षिप्योत्पलैस्त्रापिष्टचूर्णिणी । तिलमिश्रैरंत्तुमिस्तैश्चजयेन्म
४२ त्तुविन्नमः ॥ १३ ॥ वाग्भवंधरणीशुक्राकर्षणादिहलायच । नवाक्षरमिदंचोक्ताहृदंतंमंत्रमालिखेत् ॥ १४ ॥
42 श्रंक्रुशंक्रोधिनेदेविशुसलायनमोलिखेत ॥ सप्तविंशतिकात्वस्त्रदेवीमंत्रंसमुच्चरेत ॥ १५ ॥ घटंस्पृष्ट्वा हृदि
ध्यात्वापंचमीपरमेश्वरी ॥ तद्धटस्थोदकैः शत्रुमभिषिंचेद्विचक्षणः ॥ १६ ॥ कफान्वितः क्षयीवैरीवश्यो भवति
निश्चयात् ॥ अथनिग्रहहोमस्यविधिंवक्ष्ये स्फुटंप्रिये ॥ १७ ॥ खरमेषांगारकैनलाजाचूर्णैतिलैः सह ॥ मिश्रंपिंडं
[illegible] तुपिंडेनमेलयेद्धेतुनाप्रिये ॥ १८ ॥ पिशितैर्गंधधूपाद्यादिधूपदीपैश्चसाधकः ॥ तर्पयेद्यो राम॰
गिनीपिंडंपरमानंदसुंदरं ॥ १९ ॥ सपत्नवेश्मसंकल्प्यमृदावालोहकेनच । निवेश्यकुंडंवज्रेवाऊनेल्लाक्षार ४२

© Dharmartha Trust J&K. Digitized by eGangotri

जःकरणैः ॥ २० ॥ अयुतं संजपेद्देवि त्रिपक्षक्षणदां क्रमेण त ॥ त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि वैरिणः ॥ २१
योगिनीनां सुखेदे विपतंत्यत्र न संशयः ॥ अथातः संप्रवक्ष्यामि साधकानंदकारकं ॥ २२ ॥ अणवं अणवे नैव सं
पुटीकृत्य योजयेत ॥ श्रीं ध्यां स्रीं ध्यां च साध्याभ्यां ऊकारेण च वेष्टयेत ॥ २३ ॥ अष्टभिः कुलिशैर्भित्वा सौं कौंभि
तितदंतरे ॥ कुलिशाग्रे तारवीजं पार्थिवं मंडलं ततः ॥ २४ ॥ कुलिशांतर्लिखेत्साध्यं वा होवि घां समालिखेत्
चतुरंकुशसंरुद्धं सर्वमेतद्धरानने ॥ २५ ॥ रुद्रस्वरे समारोप्य पीतपुष्पैः समर्चयेत् ॥ पंचमीशाकटं यंत्रं त्रिषु लोके
षु दुर्लभं ॥ २६ ॥ सहस्रसंख्ययानेन निशामांडे क्षिपेद्बुधः ॥ श्यामलोहितमंत्रज्ञो मंत्रपुष्पैः समर्चयेत ॥ २७ ॥ श्वेत
धूम्रानले क्षिप्त्वा यजेद्भुक्तविधानतः ॥ सौवर्णराजतं ताम्रं क्रमेणैतत्समर्चयेत ॥ २८ ॥ कारकार्थी हरिद्राभैः

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ पुष्पैराराधयेच्छिवां ॥ धात्र्यराशौ च सायाह्ने विनिक्षिप्य च तद्भवेत् ॥ २९ ॥ स्तंतनेक्तंमकारस्मरवपरियंत्रमालिखे
४२ त् ॥ अजनामैः समभ्यर्च्य कुसुमैः पथि देशिकः ॥ ३० ॥ उच्चाटयेत्तदा शीघ्रं कोपयुक्तंस्तुस्थिरंप्रियं ॥ तद्गांडंत
सुखीद्रवैर्भिन्नं मित्रांजनद्रुमैः ॥ ३१ ॥ समुद्धृत्य समभ्यर्च्य लोहकारगृहे क्षिपेत् ॥ बाध्यमानो रोगजालैर्मर
एं याति सुयादृतुः ॥ ३२ ॥ निःसाणे पटहे वाद्ये विलिखेन्मंत्रवित्तमः ॥ युद्धे तत्ध्वनिमाकर्ण्य पलायंते महाबलाः
॥ ३३ ॥ भूमनितो समालिख्य भूमावैर्चयेत्प्रिये ॥ नश्यंति दृष्ट्य स्तेषां शत्रूणां नान्यथा भवेत् ॥ ३४ ॥ हरिद्रपा
शिलामध्ये समालिख्यार्चयेत्प्रिये ॥ पीतपुष्पैस्तु तद्यंत्रमधोवक्त्रं विनिक्षिपेत् ॥ ३५ ॥ वाक्स्तंभो जायते रा॰म॰
ते शीघ्रं वादिनां परमेश्वरि ॥ अथ सीसे समालिख्य सीमज्ञैः कुसुमैर्यजेत् ॥ ३६ ॥ शिलाधस्तादि निक्षि ४२

© Dharmartha Trust J&K. Digitized by eGangotri

प्यव्यवहारेजयीभवेत् ॥ सर्वलोहमयो पात्रे सितपुष्पैः समर्चयेत् ॥ ३७ ॥ वाक्पतिर्जायते मंत्री पंचसारे यथा संलि
खेत् ॥ पंचवर्णैः प्रसूनैश्च पूजयेत्सर्वकर्मकृत् ॥ ३८ ॥ अथातस्त्रिमिरा मिश्रसीसयुग्मे लिखेद्बुधः ॥ अभ्य
र्च्य कुसुमैर्रक्तैः प्रतश्मो प्रतापयेत् ॥ ३९ ॥ तेनाकृष्टिर्भवेद्दासु स्त्रीनां वा योषितामपि ॥ हृषगर्भन्यसेच्चक्रं शश
पात्रेसुरंजितं ॥ ४० ॥ बहिष्टग्रामभागेभ्यः संप्रविष्टाभवंतिहि ॥ साध्यनक्षत्रवृक्षस्य गर्भे चक्रं प्रविन्यसेत् ॥ ४१
वृषस्य पत्रकृतं देवि साध्यस्य भवति स्फुटं ॥ जले क्षिप्तं दोषदायि वङ्क्षो क्षिप्तं तु तापकृत् ॥ ४२ ॥ रोगदं भस्मनि
क्षिप्तं हितदं भूमिगं प्रिये ॥ अन्नगं कामिनीदं घात् कुंभे क्षिप्तं सुतप्रदं ॥ ४३ ॥ पूर्वस्यां दिशि निक्षिप्तं रिपूणां
भयदं भवेत् ॥ आग्नेयेयमदिग्भागे वैरिणां मृत्युदं भवेत् ॥ ४४ ॥ तथा निर्ऋतिदिग्भागे शत्रून्मादनकारणं ॥ पश्चि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ मेरोगदं तेषां गदितं वायुदिग्गतं ॥ ४५ ॥ अनदं चोत्तरे भागे साधकस्य न संशयः । ईशानगं शांतिकरं वैरीणां परमेश्वरि
४४ ४६ । मध्यगं सर्वकार्याणि शत्रूणां नाशये ध्रुवं ॥ एतस्याएव विद्यायाम ध्यरात्रे वर्णं भवेत ॥ ४७ ॥ अन्यथा देवताशापो ज्ञा
यते ती वडुस्तरः ॥ इतिश्री दक्षिणामूर्त्तिसंहितायां पंचमीशकटयंत्रोद्धार नाम एकविंशः पटलः ॥ ईश्वर उवाच ॥ पंच
रात्रं महातंत्रं कथितो वैष्णवागमः ॥ एनामाराध्य देवेशी पालको भूज्जगत्रयं ॥ १ ॥ विद्याकदंवचक्रस्थाः शिवविद्यामये
रिताः ॥ ताः संति वैंदवे चक्रे तस्माच्छिवमयी शिवा । २ ॥ सिद्धरत्नमहातंत्रे कथितो गाणपागमः । सप्तकोटिमहामं
त्रैर्मंडितस्तन्मयी शिवा ॥ ३ ॥ वामदेवमहातंत्रे घोरज्ञानप्रकाशकाः मनवस्तन्मयी देवी ज्ञानशक्तिरितीरिता ॥ ४ राम॰
अतः संसेव्यते देवि चतुरायतनैः सदा ॥ सिंहासनप्रसंगेन चतुराम्नायदेवताः ॥ ५ ॥ कथिताः परमेशानि संपदेषांन ४४

© Dharmartha Trust J&K. Digitized by eGangotri

संशयः ॥ यस्यास्मरणमात्रेणपलायंतेमहापदः ॥ ६ ॥ इतिश्रीदक्षिणामूर्त्तिसंहितायांचतुराम्नायविवरणंनामद्वा
विंशःपटलः ॥ ईश्वरउवाच ॥ अथवक्ष्येमहादेवीनित्याविवरणंक्रमात् ॥ कामेश्वरीमहाभेदावहवःसंतिपार्वति
॥ १ ॥ तत्रकामेश्वरीनित्याकथ्यतेभुविदुर्लभा ॥ त्रिपुरेशीसमुद्धार्य्यतारांतेन्तेत्वदंततः ॥ २ ॥ कामेश्वरीपदंचोक्त्वा ह
इच्छाकामफलप्रदे ॥ सर्वसत्ववशंचोक्त्वाकरिसर्वजगत्पदं ॥ ३ ॥ क्लोमांते[redacted]कीरंॐॐवाणां[redacted]त्रिपुरेश्वरीम ॥ वि सां
परीतांसमालिख्यषद्[illegible]त्वात्रिंशदक्षरा ॥ ४ ॥ आद्याभागत्रयेणैवद्विरावृत्यासषडंगकं ॥ कामेश्वरीवक्ष्याम्यादि
ध्यानयंत्रार्चणादिकं ॥ ५ ॥ इतिश्रीकामेश्वरीनित्यविधिः ॥ ईश्वरउवाच ॥ अथवक्ष्येमहेशानीविद्यांश्रीभगमालि
नीम ॥ वाग्भवंभगशब्दांतेभुगेवाग्भवमेवच ॥ १ ॥ भगिन्यंतेवाग्भवंचभगोदरिचवाग्भवं ॥ भगमालेवाग्भवंचवाग्भ

© Dharmartha Trust J&K. Digitized by eGangotri

वीर्द्रोभगावहे ॥ ३ ॥ भगगुह्येवाग्भवंवभगयोनिववाग्भवं ॥ भगन्यंतेपातनीतिवाग्भवंभगसर्वव ॥ ३ ॥ वदिवाग्भवमालिख्य
मत्तोभगवशंकारि ॥ वाग्भवंभगरूपेतङ्गगनितिपेववाग्भवं ॥ ४ ॥ भगक्लिन्नेवाग्भवंचभगसांतेममालिखेत ॥ रतेवाग्भव
मालिख्यभगक्लिन्नेथवाग्भवं ॥ ५ ॥ भगक्लिन्नद्रवेवांतेभगंक्लेदयवालिखेत ॥ भगंद्रावंद्रालिख्यभगामोघेभगेतिव य
६ ॥ विच्चेभगंक्षोभयेतिसर्वसत्वान्भगेश्वरी ॥ वाग्भवंचभगक्लूंचवाग्भवंभगजंलिखेत ॥ ७ ॥ वाग्भवंचभगक्लूंचवाग्भ
वंभगहेलिखेत ॥ भगक्लिन्नेचसर्वाणिभगान्यथचमेलिखेत ॥ ८ ॥ वशमानयवालिख्यभगपंचममन्मथां ॥ भगां
तेरेभगांतेथहरक्लेमात्मकंलिखेत ॥ ९ ॥ भगांतेपंचमंकामंततोवैभगमालिनी ॥ ॐ तांउच्चार्यविधेपंत्रैलोक्य एम॰
वशकारिणी ॥ १० ॥ चतुराधिक्यविंशत्याद्विशतेनवमंडिता ॥ वर्णानांभगमालेयंनित्यासकलसिद्धिदा ॥ ११ ॥ म ४५

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ वींद्रोभगगावहे ॥ २ ॥ भगगुह्येवाग्भवंचभगयोनिचवाग्भवं । भगन्यंतेपातनीतिवाग्भवंभगसर्वच ॥ ३ ॥ वदिवाग्भवमालिख्य
४५ मनोभगमेवशंकरि । वाग्भवंभगरूपेतद्भगनिपेचवाग्भवं ॥ ४ ॥ भगक्लिन्नेवाग्भवंचभगसांतेसमालिखेत् । ऐंतेवाग्भव
45 मालिख्यभगक्लिन्नेथवाग्भवं ॥ ५ ॥ भगक्लिन्नद्रवेवांतेभगक्लेदयवालिखेत् ॥ भगद्रावंचवालिख्यभगामोघेभगेतिच य
६ ॥ विच्चेभगक्षोभयेतिसर्वसत्वान्भगेश्वरी । वाग्भवंचभगक्लूंचवाग्भवंभगजंलिखेत् ॥ ७ ॥ वाग्भवंचभगद्रूंचवाग्भ
वंभगहेलिखेत् ॥ भगक्लिन्नेचसर्वाणिभगान्यथचमेलिखेत् ॥ ८ ॥ वशमानयवालिख्यभगपंचममन्मथी ॥ भगा
न्तेभगांतेयहरड्ढेमात्मकंलिखेत् ॥ ९ ॥ भगांतेपंचमंकामंततोवैभगमालिनी ॥ ॐनाउच्चार्यविद्येयंत्रैलोक्य ए॰म॰
वशकारिणी ॥ १० ॥ चतुराधिकयाविंशत्याद्विशतेनचमंडिता ॥ वर्णानांभगमालेयंनित्यासकलसिद्धिदा ॥ ११ ॥ स ४५

© Dharmartha Trust J&K. Digitized by eGangotri

षिरस्यास्त्रस्तुभगोगायत्रंछंदउच्यते॥देवतेयंतुबीजंतुहरब्रेमात्मकंशीघे॥१२॥शक्तिःस्त्रीबीजकंपंतुकी
लकंपरमेश्वरी॥षड्दीर्घस्वरभेदेनन्यसेदंगानिदेशिकः॥१३॥कामन्यासंतथावाणन्यासंकुर्यात्तुपूर्ववत्॥क
दंबवनमध्यस्थांउद्यत्सूर्यसमद्युतिम्॥१४॥नानाभूषणसंपन्नांत्रैलोक्याकर्षणक्षमां॥पाशांकुशौपुस्तकेष
तौलिकीनखलेखनीं॥१५॥वरदंचाभयंचैवदधतींविश्वमातरं॥एवंध्यात्वाततोलक्षंमिताहारोजपेन्नरः॥१६
तद्दशांशेनमधुकैःस्त्रीमध्वक्तैर्हुनेद्यतः॥त्रिकोणंचैवषट्कोणंततःषोडशपत्रकं॥१७॥ततोष्टपत्रंभूबिंबमेवंमंड
लमालिखेत्॥मध्येदेवींसमभ्यर्च्यततोगावरणंयजेत्॥१८॥विद्यादिशक्तित्रितयंत्रिकोणेषुप्रपूजयेत्॥क्रमेण
वायमारभ्यपञ्चनस्तेषुसमर्चयेत्॥१९॥सुभगांचभगांचैवतथाचभगसर्पिणीं॥वाणांस्तुदेवितत्रैवपूर्ववत्पूजयेत्तु

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं.
४६

46

धीः । २० । भगमालादिषट्कं च कोणषट्के प्रपूजयेत् । वशंकरीचरूपांचनित्यांक्लिन्नांस्वरूपिणी ॥ २१ ॥ तथाभगवतींवे
ववरदांपरमेश्वरींरेतांसुरेतांक्लिन्नांचतथाक्लिन्नद्रवामपि ॥ २२ ॥ अमोघांचैवविद्यांचतथैवक्लिन्नदेवतां ॥ एताःषोडश
देवेशीभगशब्देनयोजयेत् ॥ २३ ॥ अष्टपत्रेषुदेव्यस्तुमातरःपरमेश्वरि । ईंद्रादयस्तुभूबिंबेतुनेंद्वीसमर्चयेत् ॥ २४
इतिभगमालिनीनित्याविधिः ॥ ईश्वरउवाच ॥ भुवनेशीसमुद्धार्य्यनित्याक्लिन्नेमदद्रवे । वह्निजायांचविद्येयंस
द्वर्णामहोत्कटः ॥ १ ॥ एकेनचतथाद्वाभ्यांद्वाभ्यांक्रमात्प्रिये ॥ द्वाभ्यांद्वाभ्यांषडंगानिविन्यसेद्देशिकोत्तमः
॥ २ ॥ रक्तांगीरक्तवसनांचंद्रचूडांत्रिलोचनां ॥ स्विद्यद्वक्त्रांमदाघूर्णलोचनांरत्नभूषितां ॥ ३ ॥ पाशांकुशौकपा
लंचमहाभीतिहरंतथा ॥ दधतींसंस्मरेन्नित्यांपद्मासनविराजिताम् ॥ ४ ॥ वर्णलक्षंजपेन्मंत्रंतद्दशांशेनहोम

रा.प०
४६

© Dharmartha Trust J&K. Digitized by eGangotri

येत॥ तिलैस्त्रिमधुसंमिश्रैः पुरश्चारी भवेद्ध्रुवः॥५॥ मधुकपुष्पैर्वा होमो मोहविषावायनीरजेः॥ त्रिकोणं चाष्टपत्रं च ततो
भूबिंबमालिखेत॥६॥ आदौ देवीसमभ्यर्च्य ततो गावरणं यजेत॥ त्रिकोणे पूजयेद्देवि नित्यां क्लिन्नां मदद्रवां॥७॥ मा
तरो दलमूलेषु दलमध्येषु पूजयेत॥ नित्यां निरंजनां क्लिन्नां क्लेदिनीं मदनातुरां॥८॥ मदद्रवां द्राविणीं चक्रो पि
णीं च प्रपूजयेत॥ भूबिंबे लोकपालांस्तु पुनर्देवी प्रपूजयेत॥९॥ इति नित्यात्तृतीयेयं भोगमोक्षफलप्रदा। कथि
ता तव देवेशि त्रैलोक्यवशकारिणी॥१०॥ इति नित्याक्लिन्नानित्याविधिः॥ ईश्वर उवाच॥ अथ वक्ष्ये महेशानि भे
रुंडां परमेश्वरीं॥ छेरामात्मकस्तुःखार्ष्यत्वंक्रुशाम्यांस्तुचेष्टितम्॥१॥ अंत्यहीनं चवर्गं च षष्ठद्वीरेफमंडितं॥ अंतु
ग्रहेंडविंद्वाद्यं तारस्वाहोदरस्थितं॥२॥ मंत्रईशाणि देवेशि महाविषहरो भवेत॥ ऋषिरस्य महाविष्णुर्गायत्रं छंद

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ उच्यते ३ ॥ देवतेयंपराशक्तिस्तृतीयंबीजमुच्यते । वह्निजायातुशक्तिःस्यातकीलकंहृणिरेकच ॥ ४ ॥ षड्दीर्घस्वर
४७ भेदेनबीजेनैवषडंगकं ॥ चंद्रकोटिप्रतीकाशांस्रवंतीममृतद्रवैः । ५ ॥ नीलकंठांत्रिनेत्रांचनानाभरणभूषितां ॥ इंद्र
47 नीलस्फुरत्कांतिशिखिवाहनशोभितां ॥ ६ ॥ पाशांकुशौकपालंचछूरिकांवरदाभयौ ॥ बिभ्रतींहेमसंबंधगरुडो
द्गारभूषितां ॥ ७ ॥ एवंध्यात्वाजपेद्वर्णलक्षंतुविजितेन्द्रियः ॥ तद्दशांशेनजुहुयाद्धुतपायसैःपरेश्वरि । ८ । त्रिको
णंचाष्टपत्रंचततोभूविंबमालिखेत् ॥ मध्येप्रणवबीजेचत्रिकोणस्यचपार्श्वयोः । ९ ॥ स्पृणिहृद्यंत्रिकोणेतुपंचमा
दित्रयंन्यसेत् ॥ अवशिष्टंत्रिकोणाग्रत्रिकोणाग्रयसंलिखेत् ॥ १० ॥ मालामंत्रंक्रमेणैववस्वुपत्रेतुविन्यसेत् । राम॰
वस्वक्षरविभागेनचतुःषष्ट्यार्णविग्रहं ॥ ११ ॥ भूसंपुटांसंलिखेन्मंत्रीमहाविषहरांप्रिये ॥ भुवनेशीसमुच्चार्यात ४७

© Dharmartha Trust J&K. Digitized by eGangotri

तस्त्रिभुवनेतिच ॥ १२ ॥ विचेभुगंकुलेकौलेकुसुकालेततःपरां ॥ भूस्कंडेशिखिवालिख्यवाहिनीचततःपरम् ॥ १३ ॥ नी
लकंठचरौद्रंचततोवेतालिसोमच ॥ मातरेभुवनेशीचवतुःषष्ठ्यर्णविग्रहां ॥ १४ ॥ छंदोत्र पुरुषश्चाषिर्ब्रह्मावीजंतु
भुवनेश्वरी ॥ भूतुंडादेवताज्ञेयापुरुषार्थप्रदायिनी ॥ १५ ॥ षड्दीर्घस्वरभेदेनवीजेनैवषडंगकं ॥ ध्यानंतुपूर्ववद्देवी
पूजाहंद्वेसमाभवेत् ॥ १६ ॥ महीविंबेमातृकायावर्णालिख्याःक्रमेणतु ॥ तत्रावाह्यमहेशानीमुपचारैःसमर्चयेत्
१७ ॥ अंगानांपूर्ववत्पूजात्रिकोणेषुततःपुरः ॥ शिखिनीनीलकंठाचरौद्रीचैवक्रमाद्यजेत् ॥ १८ ॥ त्रिकोणपार्श्व
योःपूज्येवेतालीसोममातृका ॥ ततस्त्रिभुवनेशानींमिद्धांचैवाजितामपि ॥ १९ ॥ लोकपूज्यांमहामोहांकुलां
कौलांतथैवच ॥ कुसुकालामष्टपत्रेषुरत्राद्विपूजयेत् ॥ २० ॥ ततःस्वमातरःपूज्यावसुपत्रेषुमंत्रवित् ॥ इंद्रादय

दे॰सं॰ स्फुरद्विंबेषुनेर्देवीं समर्चयेत् ॥ ११ ॥ इति भुवनेशानित्याविधिः ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि नित्यां वैवह्निवासि
४८ नीम् ॥ पाशं विलिख्य वह्न्यंते वामिश्चैन म इत्यपि ॥ १ ॥ अष्टार्णेयं महीशानि पुरुषार्थप्रदो मतः ॥ ऋषिरस्य वसिष्ठस्या
त्गायत्रं छंद उच्यते ॥ २ ॥ आद्यं ते बीजशक्ती स्यात्कीलकं मध्यएव च ॥ देवीपदद्वयेनैव द्विरावृत्यांगकं न्यसेत् ॥ ३ ॥ प
दत्रयं देहभागत्रये विन्यस्य देशिकः ॥ ध्यायेत्तप्तसुवर्णाभां नानालंकारभूषितां ॥ ४ ॥ पाशांकुशौ स्वस्तिकं च वरदा
भयौ । दधतीं रत्नमुकुटां त्रैलोक्यतिमिरापहां ॥ ५ ॥ वर्णलक्षं जपेन्मंत्रं तद्दशांशेन होमयेत् ॥ घृताक्तेन वरारोहे तत
ः सिद्धो भवेदणुः ॥ ६ ॥ अष्टपत्रं लिखेत्पद्मं विद्यां पत्रदले लिखेत् ॥ एकैकाक्षरभेदेन ततो भूविंबमालिखेत् ॥ ७ ॥ रम॰
मध्यपीठं समभ्यर्च्य दिक्कुमध्ये च पार्वती ॥ पीताश्वेतारुणा कृष्णा धूम्रा तीव्रस्फुलिंगिनी ॥ ८ ॥ रुचिराज्वालिनी ४८

© Dharmartha Trust J&K. Digitized by eGangotri

चैवततःसिंहासनंपजेत् ॥ देवीमावाहयेत्तत्रसत्पचारैःसमर्चयेत् ॥ ९ ॥ आदावंगानिसंपूज्यवसुपत्रेषुपूजयेत् ॥
जातवेदाःसप्तजिह्वोहव्यवाहनएवच ॥ १० ॥ अश्वोदरभवश्चैवतथावैश्वानरःप्रिये ॥ कौमारसंज्ञादेवेशितथा
विश्वमुखःक्रमात् ॥ ११ ॥ ततोदेवमुखोदेविवसुपत्रेषुपूजयेत् ॥ ब्रह्मादयःसुसंपूज्यावसुपत्रेषुदेशिकः ॥ १२ ॥
इंद्रादयस्तकेशविंवेषुनदेवीसमर्चयेत् ॥ साक्षाद्वह्निमहापीठकलादशकमंडिता ॥ १३ ॥ इतिश्रीवह्निवासिनी
नित्याविधिः ॥ ईश्वरउवाच ॥ अथवक्ष्येमहादेविमहाविद्येश्वरींपरां ॥ नित्यक्लिन्नांसमालिख्यमुखेतारंसमालि
खेत् ॥ १ ॥ हृल्लेखांतेफरेमात्मावह्निवीजंविसर्गवत् ॥ चतुर्दशाक्षरीविद्याऋषिर्ब्रह्मानिगद्यते ॥ २ ॥ गायत्रंछं
दआख्यातंदेवतापरमेश्वरी ॥ आद्यंतेवीजशक्तीचहृल्लेखाकीलकंभवेत् ॥ ३ ॥ चतुष्कोणवसुग्मेनयुग्मेनषु

ट्

© Dharmartha Trust J&K. Digitized by eGangotri

गलेनच ॥ पुगलेनवपुग्मेनन्यसेदंगानिदेशिकः ॥ ४ ॥ जपांकुसुमसंकाशांरक्तांशुकविराजितां ॥ पाशांकुशौक
पालस्थसुरापानविघूर्णितां ॥ ५ ॥ अभयंदधतींध्यायेच्चतुर्लक्षंजपेत्सुधीः ॥ तद्दशांशेनजुहुयाद्धविषातिल
तंडुलैः ॥ ६ ॥ त्रिकोणंवेदपत्रंचवसुपत्रंचभूगृहं ॥ एवंमंडलमालिख्यमध्येदेवींसमर्चयेत् ॥ ७ ॥ आदावंगानिसंपूज्य
त्रिकोणेषुप्रपूजयेत् ॥ ब्रह्माणीवैष्णवीरौद्रीततोवेदास्त्रपूजनम् ॥ ८ ॥ विद्यामाताचहृल्लेखायोगिनीचंद्रशेखरा
। पुरश्चादिक्रमेणैववेदास्त्रेषुप्रपूजयेत् ॥ ९ ॥ नित्यानिरंजनाक्लिन्नाक्लेदिनीमदनातुरा । मद्द्रवाद्राविणीचह
क्षोभिणीवसुवेरेचयजेत् ॥ १० ॥ मातरश्चैवसंपूज्याश्चैवलोकपालकाः ॥ इतिमहाविद्येश्वरीनित्याविधिः ॥ ६ राम॰
श्वरउवाच ॥ अथयद्दंतीप्रवक्ष्यामित्रैलोक्याकर्षणकामांभुवनेशींसमुद्धार्यशिवइत्येनमोलिखेत् ॥ १ ॥ सप्ता ४९

र्गाशिवदूतीयंत्रैलोक्यस्वामिनीप्रिये ॥ ऋषिरुद्रस्तु गायत्रीछंदोस्यादेवताशिवा ॥ १ ॥ आद्यंतेबीजशक्तीच
मध्यंकीलकमुच्यते ॥ विद्यामामन्त्रयेणैवद्विराहृत्यांगकंन्यसेत ॥ २ ॥ दूर्वानिभांत्रिनेत्रांचमहासिंहसमासनां ।
शंखचारिचापबाणांश्चसृणिपाशौवराभयौ ॥ ४ ॥ दधतींचिंतयेन्नित्यांमन्त्रलक्षंजपेत्ततः ॥ तद्दशांशेनजुहुयात्ति
लैर्मधुघृताप्लुतैः ॥ ५ ॥ अष्टपत्रंलिखेत्पद्मंवहिर्भूविंवमालिखेत ॥ तत्रदेवींसमभ्यर्च्यस्तुपचारैःसमर्चयेत ॥ ६
आदावंगानिसंपूज्यवसुपत्रेषुसंजपेत ॥ जयाचविजयाचैवकीर्तिःप्रीतिःप्रभातथा ॥ ७ ॥ श्रद्धामेधाधृतिस्वा
हेभूविंवेतुदिगीश्वराः ॥ पुनर्देवींसमभ्यर्च्यस्तुत्वाभूःपान्त्रोत्तमः ॥ ८ ॥ इतिशिवदूतीनित्याविधिः ॥ ईश्वरउवा
च ॥ अथवक्ष्येमहादेवित्वरितांसिद्धिदायिनीं ॥ तारंपरांचकवचंखेचछे मसमालिखेत ॥ १ ॥ स्त्रीक्ष्मात्मकमुच्चा
क्षः

दिव्य

द॰सं॰ यंत्रोपरामस्त्रकं लिखेत्। त्वरितारुद्रवर्णेयं भोगमोक्षफलप्रदा॥१॥ ऋषिरीशो विराट्छंदो देवतेयं चक्रकर्म

५० [illegible] पार्वति। कवचं स्त्रीशक्तिर्वीजं कीलकं च प्रकीर्तितं॥३॥ वक्त्रे प्रुगं हृच्छिरस्कं छेदप्रुग्मं शिखा

50 ततः॥ कुस्त्री प्रुगं च कवचं स्त्रीक्रमात्मप्रुगं तथा॥४॥ नेत्राणि विन्यसेद्दूं कें फट् स्त्रं च प्रकीर्तितं॥ श्यामांगीं र

क्तवस्त्राणि चरणांबुजशोभितां॥५॥ ढपलां हिमप्रमंजीराफटारत्नविभूषितां। स्वर्णांशुकां स्वर्णभूषां वेत्रसाहि

हंद्रमेखलां॥६॥ तनुमध्यां पीनतुंगकुचयुग्मां वराभयो। दधतीं शिखिपिंछानां वलयांगदशोभितां॥७॥ गुंजा

स्रजां गुपाहीशकेयूरां रत्नभूषितां। द्विजनागस्फुरत्कर्णभूषां मत्तारुणेक्षणां॥८॥ नीलकुंचितधम्मिल्लव राम॰

नपुष्पां कपालिनीं। कैरातीं शिखिपत्राढ्यनिकेतनविराजितां॥९॥ स्फुरत्सिंहासने शोढां स्मरेद्भयविनाशिनी ५०

© Dharmartha Trust J&K. Digitized by eGangotri

शरविलक्षं जपन्मंत्रं तद्दशांशेन होमयेत् ॥२०॥ मण्डकपुष्पैर्देवेशि उरस्थारी ततो भवेत् । अष्टपत्रं लिखेत्पद्मं व
हिर्भूविंबमालिखेत् ॥२१॥ प्रत्येकं वसुकोणेषु कवचं चाष्टधा लिखेत् । मध्ये तु भुवनेशानीं वेष्टयेन्मातृकां बहि
ः ॥२२॥ सर्वरक्षाकरं नाम चक्रमेतदुदाहृतं । तत्रावाह्य महेशानीमुपचारैः समर्चयेत् ॥२३॥ आदावंगानि संपू
ज्य वसुपत्रेषु पूजयेत् । ॐकारीं खेचरीं चंडां छेदिनीं क्षपणीमपि ॥२४॥ स्त्रियं हूंकारिणीं क्षेमकारिणीं क्रमतो
यजेत् । श्रीबीजेनैव देवेशि लोकपालांस्ततः परं ॥२५॥ अग्रे फट्कारिणीं पूज्याशरासनधराप्रिये । स्वर्णरत्न
मयीं वेत्रयष्टिहस्ते सुभूषिते ॥२६॥ द्वारपार्श्वयुगे पूज्ये विजयां तथा । कक्षोवर्वरकोशस्थलक्कुटेन विराजितः
॥२७॥ किंकरः पुरतः पूज्यस्तद्बहिः पूजयेत्क्रमात् । धातारं च विधातारं उनर्देवीं समर्चयेत् ॥२८॥ ॥इति नि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ५१ त्यात्वरिताविधिः॥ ॥ईश्वरउवाच॥अथवक्ष्येमहेशानिविद्यांश्रीकुलसुंदरी।बालाख्यात्रिपुरेशानीसर्वसिंहा
सनेस्थिता॥१॥ब्रह्मविष्णुमहेशानप्रज्यासाकुलसुंदरी।अथवक्ष्येपरांनित्यांपुरुषार्थप्रदायिनीम्॥२॥त्रि
पुरेशीसमुच्चार्यनित्यास्वामेरवीतथा।ॐकाराश्रितयंबाणविघेपंचासवाक्षरी॥३॥त्रिपुरेशीचतंत्रंउक्ष्या
दिपजनंप्रिये॥ ॥इतिनित्याहृद्याविधिः॥ईश्वरउवाच॥ ॥अथवक्ष्येमहेशानिविद्यांनीलपताकिनीम्।ता
रंहृत्पदमाभाष्यकामेश्वरीपदंततः॥१॥कामांकुशेपदंचोक्त्वाततःकामपताकेच।भगवत्यथनीलांतेपता
केतिभगांतिके॥२॥वतिहृन्मंत्रमालिख्यततोसर्वानितिचतेलिखेत्।परमांतेतथाप्रहेस्वॐकारत्रितयंलिखेत्॥ राम॰
३॥मदनेमदनांतेथदेहेत्रैलोक्यमालिखेत्।आवेशयतथालेख्यकवचास्त्राग्निवल्लभाः॥४॥षट्त्रिंशार्णापरमे ५१

51

© Dharmartha Trust J&K. Digitized by eGangotri

शानीदेवीनीलपताकिनी।कामेश्वरीचतंत्रेतुध्यानमस्यानिगद्यते॥५॥रक्तांरक्तांशुकपीठांनानारत्न
विभूषितां।इंद्रनीलस्फुरन्नीलपताकांकामलांछितां॥६॥कामेश्वरैवेपसंलयस्थूणींचवरदाशयो।दधतीं
परमेशानींत्रैलोक्याकर्षणक्षमी॥७॥ध्यात्वाजपेच्चतल्लक्षंदशांशेनतिलैर्हुनेत्।एषाविद्यावरारोहेका
मेशीचमहज्जयेत्॥८॥ ॥इतिनीलपताकानित्याविधिः॥ईश्वरउवाच॥ ॥अथवक्ष्येमहेशानिविजयां
जयदांसदा।शिवचंद्रस्वरूपांताविसर्गस्वरविभूषितां॥१॥विंदुनादकलाक्रांतंविजयायेनमौलिखेत्।ऋषि
रस्याअहंछंदोगायत्रंदेवतास्वयं॥२॥वीजंतन्मध्यवर्णस्थंवीजशक्तीचकीलकम्।षड्दीर्घस्वरसंभिन्नवी
जेनैवषडंगकम्॥३॥एकवक्त्रांदशभुजांसर्पयज्ञोपवीतिनीं।दंष्ट्राकरालवदनांनरमालाविभूषितां॥४॥

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ अस्थिचर्मावशेषांतां वह्निज्वालसमप्रभां।व्याघ्रांबरां महाघोरां दशवासनविराजितां॥५॥रणेस्मरणमात्रेण मंत्रि-
५२ ण्योविजयप्रदा।शूलंसर्पंचटंकासिक्षृणिघंटाशनिद्वयं॥६॥पाशमग्निमभीतिंचदधतींजयदांसदा।लक्षत्र
52 यंजपेन्मंत्रंतद्दशांशेनहोमयेत्॥७॥महापद्मेश्रिमध्येकोस्ततःसिद्धाभवेदियं।त्रिकोणंचैवषट्कोणंवसुप
त्रंमहीपुरं॥८॥मध्येवीजंसमालिख्यत्रिकोणेषुचवीजकं।षडक्षराणिषट्कोणेवसुकोणेषुतेस्वरा॥९
युग्मयुग्मप्रभेदेनपत्राग्रेषुततोलिखेत्।नारसिंहंमहावीजंमातृकांवेष्टयेत्ततः॥१०॥अत्रावाह्यमहादेवी
मुपचारैःसमर्चयेत्।आदौषडंगावरणंत्रिकोणेषुजयेत्ततः॥११॥ब्रह्मविष्णुमहेशांश्चषट्कोणेषुततो रा॰म॰
यजेत्।षड्योगिनीरष्टपत्रेमातरःप्रजयेत्क्रमात्॥१२॥चतुरस्रेलोकपालाःपुनर्देवींसमर्चयेत्॥ ॥इति ५२

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीविजयानित्याविधिः॥ ईश्वरउवाच॥ ॥ अथवक्ष्ये महेशानि नित्यां वै सर्वमंगलां। जीववाक्पणतारावं सर्वं
तेमंगलापदं॥ १॥ ॐ तं हृदयमालिख्य नवार्णा सर्वमंगला। ऋषिश्चंद्रो महेशानि गायत्रं छंद उच्यते॥ २॥ देवीयं
वीजशक्तीच वीज हृत्हृद्दमेवच। विद्यामागत्रयेणैव द्विरावृत्त्या षडंगकं॥ ३॥ शुभ्रपद्मासनां रम्यां चंद्रकुंदसम
प्रभां। सुधमन्नां शशिमुखींनानारत्नविभूषितां॥ ४॥ अनंतमुक्ताभरणां स्रवंतीममृतद्रवं। वरदाभयपृशोभाढ्यां
स्मरेत्सौभाग्यवर्द्धिनीं॥ ५॥ एवं ध्यात्वा जपेद्वर्णलक्षं विजितमन्मथः। तद्दशांशेन जुहुयात्कुंभपद्मैर्घृतप्लुतैः।
६॥ अष्टपत्रंच षट्कोणं विंदुं तत्रावाह्य सुरेश्वरीं। उपचारैः समभ्यर्च्य षडंगावरणं यजेत्॥ ७॥ अष्टपत्रेषु संपूज्याः शविवक
जवीश्वराः। उन्नः संपूज्य वर्धा चंद्रमंडलवासिनी॥ ८॥ इति सर्वमंगलाविधिः॥ ॥ ईश्वरउवाच॥ ज्वालामा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ लांप्रवक्ष्यामिपुरुषार्थप्रदांसदा। ॐकारबीजमुच्चार्य्यनमोभगवतीतिच॥१॥ज्वालामालिनिदेवीतिसर्वभूतसमा
५३ लिखेत्।हारकारनकेजातवेदसीतिज्वलंतिच॥२॥ज्वलयुग्मंप्रज्वलेतियुगंह्रमात्मकंद्विधा।वह्निंद्विधाव
कवचमस्त्रंवापिसमालिखेत्॥३॥चत्वारिंशद्वर्णरूपावस्वर्णोचक्रमाङ्ग्वेत्।ऋषिस्तुकाश्यपश्छंदोगायत्रीदे
53 वतात्वियं॥४॥रेफाख्यंबीजशक्तीचकीलकंकवचंप्रिये।रविसंख्यशराश्चाष्टवेदैरंगानिविन्यसेत्॥५॥चत्वा
रिंशद्दलंपद्मंचतुराधिकमीश्वरि।बहिरष्टदलंपद्मंबाह्येभूबिंबमालिखेत्॥६॥कर्णिकायांमहाविद्यांदलेषु
क्रमतोलिखेत्।ङुर्गावर्णास्ततोदेविवसुपत्रेस्वराह्लिखेत्॥७॥द्वंद्वशःपरमेशानिवह्निवर्गेणवेष्टयेत्।ङनाविं एम॰
घांचभूबिंबेशाद्दक्षिणेपनवेष्टयेत्॥८॥जातवेदचसेख्यंस्तुसुनवामसोममराति।यतोनिदहातिवेदःसनत्र्याति ५३

© Dharmartha Trust J&K. Digitized by eGangotri

खेत॥९॥उत्तप्तांतेदनिविश्वनावेत्वासिंधुंडुरितातपम्निरालिखेत।एषाडुर्गावरारोहेजातवेदस्वरूपिणी॥१०
अस्मिन्यंत्रेसमासीनांज्वालामालांप्रपूजयेत।आदौपीठसमभ्यर्च्यदिक्षुमध्येचशक्तिभिः॥११॥जयाचवि
जयाभद्राभद्रकालीसुमुखापि।दुर्मुखीचतथाव्याघ्रमुखीसिंहमुखीतथा॥१२॥दुर्गाचैताःसुसंपूज्यदेवी
मावाहयपूजयेत्।आदावंगानिसंपूज्यततोदेवींसमर्चयेत॥१३॥जात्टतीतपनीवेदगर्भादहनरूपिणी।सेंदु
खंडाशुभाघातहंत्रीनस्वस्वातथा॥१४॥वागीश्वरीमृदवहासोमरूपामनोजवा।मरुद्वेगाचरात्रिश्वतीव्रकोपा
यशोवती॥१५॥तोयात्मिकावनितापाचदयावत्पथहारिणी।तिरस्क्रियादेवमातातथाचमदनप्रिया॥१६॥समा
राध्यानंदिनीचतथाचण्डमर्द्दिनी।घण्टमुखीखंडिनीतिएषाडुर्गागायत्रि कातथा॥१७॥निरवघाविशालक्षीवा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ५४ मोह्याहावनंदिनी विद्रनावह्निगर्भा च वह्निवाहा तथैव च ॥१८॥ धुर्या च डुर्वहा वैवरिरं सा तापहारिणी ॥ त्यक्तदोषा च संप
५४ न्नाशरश्चादिश्व स्त्रजपेत ॥१९॥ अष्टमे मातरः शन्याश्च विवेकक्तवीश्वरः पुनर्देवीं समभ्यर्च्य स्वर्णाभरणभूषितां ॥२०॥ उद्य
54 द्दिग्धक्लताकांति स्वर्णांशुक विराजितां ॥ महासिंहासने घोरां ज्वालामालां करालिनीम् ॥२१॥ अरिं शंखं खड्ग रिपुं खे
टं त्रिशूलं डमरुं तथा ॥ पानपात्रं च बिभ्रंदंदधतीं संस्मरन्यजेत ॥२२॥ ज्वालामाला महाविद्या रिपुं हंति न संशयः ॥ ॥
इति ज्वालामालिनी नित्याविधिः ॥ ॥ ईश्वर उवाच ॥ अथ वक्ष्ये महेशानि विचित्रां विश्वमातरं । यस्याः स्मरणमात्रेण
पलायंते महापदः ॥१॥ चकारांतु यहाविंहि दुःखषितं मनुमालिखेत । ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रं छंद उच्यते ॥२॥ राम॰
विचित्रा च देवता बीजं ककारः कीलकं च ठ । तारा तु जशक्तिः स्यात पुरुषार्थ प्रदायिनी ॥३॥ षड्दीर्घस्वरभेदेन न्यसेदंगा ५४

© Dharmartha Trust J&K. Digitized by eGangotri

निदेशिकः।येवंतुमातृकायास्तुपूजादेव्यास्तथाभवेत॥४॥मातरोलोकपालाश्चपूज्यादेवीजपेद्बुधः।रविलक्षंदशां
शेनजुहेनत्घृततिलैर्यमी॥५॥स्तंभनेपीतवर्णेयंक्षेपेवंध्रूकसंनिभा।मारणेश्यामलांगीयमुच्चाटेध्रूमसंनिभा॥६॥
शुभांगीज्ञानदानित्यंविचित्रवसनासदा।विचित्रभूषणानित्यंविचित्रांकुंकुमोज्ज्वला॥७॥वरदाभयशोभाढ्यानाना
शस्त्रधराक्वचित।क्रमेणकथितानित्यासर्वसौभाग्यदाप्रिये॥८॥ ॥इतिश्रीदक्षिणामूर्त्तिसंहितायांनित्याविवर
णंनाममहाविंशतिःपटलः॥ ॥ईश्वरउवाच॥एतत्सर्वात्मकंवस्तुत्रिपुरेत्यभिधीयते।एषासत्त्वाश्रितादेवीजा
ग्रदित्यभिधीयते॥१॥तदेयंशक्तिरूपास्यात्तस्कंजंभीडुवनत्रयं।उत्पत्तिर्जागरोबोधोद्याह्यनिर्मनसःसदा॥२॥
कलाचतुष्टयंजाग्रदवस्थायांव्यवस्थितं।एषैवतमसायुक्ताशिवस्त्रसानिगद्यते॥३॥मरणंविस्मृतिर्मूर्छानिद्रा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ५५ 55

त्वतमसावृता। सुषुप्तेषु कलाज्ञेया सुषुप्तिः शिवरूपिणी॥४॥यदा द्वंद्वात्मिका देवी रजोरूपा मयात्मिका। संयोगः स
त्वतमसो रजस्तथाभिधीयते॥५॥सुषुप्तांते जागरादौ स्वप्नावस्था रजोमयी। अभिलाषो भ्रमश्चिंता विषयेषु मनःस्मृ
तिः॥६॥कलाचतुष्टयं स्वप्नावस्थायां तु विधीयते। गुणातीता यदा देवी सा तुर्येत्यभिधीयते॥७॥सुषुप्त्यादौ जा
गरांते स्फुरन्ना मात्रलक्षणा। अवस्थाशेषतां प्राप्ता स्फुर्या तु परमा कला॥८॥भावाभावविनिर्मुक्ता गुणातीता
निगद्यते। वैराग्यं वस्तु सुस्तुत्वं शमादि विमलं मनः॥९॥सदसद्वस्तु निर्द्धार स्फुर्यायास्त्र कलाश्चमाः। तुर्यैव परिपा
केन कला सप्तदशी भवेत्॥१०॥इतरं भाफलादीनां पाकेन मधुरो रसः। अतएव महेशानि कला सप्तदशी भवेत्॥११॥ रम॰
उच्चार्यमाणा ये मंत्रास्ते मंत्रावाचिकाः स्मृताः। उच्चाररहितं वस्तु चेतसैव विचिंतयेत्॥१२॥चिंतनात्सामरस्येन सा ५५

स्त्राद्वैतैवकेवलं।अतएवमहाविद्यातुर्यरूपावरानने॥१३॥कलाषोडशकंचैतच्छ्रीविद्यार्णेषुसंस्थितं।निःसरंति
महामंत्रायथाग्नेर्विस्फुलिंगवत्॥१४॥तथैवमातृकावर्णानिःसृतावाग्भवात्प्रिये।अतएवतदेवास्याबीजंवाग्भवमु
च्यते॥१५॥तेनैववाग्भवेनासौत्रैलोक्यंसचराचरं।मोहयंतीतदादेवीकामेशीबीजरूपिणी॥१६॥पुरुषस्त्रीमयेनासौ
स्फुरंतीविश्वमातृका।महामोहेनदेवेशीकीलयंतीजगत्त्रयम्॥१७॥अतस्तत्कीलकंदेविनेनसौभाग्यगर्विता।पा
लयंतीजगत्सर्वंतेनेयंशक्तिरुच्यते॥१८॥एवंकूटत्रयकलामहासाम्राज्यदायिनी।तदालक्ष्मीमयीदेवीजागर्ति
भुवनत्रये॥१९॥महाकोशेश्वरीहृंदमंडिताभुवनेश्वरी।एषैवकोशसंपत्ताकामाद्वेश्वरयतेपरा॥२०॥कामेश्व
रीतदादेवीकामाद्वेश्वरयतेसदा।महासिंहासनेप्रोढाविश्वाधारस्वरूपिणी॥२१॥अकथादिमहापीठहंसवर्णा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
५६
56

स्वरूपिणी।तदाकल्पलतादेवीवाक्कउष्यज्ञानमत्कला॥१२॥सौभाग्यदायिनीनित्यंरत्नतेजोविभूषिता।जीवाद्यु
ग्रहसर्गेणस्फुरंतीविश्वमातृका॥१३॥चतुरायतनैर्वेद्याचतुर्वेदनमस्कृता।सास्नावाक्षत्रदादेवीभुवनानंदमंदि
रा॥१४॥अतस्त्रैलोक्यसाम्राज्यप्रदायिन्यात्मका प्रिये।एतत्सर्वंपुरस्कृत्यवर्ततेत्रिपुराशिवा॥१५॥प्रपंचमध्ये
देवेशीकेवलाब्रह्मरूपिणी।अतएवमहादेवीकलासप्तदशीभवेत्॥१६॥षोडशार्णस्वरूपापिनित्याषोडश
त्मिका॥इतिश्रीदक्षिणामूर्त्तिसंहितायांनित्याविवरणंनामत्रयोविंशोध्यायः॥ ॥श्रीपार्वत्युवाच॥त्रिपुराप
रमेशानीसर्वमंत्रमयीशिवा।संविद्रूपात्वकथिताकथंइज्यासदाशिवा॥१॥ईश्वरउवाच॥प्रातरुत्थायपशिर राम॰
सिसंस्मरेत्पद्मसुज्ज्वलं।कर्पूराभस्मरेत्तत्रश्रीगुरुंनिजरूपिणं॥२॥स्मेरप्रसन्नवलसद्भूषामंडितंशांतिभूषितं।व ५६

© Dharmartha Trust J&K. Digitized by eGangotri

२हस्त्रूमात्मकमालिख्यहसक्षमलवानिलान्।वह्निष्ठक्रांस्त्रिधालिख्यत्रिधासंशष्यचस्वैरैः॥३॥८

म१ रा पकरंनित्यंनमस्कृत्वाएनापजेत्॥३॥सेंडस्वबेष्ठनावांमांगश्रुतिनेत्रेषुमंडितैः।वीजत्रयमिदंमेद्व्विंडुना
दकलात्मकं॥४॥श्रीपरांतेपावकेतिमर्वाराध्यपदंलिखेत्।सर्वमूर्द्वपरांतेनाथमर्वगुरुस्तवस्वयं॥५॥गुरुश्रीगुरुना
श्रुति थांतेनैसहसक्षमलांडुपान्।रेफदीर्घस्वरयुतान्विंडुनादकलात्मकान्॥६॥पिंडीकृत्यलिखेदाद्यंचतुर्थंचततो
लिखेत्।तृतीयंपूर्ववल्लिख्यद्वितीयमपिपार्वति॥७॥ततःश्रीशंभुगुर्वंतिपुनराद्यंसमालिखेत्।आद्यंकूटचतु
ष्कांतेचाद्यंतात्रयमालिखेत्॥८॥वसुसंख्यैस्तुदेवेशिचत्वारिंशद्भिरक्षरैः।मंडितोयंमनुर्देविस्मरेत्रिजगुरोःप्रि
ये॥१०॥मूलादिब्रह्मरंध्रांतंविस्वतंतुतनीयसीं।उद्यदादित्यरुचिरांस्मरेद्सुभशांतये॥११॥क्लींमात्मकंकाम
देवसर्वंतिजनंवालिखेत्।प्रियांहृदयांतोयंमनुर्देविमुक्तये॥१२॥चतुर्लक्ष्मपएमिर्वक्त्रांक्षालयतमिद्धिहेतवे।

५

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
५७

57

स्नानकर्मततःकुर्यान्मूर्द्धानंशोधयेत्ततः॥१३॥मंत्रेणोच्चरयेत्सुद्राद्योमंत्रीपापनिकृंतनः॥आत्मविद्याशिवैस्त्वैवेरा
वेमहृद्धियथाविधि॥१४॥त्रिविधंतर्पणंकुर्याद्देवऋषिपितृपूर्वकं॥विद्ययाथततोमंत्रीसर्वालंकारभूषणः॥१५॥रक्ता
वस्त्रांगरागस्त्रक्रक्तासनगृहेस्थितः॥विद्ययातत्वरूपिण्यात्रिरावृत्याभिषेचनं॥१६॥विधेवत्रिधादेविचुलकेनोदकं
सुधीः॥गृहीत्वाचिंतयेत्तत्रहृदंबनाद्यागतंप्रिये॥१७॥नामकुक्षिस्थितंपापपुरुषंकज्जलप्रभं॥ब्रह्महत्याशिरोयस्य
स्वर्णस्तेयंकरौप्रिये॥१८॥सुरापानंहृदंगानिपातकानिवकृत्यपि॥उपपातकासंख्यास्त्ररोमाणिपरमेश्वरि
१९॥नानापातकसंघास्तुसर्वांगानिविचिंतयेत्॥खड्गचर्मधरंदेविमानसेचिंतयेद्बुधः॥२०॥भूमौवज्रशिलांध्या
त्वापातयेत्तत्रसुंदरि॥अथार्घ्यंरवयेदद्यात्विधासोरमंतुंस्मरन्॥२१॥हल्लेखाहृदयंदेविशिरोहंसस्ततोवदेत्॥

ग्म॰
५७

© Dharmartha Trust J&K. Digitized by eGangotri

वेदाक्षरीमहाविद्यासर्वमौराधिदेवता ॥२२॥ भास्वद्रत्नौघमुकुटस्फुरच्चंद्रकलाधरां। मघः संततन्नहेमाभां सूर्यमंड
लरूपिणीं ॥२३॥ वाक्कूटांते लिखेद्देवि वाग्भवेश्वरि विद्महे। द्वितीयकूटस्य चान्ते कामिनीश्वरी धीमहि ॥२४॥ तृती
यकूटस्य चान्ते तन्नः शक्तिः प्रचोदयात्। यथाशक्ति जपं कुर्याद्धि विद्यां च ततो जपेत् ॥२५॥ अथ यागगृहं यथा दल
नाकविशेषितं। अनेकचित्रस्तंभगं भैमोगोमयचर्चितं ॥२६॥ उपरिष्टाल्लसत्पुष्पस्तंभगंधूपधूपितं। दीपमालावली
रम्यं विकीर्णकुसुमोज्वलं ॥२७॥ तत्रागत्य यजेद्विद्वान्मौनी ज्ञानी सदा शुचिः। सर्वाभरणसंपन्नस्त्रिपुरार्चणमंडपं ॥२८॥
उत्तं नमोनेन नश्ज्ञामंडपस्य स्तुलोचने। गणपं क्षेत्रपालं च धातारं च विधूर्वकं ॥२९॥ गंगां च यमुनां चैव तथा शंखनिधि
क्रमात्। ततः पद्मनिधिं पश्चाद्वास्वं ते पुरुषं यजेत् ॥३०॥ द्वारे श्रियं गणेशं च पूजयेच्च सरस्वतीं। देहलीमपि संपूज्य

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ५८ 58

जेयंद्वारमंडले ॥३१॥ हल्लेखांचश्रियोवीजमादौसंयोजयेत्ततः । नामांते श्रीपदंवाच्यंपादुकांपूजयामिचे ॥३२॥ अने
नक्रमयोगेनसंपूज्याः सर्वमातरः । रक्तासनोपविष्टस्तुचक्रोद्धारंसमाचरेत् ॥३३॥ शक्त्योपविष्टांशक्तिंतुविलिखे
द्विस्तृतांसमकरां वह्निनांतेपुटीकुर्यात्संधिभेदक्रमेणतु ॥३४॥ अग्नीशास्तुरेखापश्चिरेखाविस्तीर्य्ययोजयेत् । दशको
णंयथादेविजायतेतद्वदेवहि ॥३५॥ मध्यकोणचतुष्कस्यरेखाग्राकृष्यतुद्विमार । तत्रसंधिविभेदेनमन्वस्रंजाय
तेयथा ॥३६॥ समत्रिकोणशक्त्यैकंपंचस्तुखदंनेत्रयोर्यथा । स्तुश्रीकंसंधिभेदेननागज्ञेररेखाविज्ञंभितं ॥३७॥ वहिरष्ट
दलंपद्मंस्तुवृत्तेनसमालिखेत् । तद्वत्षोडशपत्रंहिविलिखेत्प्रयत्नतः ॥३८॥ स्तुवृत्तंपरमेशानिततोभूविंवमा
लिखेत् । चतुर्द्वारविशोभाढ्यंतुष्यंतत्रविनिक्षिपेत् ॥३९॥ गंडकीभवपाषाणेस्वर्णेरजतताम्रयोः । काश्मीरद

राम॰ ५८

© Dharmartha Trust J&K. Digitized by eGangotri

र्प्पणे भूर्जे चर्चापीठे लिखेद्बुधः ॥ ४० ॥ शलाकया सुवर्णस्य मिश्रया घुसृणेन्दुभिः । सिंदूररजसा मिश्रैः पटे धातुम
ये लिखेत् ॥ ४१ ॥ अथवा भूतले देवि सुरेखं कुसुमेन वा । सिंदूररजसा वापि लिखेत्सर्वार्थसिद्धये ॥ ४२ ॥ एतच्चक्रं म
हेशानि मध्ये बिंदुविराजितं । ततस्त्रिकोणं चाष्टारं दशारं च दशारकं ॥ ४३ ॥ मनुकोणं महेशानि मध्यचक्रमिदं प्रिये ।
वेदद्वारष्टकोणं तं सर्वमध्यं सुरेश्वरि ॥ ४४ ॥ चत्वारिंशद्गेहान्ध्यां त्रिभागैरपि पार्वति । वसुपत्रं कलापत्रं चतुरस्रं
कमात्प्रिये ॥ ४५ ॥ नवात्मकमिदं भद्रे नवयोन्यंकितं भवेत् । यथेष्टाशामुखो मंत्री ततस्तत्कर्म्मविधौ सुधीः ॥ ४६
प्राङ्मुखः समुपासीनो गुरुं नत्वा निजं ततः । पूर्वोक्तमनुना सम्यक्स्तनाम्भव संस्मरेत् ॥ ४७ ॥ पार्ष्णिघातकरास्फो
टैरूर्ध्वदृक्स्फक्रमांचिकः । खभूस्तानि संत्रासकरस्तुध्यादिकं यजेत् ॥ ४८ ॥ आद्यं द्वितीयं वर्णे स्यात्त्रिपुरेशं पतिमं

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ लिखेत।आद्यहृद्यंविंदुनादकलाद्यंत्रिपुराभवेत॥४९॥तंत्रमस्यामहेशानित्रिपुरेशीवनान्यथा॥मध्यमादितलांतं
५९ उकारश्शुद्धिविधौयजेत॥५०॥ततआत्मासनंदद्यात्सुंदर्यापरमेश्वरि।वाग्भवंत्रिपुरेश्वर्याहित्वातत्रविनिक्षिपेत॥५१
59 हृल्लेखांसुंदरीनामात्रिपुरेशीव [illegible] पूजनं।चक्रासनंततोदद्यात्पुरवासिन्यधिस्थितं॥५२॥
त्रिपुरेश्यास्त्रिवीजेषुहकारंयोजयेत प्रिये।पुरवासिन्यसोभद्रेत्रिपुरेशीवपूजनं॥५३॥त्रिपुरेशीहसाद्यास्याद्ध्री
जस्तुगेमतथांतिमे।शिवाद्यांश्रीरियंसर्वमंत्रासनविधौयजेत॥५४॥सुंदर्यास्त्रितिमंहित्वावलेमात्मकामदारं।सं
योज्यमालिनीदेवीसाध्यसिद्धासनस्थिता॥५५॥तंत्रमस्यामहेशानित्रिपुरेशीवसंभवेत।आत्मरक्षांप्रकुर्वीत रम॰
त्रिपुरेश्यामहेश्वरि॥५६॥संपत्प्रदाभैरवीयमंते सर्वसमन्विता॥मूर्त्यावाहनविद्यातुसिद्धांवापरमेश्वरी॥५७॥ ५९

गी

© Dharmartha Trust J&K. Digitized by eGangotri

संपत्प्रदा भैरवी वश्यजननं परमेश्वरि ॥ ॥इति श्रीदक्षिणामूर्त्तिसंहितायां करशुध्यादिस्त्रयोविंशः पटलः ॥ ॥ईश्व
र उवाच । शिवचंद्रौ मन्मथारः शक्तिर्वैविंदुमालिनी । क्षमा विंदुईमात्राश्च नववर्णा भवंति हि ॥ १ ॥ शिवाद्भून्यमयी
देवी व्योमाकारेण संस्थिता । विश्वं स्वात्मनि चिद्रूपे वहंती सकलालया ॥ २ ॥ चंद्रेण द्रावयंती यं स्थूलादि ब्रह्ममंदिरा
त् । आप्लावयंती सकलं सृजंती विश्वमातृका ॥ ३ ॥ मान्मथेन मनोरूपात स्मात्तेजोमयी ततः । विस्तारयंती सकलं
विश्वयोनिरितीरिता ॥ ४ ॥ अंतःकरणरूपात्तु विश्वं तन्मातृका भवेत् । अंतर्मयि इति विख्याता पथ्येदं धार्यते जगत् । पा
श्नतएव क्षमारूपा जगद्धात्री परा भवेत् । एवं वै न्दवमासीना नादरूपमहेश्वरी ॥ ६ ॥ नादातीता विचारे तु विचारा गो
चरा ततः । एवं ब्रह्ममये देवी ऐंजीपते त्रिपुरा मनुः ॥ ७ ॥ नान्यैर्वर्णैर्महामंत्राः स्तम्भगाया भवंति हि षुद्राश्च शवला मंत्राश्च

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ थाचोमयसंज्ञकाः॥८॥ शुद्धविद्यास्त्र्यएकेन्द्रोऽदेसर्वाम्नायैर्नमस्कृताः। कामोकामेशोशक्तिरेवर्य भूयावाग्भवंपञ्जे
६० त॥९॥ अनेनचविलिख्यंतेविद्याःसर्वागमेश्वरीः। मदनात्तुजहः कामेमदनायजउच्यते॥१०॥ हित्वाउजंशिवं
60 सायेविद्येयंमतुहृद्गता। कामःसहायजोवाचिशिखिकामात्तुजंविना॥११॥ महाद्यंमदनेशक्तौहसाद्यंकाउजंविना॥
चंद्राराधितविद्येयंभुक्तिमुक्तिफलप्रदा॥१२॥ अत्तुजेनविनाकामोहसादिर्वाग्भवेस्मरेत्। हसादिर्मदनेशक्तौह
सादिःकाउजंविना॥१३॥ कुबेराद्दिष्ठिताविद्याभुक्तिमुक्तिफलप्रदा। हित्वाहंवाग्भवंकामहसादिःकोमही
मतुः॥१४॥ तुर्यैकादशमेहित्वाशक्तिकूटेथछिख्यते। कामात्तुजत्रयंहित्वासहसाद्योंगजस्तदा॥१५॥ लोपा रम्॰
मुद्रोपासितेयंभुक्तिमुक्तिफलप्रदा। इयंविद्याशक्तिकूटेमहानादार्थसिद्धिदा॥१६॥ कामराजाराधितेयंभुक्ति ६०

© Dharmartha Trust J&K. Digitized by eGangotri

भुक्तिफलप्रदा। एतस्याएवविद्यायाःशक्तिपिंडनतीद्वयं ॥१७॥ हित्वाहसादिर्गदितागस्त्याराधितदेवता।
धर्मार्थकाममोक्षाणामालयंसंप्रदायतः ॥१८॥ हित्वाद्यभुगलंचापिमाद्यंकामेशिवादिकं। शक्तिपिंडस
नंतत्स्वाकामंतत्रविनिक्षिपेत् ॥१९॥ शक्रागस्त्यविद्यावन्नंद्याराधितदेवता। क्राउजानंत्रयंतत्स्वाहसा
द्यंवाविमन्मध्ये ॥२०॥ सहाद्यमंतेसहयोर्मध्येकःस्तूर्यप्रजितः। अगस्त्यकूटत्रितयंस्तूर्यकामंसमालिखेत् ॥२१
पुनस्तकलमध्येंशंतार्तीयंचाद्यसंलिखेत्। सहाद्यंविष्णुमध्येयंषट्कूटापरमेश्वरी ॥२२॥ अगस्त्याद्यंवाग्भ
वंस्याद्धेतंदेवसकादिलं। विष्णुविद्यापंचमंचस्कंदाराधितदेवता ॥२३॥ अगस्त्यस्यद्विधाविद्यांविलिख्यमनुवि
न्नमः। चतुर्थीपंचमीमायांत्यजेच्छिवहृदिस्थिता ॥२४॥ वाग्भवस्थंचतुष्कंचकामराजस्थपंचकं। शक्तिकूट

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ त्रिवर्णंचकामराजस्यसंलिखेत॥२५॥मायास्थानेह्रींवर्णयुगलंचक्रमालिखेत।इर्वासमासञ्जितेयंपुरुषा
६१ र्थप्रदायिनी॥२६॥एतेद्वादशमंत्राःस्युःश्रुध्याःसर्वार्थसिद्धिदाः।अन्येपिशुध्यभेदास्तेकथ्यंतेस्रूपयातव॥
61 २७॥मेदस्त्कमतुविद्यायानास्तिसर्वागमेष्वपि।शिवचंद्रकशक्तीलह्लेखावाग्भवेभवेत॥२८॥जीवेशामदे
नेकाररविंडुस्तकपृथिवीपरा।एतत्तकामेचतान्त्रीयेद्वितीयाचंद्रसञ्जिता॥२९॥कुवेरशक्तिक्षटंचकामक्ष्मे
दंसमालिखेत।वाग्भवेकामराजेचशक्तिवीजमथोलिखेत॥३०॥शिवकामेशशक्तीलपराधनदासञ्जिता
अपरेयंमहाविद्यालोपामुद्राचकथ्यते॥३१॥अगस्त्यस्यमहाविद्याकामराजःसएवहि।अगस्त्याराधिता राम॰
विद्यासेवागस्त्यप्रसञ्जिता॥३२॥विद्यांतिमंवाचिकामेमादिकामस्यमन्मथं।महयुग्मादिकामांत्यंशक्तो ६१

© Dharmartha Trust J&K. Digitized by eGangotri

नंदीशश्च जिता ॥ ३३ ॥ भेदस्त्वस्य सूर्य्य विद्याया नास्त्येव परमेश्वरि । विस्फविद्यांतरं वक्ष्ये क्षटत्रयविराजितं ॥ ३४
जीवेशस्थापरा वाचिकामे विस्फश्च पंचमं । शक्तौ कामांतिमं विद्या द्वितीया विस्फश्च जिता ॥ ३५ ॥ हसशक्तीक
क्षमापाक्षटमेतत्त्रिधा लिखेत् । वाचिकामे तथा शक्तौ कंदश्चन्यापरा भवेत् ॥ ३६ ॥ अगस्य सम नैर्ज्ञेयं पर
वाचिहलांतगा । कामेत्रयांतेश्च जीवौ त्रिक्षटाशिवश्च जिता ॥ ३७ ॥ एते भेदा वरारोहे शुद्धाः सिद्धिप्रदायकाः । शु
द्धभेदद्वयं वक्ष्ये भोगमोक्षफलप्रदम् ॥ ३८ ॥ जीवेशकामभूयावाचिकामेपि संलिखेत् । इदमेव पुनः शक्तौ
विद्येयं शक्रश्च जिता ॥ ३९ ॥ कशक्तिविंदुमालाढ्याः शक्तिक्षटं षडक्षरं । वाचिकामे हकाकाशेस्याकाशाभि
समन्वितं ॥ ४० ॥ शक्तौ कशकलाकैंलौंकाशवह्निमत्परमेश्वरि । उन्मनीनाम विद्येयं केवलं मोक्षदायिनी ॥ ४१ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

द·सं· एतेशुद्धाःसदाजप्ताःसिद्धिदानात्रसंशयः।अथवक्ष्येमहेशानिमंत्रान्शवलसंज्ञकान्॥४२॥कामराजस्यविंडस्य
६१ ज्ञात्वाकामाक्षरंक्षिपेत्।तेनैवशक्रसंपूज्याविद्येयंभुक्तिदा॥४३॥कामराजस्यविद्यायामध्येजीवंविनोच्चरेत्।अं
62 त्येजीवःशिवस्थस्तत्कविद्यावरुणपूजिता॥४४॥एतस्याएवविद्यायांहित्वाविंडस्वजंक्षिपेत्।तेनैवकामंविद्येयं
धर्मराजस्तुपूजिता॥४५॥कसकहस्यादिह्स्लेखेहसलेस्मरहक्षम्या।ह्ल्लेखामन्मथेशक्रोसकलाग्निमयीपरा
॥४६॥वह्निनापूजिताविद्यामहाविघ्नौघघातकी।अगस्त्यक्षरद्युगलंवह्निपूज्यांतिमंलिखेत्॥४७॥विद्यापन्नग
राजेनपूजिताभुक्तिमुक्तिदा।कशक्तिवह्निद्युगलस्थवह्निभुवनेश्वरी॥४८॥हकलाग्निहलामायासरकाद्या राम०
ग्निमंडिता।मायावायुयुग्मन्येयंमहापापौघभंजनी॥४९॥केशक्तिर्वैदेवीवह्निकामामायाहकहालरा।मायास ६१

© Dharmartha Trust J&K. Digitized by eGangotri

हृक्षशक्राग्निमायेयंसौम्यश्चजिता॥५०॥कामाकाशक्रमामायाशिवकामहक्षत्तरा।मायाकामेशशक्तिक्रुटेस
कलाभुवनेश्वरी॥५१॥ईशानाधिष्ठिताविद्यासर्वकामप्रपूरिणी।कामराजस्ययुग्मांतंजीवक्लमामादनापरा॥५२॥
रत्याराधितविद्येयंसर्वकामार्थसाधकी।कामाधिष्ठितविद्यांतेविलोमांतांसमालिखेत्॥५३॥नारायणाधिष्ठि
तेयंषट्कूटापरमेश्वरी।कामाद्यंवाग्भवेकामेहकहक्लापराभवेत्॥५४॥शक्त्यावगस्यवाक्कूटंविद्येयंब्रह्मस्
जिता।अगस्त्यंवाग्भवंवाविद्यब्रह्मविद्यांतिमद्द्वयं॥५५॥जीवार्जितामहाविद्यासर्वकामप्रपूरिणी।एभिर्द्वादश
भिर्भेदैःशवलापरमेश्वरी॥५६॥ शुद्धशुद्धामहाभेदाज्ञातव्यापरमेश्वरि।विद्याःसंलिख्यशुद्धाःक्रमविपरीता
स्ततोलिखेत्॥५७॥ताएवहितदाशुद्धशुद्धाविद्याभवंतिहि।यावंतःशुद्धभेदाःस्युस्तावंतस्तेक्रमात्प्रिये॥५८॥

© Dharmartha Trust J&K. Digitized by eGangotri

द·सं·
६३
63

तथैवशवलहंद्वभेदादेविभवंतिहि।भेदाःसर्वेत्वयापीद्यमाययात्वर्यसंज्ञकाः॥५९॥तेज्ञानगहनाद्ब्रह्मरूपा
स्कपरमेश्वरि।ज्ञातव्याशुरुवक्त्रेणत्वन्यथाशापमाप्नुयात्॥६०॥अथवक्ष्येमहेशानिचतुर्द्ज्ञानमुत्तमं
।एकधाकथितंचैतत्प्रकारांतरमुच्यते॥६१॥यस्यस्मरणमात्रेणवाजिपेयशतंभवेत्।वक्ष्यमाणंवीजयुग्ममा
दौसंयोज्यसंस्मरन्॥६२॥पराशरोऽस्वरंद्वादिद्वितीयोभेदउच्यते।एतद्वेदादिसंसेव्यंतृतीयोभेदउच्यते।६३
स्वयंब्रह्मामहेशानिसकृदुच्चारणाद्बुधः।अथतुर्यप्रकारस्तुकथ्यतेशुविडर्जभः॥६४॥यस्यस्मरणमात्रेण
पलायंतेमहापदः।स्वयंब्रह्मास्वयंविष्णुःस्वयंरुद्रोनसंशयः॥६५॥किंपुनर्देवदेवेशिस्वयंकामेश्वरोवि राम·
भुः।अश्वमेधसहस्राणिवाजिपेयस्यकोटयः॥६६॥नरमेधसहस्राणिसकृदुच्चारणात्प्रियेकाशपादि ६३

© Dharmartha Trust J&K. Digitized by eGangotri

तीर्थयात्रासहस्रप्रादक्षिण्यंपुंवस्तथा।।६६।।गंगास्नानसहस्राणिनामोच्चारेणमंत्रिणः।।किंपुनर्देविसाक्षान्मंत्रीब्रह्म
नसंशयः।।६८।।द्वितीयस्यादिपुग्मंतुविपरीतंलिखेत्सुधीः।कुलांवांतर्गतंकृत्वाविलिखेच्चततःपरम्।।६९।।ए
तत्संपुटितांकुर्यात्तत्तीयांपरमेश्वरी।श्रीविद्येयंसमाख्यातावर्णितुंनैवशक्यते।।७०।।जिह्वाकोटिशतैर्देविको रि
वक्त्रशतैरपि।पंचास्येनमहादेविवर्णितुंशक्यतेकथं।।७१।।श्रीविद्यासर्वविद्यानांराज्ञीस्तोतुंनशक्यते।षोडशाक्ष
रसंपन्नास्वयंसप्तदशीकला।।७२।।श्रीगुरोःकृपयालब्धानिधिसिद्धिप्रदायिनी।अंतेनिरामयंब्रह्ममंत्रीभवतिनान्य
था।।७३।।ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकान्।उपपातकलक्षाणिहंतिश्रीस्मरणंक्षणात्।।७४।सर्वेक
लार्णमंत्राःक्ष भवंतिपरमेश्वरि।एकोनविंशदर्णास्तुनारायणीहरिहृये।।७५।।शिवविद्यांमहेशानिविद्धिसप्तदशा

© Dharmartha Trust J&K. Digitized by eGangotri

क्षां। हंहव विद्यास्त्वसकला एकोनविंशदक्षराः॥ ३६॥ नारायणी वैष्णवी च पंचविंशति वर्णका। ज्ञातव्या त्वगुरुवक्त्रे
णना च यथा शापमाप्नुयात्॥ ३७॥ चतुःषष्टिं पतः कोद्योयोगिन्यो मातृमंडलात्। विनात्तु रूपदेशेन साधकं नाशयंति
हि॥ ३८॥ ॥ इति श्रीदक्षिणामूर्त्तिसंहितायां श्रीविद्याविवरणं नाम चतुर्विंशः पटलः॥ ॥ ईश्वर उवाच॥ ॥ श्री
विद्यामानसो भूत्वा वाममागे महेश्वरि। चतुरस्रं जलेनैव मंडलं पूजयेत्प्रिये॥ १॥ गंधपुष्पाक्षतैस्तत्र यंत्रिकां पू
जयेत्तथा। शंखं तत्र च संस्थाप्य जलपूर्णं महेशि तु कं॥ २॥ सम्यगभ्यर्चितेनैव तु रतो मंडलं यजेत्। चतुरस्रं लिखेत्तत्र यंत्रि
कां स्थापयेत्सुधीः॥ ३॥ त्रिकोणं हृत्तषट्कोणं मंडलं पूजयेत्क्रमात्। समस्तां व्यस्तरूपां च त्रिकोणे पूजयेद्बुधः॥ ४॥
द्विरावृत्त्या षडंगैस्तु षट्कोणे पूजयेत्। गंधाद्यैश्चर्चितं धूपितं पात्रमुत्तमं॥ ५॥ यंत्रिकायां प्रतिष्ठाप्य पूर्वोक्तं यंत्रमा

रूप १ ^

© Dharmartha Trust J&K. Digitized by eGangotri

लिखेत्। तथैव श्जपेत्कामकूटं समुच्चार्य सुंदरि ॥ ६ ॥ स्वर्यपात्रमयं तत्र विशेषेण प्रपूरयेत् । भागत्रयं विशेषसम-
गमात्रं जलं क्षिपेत् ॥ ७ ॥ तत्रापि सं लिखेत्पूर्ववयंत्रं पूजां च कारयेत् । त्रिकोणे पूरयेद्विद्यां मध्ये कोणत्रये ततः ॥
८ ॥ कूटत्रयं क्रमेणैव यथा विद्या तथा विधः । श्रीविद्या विधये देवि संपुटत्वेन पूजयेत् ॥ ९ ॥ सर्वत्रापं क्रमो देव्या
नाज्ञालसंचरेत्तु प्रिये देवी मूलषडंगानि क्रमेण परिपूरयेत् ॥ १० ॥ शक्तिकूटं समुच्चार्य तज्जलं चंद्ररूपकं ॥
संपूज्य मध्ये ह्यस्त्वं तु मातृकात्मकमाचरेत् ॥ ११ ॥ पंचकोशमहाविद्याः संस्मरेत्तत्र सुंदरि । तार्तीयं श्रीगुरोर्वी-
जं हंस विद्यामंत्रं यजेत् ॥ १२ ॥ वारात्रयं ततो देवि श्रीविद्यां सप्तधा जपेत् । स्पृष्ट्वार्घ्यकं ततो गंधपुष्पाद्यैरर्चयेत्त-
तः ॥ १३ ॥ चिदानंदमयं धाम नेत्रहृदयगतं स्मरेत् । प्रोक्षयेत्तेन सकलं पूजाद्रव्यांतरं ततः ॥ १४ ॥ आत्मानमपि स-

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ६५ वेतद्विधारूपं भवेत्प्रिये। अंगुष्ठानामिकाभ्यां तु वाममार्गेण सुंदरि ॥१५॥ तत्वशुद्धेयमाख्याता महापापनिकृंति
नी। अंगुष्ठातर्जनीभ्यां तु ज्ञानमुद्रेयमीरिता ॥१६॥ अनया भूतसंज्ञा स्यात्तया तर्पणमर्जने। भूतशुद्धिविधिं कु
र्यान्मंत्री देहस्य शुद्धये ॥१७॥ वायुबीजेन देहस्थं धातवः पापसंभृताः। संशोष्य वह्निबीजेन पापेन सहितं दहेत
65 १८॥ पापं विना पुनर्देहममृतीकृत्य जीवयेत्। जलबीजेन देवेशि पार्थिवेन स्थिरीकुरु ॥१९॥ ततो देहस्य
सन्नाहं सम्यक् न्यासं समाचरेत्। करशुद्धिं पुरा कृत्वा चतुरासनदेवताः ॥२०॥ पादयोर्जंघयोर्जान्वोर्मू
लाधारे च विन्यसेत्। कनिष्ठांगुष्ठरहितैस्त्रिभिरंगैर्हृदि विन्यसेत् ॥२१॥ मध्यमानामिकाभ्यां तु न्यसेच्छि राम॰
रसि मंत्रवित्। अंगुष्ठेन शिखां चोर्ध्वाधोयं न्यसेद्दशभिः कवचं न्यसेत् ॥२२॥ हृदंगैस्तैर्नेत्रविन्यासं विन्यसेत्पर ६५

© Dharmartha Trust J&K. Digitized by eGangotri

मिश्वरि।तर्ज्जनीमध्यमाभ्यांतुततोस्त्रंविन्यसेत्प्रिये॥२३॥आत्मरक्षाकरींविद्यांहृदिस्तब्धार्य्यन्यसेद्बुधः
।व्यापकत्वेनसर्वांगेविन्यसेत्सिद्धिहेतवे॥२४॥अथवक्ष्येमहादेविश्रीविद्यान्यासमुत्तमं।संक्षोभिणींचित्
पेद्विद्यांब्रह्मरंध्रेस्फुरणप्रभां॥२५॥सर्वत्रैवाषोडशार्णांमहासौभाग्यदांस्मरेत्।वामांसदेशेसौभाग्यदंडि
नींभ्रामयेत्ततः॥२६॥रिपुजिह्वाग्रहांमुद्रांपादस्थलेविनिक्षिपेत्।त्रैलोक्यस्यत्वहंकर्त्रींध्यात्वैवंतिलकं
न्यसेत्॥२७॥संक्षोभिणीमेववदनेवेष्टनहेनविन्यसेत्।पुनःसंक्षोभिणींवदनेगलोर्ध्वंविन्यसेत्त्वया॥२८॥पुनः
संक्षोभिणींपादेहेवेष्टनत्वेनविन्यसेत्।व्यापकांतेयोनिमुद्रांमुखेक्षिप्त्वाभिवंदयेत्॥२९॥त्रैलोक्यंक्षोभयत्या
शुन्यासमस्त्रद्वविग्रहः।मुष्टिंधृत्वाचलेन्मंत्रीतर्ज्जनींदंडवत्तदा॥३०॥सौभाग्यदंडिनीनामरिपुन्दंडयतेक्ष

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ णात्।अंगुष्ठंतुष्टिंगंकुर्याद्दिगुजिंहाग्रहाभवेत्॥३२॥संयोज्यहस्तौदेवेशितर्ज्जन्यानामिकांयजेत्।तद्वद्वामे
६६ नसंमन्ज्ययोन्याकारेणयोजयेत्॥३३॥परिभ्राम्यानामिकांतुमूर्द्धानंपरितःप्रिये।ह्स्ल्रंछेंछिपेदेविमणिवंधं
66 न्यसेत्ततः॥३४॥ललाटेनामिकांकुर्यात्षोडशार्णांस्मराम्प्रिये।त्रैलोक्यमरुणंध्यायन्न्यासःसंमोहनाभि
धः॥३५॥पादयोर्जंघयोर्जान्वोःकट्योरंध्रुनिपृष्ठके।नाभौपार्श्वद्वयेचैवस्तनयोरंसयोस्तथा॥३६॥कर्ण
योर्ह्स्ल्रंछेंवद्वदनेध्रुनिपातयेत्।ततःकर्णप्रदेशेतुकरवेष्टनयोःक्रमात्॥३७॥संहारोयंमहान्यासोबीजैः
षोडशभिर्न्यसेत्।गोलकंचततःकुर्यात्त्रैलोक्यक्षोभकारकम्॥३८॥मातृकांविन्यसेत्पश्चादरुणांशग्रह राम॰
रूपिणीं।सकलाम्नायविद्याभिरंकितांविश्वमातरं॥३९॥शिरोललाटभ्रूमध्यकंठहृन्नाभिगोचरे।आ ६६

© Dharmartha Trust J&K. Digitized by eGangotri

धारेब्धहृत्कं यावद्ब्रह्मस्थायो गिनीर्न्यसेत ॥ ४० ॥ ब्रह्मरंध्रेलिकेनेत्रश्रुतिघ्राणोष्ठकेष्वथ । दंताधरोर्ध्वेयो
ई विविजिंहायां चोरक्षपके ॥ ४१ ॥ शृंखेमर्वांगहृदयस्तनकुक्षिषु लिंगके । श्रीविद्यार्णैर्न्यसेद्देविमहासर्व
समृद्धये ॥ ४२ ॥ काननाक्षिश्रुतिघ्राणगंडोष्ठेषु स्वांतरे । नेत्रयोर्वदने वर्णान्न्यसेत्सोभाग्यहेतवे ॥ ४३
कसीमंतललाटेषु भ्रुयुगे घ्राणवक्त्रयोः । करसंधिषु साग्रेषु षोडशार्णान्क्रमान्न्यसेत ॥ ४४ ॥ शिरोलला
टेभ्रूवक्त्रजिह्वापत्संधिकोटिषु । षोडशार्णान्न्यसेद्धक्तो स्वरस्थानेषु चक्रमात ॥ ४५ ॥ ललाटगलहृन्नाभि
मूलाधारेषु पंचकं । ब्रह्मरंध्रेमुखेस्वांते बीजत्रयमथान्यसेत । ४६ । आधारेहृदये ब्रह्मरंध्रे बीजत्रयं ततः । करपा
देषु हृदये पंचबीजानि विन्यसेत । ४७ व्यापकं गोलकं कुर्यान्महासोभाग्यहेतवे । श्रीविद्यां हृदये देविसंस्मर्णा

दे॰सं॰ विचयेसेतस्तुधीः।।४८।।अंगुष्ठैर्वानामयावापिमनसावान्यसेदयं।एवंविन्यस्तदेहाःस्तमुद्राःसंधारयेत्क्रमात्

६७ ।।४९।।पूर्वोक्तयोनिमुद्रायाःपृथक्करणंतत्रयंक्रमः।अंगुष्ठाभ्यांकनिष्ठाभ्यांमध्यमाभ्यांक्रमेणतु।।५०।।त्रिखंडा

नाममुद्रेयंत्रिपुराह्वानकर्मणि।अनामाभ्यांकनिष्ठाभ्यांमध्यमेरोधयेत्ततः।।५१।।अंगुष्ठावत्तुजालग्रौदंडव

त्तर्जनीद्वयं।क्षोभिणीयंमहामुद्राद्राविणीतुनिगद्यते।।५२।।एतस्याएवविद्यायामध्यमेतर्जनीस्तुते।सर्ववि

द्राविणीनामद्वितीयापरिकीर्तिता।।५३।।एतस्याएवविद्यायांतत्रतर्जनीमध्यमाभुगं।अंकुशाकाररूपेण

योजयेत्परमेश्वरि।।५४।।त्रैलोक्याकर्षणीविद्यातृतीयापरिकीर्तिता।पुटीकारौकरौकृत्वातर्जन्योवांकुशा एम॰

शाकृती।।५५।।परिस्पष्टक्रमेणाथमध्यमेतदधोगते।क्रमेणानेनमत्वात्वकनिष्ठानामिकाद्वयं।।५६।।संयो ६७

67

© Dharmartha Trust J&K. Digitized by eGangotri

न्यघर्षयेत्सर्वांगुष्ठावग्रदेशगो। सर्वविशकरीमुद्रावत्तुर्थोपरमेश्वरि॥५७॥ संमुखौतुकरौयोज्यौमध्यमा
गर्भगेत्वनुजे। तर्ज्जनीभ्यांवहिर्युक्तेअनामेसरलेकुरु॥५८॥ मध्यमानखदेशेतुततोंगुष्ठौचदंडवत्। उन्मादिनीना
ममुद्रापंचमीपरिकीर्त्तिता॥५९॥ क्रमेणपंचबाणस्थमनवःपरिकीर्त्तिताः। एतस्याएवविद्यायास्तर्ज्जन्यौमध्य
मानुजे। ६०। कुर्यान्महांकुशाकारौमुद्रेयंतुमहांकुशा। अंकुशाख्यंमहाबीजंमत्रस्याःप्रकीर्त्तितः॥६१॥ वामं
दक्षिणबाहुंतुदक्षिणंसव्यहस्तगं। बाहुंकुर्यात्ततोदेविहस्तौसंघर्षयेत्क्रमात्॥६२॥ कनिष्ठानामिकाद्वंद्वं
मध्यमापृष्ठगंततः। तर्ज्जनीमध्यमंकुर्याद्भयत्रमहेश्वरि॥६३॥ अंगुष्ठौसरलौकृत्वापार्थिवेयोजयेदिमां। खेच
रीयंमहामुद्रात्रैलोक्यक्षोभकारिणी॥६४॥ विजयाख्यंमहाबीजंमत्रस्याःप्रकीर्त्तितः। एषामसमयमुद्रेवसर्वेषां

© Dharmartha Trust J&K. Digitized by eGangotri

द०सं० परिकीर्त्तिता ॥ ६५ ॥ परिस्पष्टोकरौ देवि त्वर्द्धचंद्राकृती ततः । तर्ज्जन्यंगुष्ठयुगलमुगपत्कारयेदृथा ॥ ६६ ॥ अधः
६८ कनिष्ठावष्टब्धेमध्यमे च तु योजयेत् । अनामिके च कुटिले सर्वाधस्तान्नियोजयेत् ॥ ६७ ॥ बीजमुद्रेयमाख्याता मुद्
रस्याहंसोस्मिति । पूर्वोक्तायोनिमुद्रा तु नवमी परिकीर्त्तिता ॥ ६८ ॥ शक्तिचंद्रस्फुरंतीयं तस्मात्साधारणा भवेत् ।
68
वाग्भवं मुद्रेतस्मात् अतो विश्वस्य मातृका ॥ ६९ ॥ ॥ इति श्रीदक्षिणामूर्त्तिसंहितायां यजनन्यासविद्याविवर
णं नाम पंचविंशतितमः पटलः ॥ ॥ ईश्वर उवाच ॥ ॥ श्रीखंडरक्तश्रीखंडश्रीपर्णासंभवे पुटे । चक्रं संस्थापये
द्विनान्यत्र परमेश्वरि ॥ १ ॥ एवं विन्यस्तदेहः सन् ध्यायेद्ब्रह्मांडमंडलं । तस्योर्द्ध्वव्यापकं चक्रं वीषद्धुपदत्द्वंमितं राम०
॥ २ ॥ लीनावाप्यस्य निर्द्देशादपरा योगिभिः स्मृता । पराश्रीयांभवज्ञाने वा न स्यात्पशुमध्यमा ॥ ३ ॥ सर्वजन्तुपशंप ६८

© Dharmartha Trust J&K. Digitized by eGangotri

तीवैखरीज्ञानयोगिषु ।एवंवाक्पदेसंपन्नसहस्रदलनीरजं ॥४॥ एतस्योर्द्ध्वपरंचक्रंपरपीयूषमंदिरं ।चत
रस्त्रंह्यष्टपत्रंचचतुरस्रदलंशुभं ॥५॥ दशपत्रंसहस्रारंदशयुतारंलक्षपत्रकं ।कोटिपत्रंस्तुशोभाढ्यंदीप्यमा
नंनभस्थले ॥६॥ ततकर्णिकामध्यपीठेसंस्मरेच्चक्रनायकं ।महाषडध्वजननंस्फुरंतंसर्वतोमुखं ॥७॥ ष
डध्वरूपमध्वनाम्नुरूपयोगेशिसांप्रतं ।पराध्वाचक्रपत्रेषुभुवनाध्वात्रिसंस्थितः ॥८॥ वर्णाध्वामातृकापीठेस
र्वमंत्रविजृंभिते ।षट्त्रिंशत्तत्वभरितंचक्रंमूलार्णरूपतः ॥९॥ पंचसिंहासनोर्ध्वस्थःकलाध्वाचक्रशासना
त् ।नवधाचक्रभरितातथात्मपरयायुता ॥१०॥ षोडशार्णस्वरूपाचचक्रंव्याप्यविजृंभते ।मंत्राध्वेतितदा
ख्यातोनीरजायतलोचने ॥११॥ एवंषडध्वसंवारिश्रीचक्रंपरिचिंतयेत् ।कर्णिकायांपरंब्रह्मतत्रचैतत्यम

© Dharmartha Trust J&K. Digitized by eGangotri

द॰ सं॰ द्वारम् ॥१२॥ तत्रस्वात्मपदंतत्रस्फुरणंवैंदवंततः । तत्रस्वरूपममलंतत्रसत्वादिसंभवः ॥१३॥ चैतन्याका
६९ शपीठंतुस्वात्मकोच्यतुशासनात् । स्फुरणाद्दल्लरीपीठस्तथापीठंतुवैंदवात् ॥१४॥ स्वरूपादन्नपीठं
तुतत्वादिश्वंचकीर्तितं । श्रीविद्यापूजनस्थानेचक्रपूर्वादितःप्रिये ॥१५॥ महाकोशेश्वरीहंदमंडिता
69 सनसंस्थिता । सर्वसौभाग्यजननीपादुकांपूजयामिच ॥१६॥ इत्युच्चार्यपरंज्योतिःकोशांबांपूजयेत्सु
धीः । अनेनैवप्रकारेणपूजयेत्पंचपंचिकां ॥१७॥ एतत्सर्वात्मकंवस्तुलीनंपरवस्तुनि । तत्सर्वस्वा
त्मसंवित्तिःसैवसौभाग्यसुंदरी ॥१८॥ विंदुत्रयसमायोगात्त्रिविंदौत्रिपुरास्थिता । विंदुसंकल्पचेद्द दम॰
ज्ञातस्याधस्तात्तुचहृदयं ॥१९॥ तदधस्त्वपरार्द्धंचचिंतयेत्तदधोमुखं । एवंकामकलारूपात्माज्ञादन्त ६९

© Dharmartha Trust J&K. Digitized by eGangotri

ररूपिणी ॥१०॥ बिंदुत्रयार्द्धमात्राभिः केवलं विश्वमातृका। तत्तस्मात्कारणाद्देवि त्रिपुराशक्तिरुच्यते ॥११
अन्यासां त्रैपुरं बिंदुत्रयं नास्त्येव शास्त्रतः। तदिच्छया भवेत्सृष्टिर्भयं तत्रैव गच्छति ॥१२॥ सैव देवी महेशानी स्व
त्मानमिति चिन्तयेत्। ओंजाश्चनमतंगाख्या भापीठे परिसंस्थिते ॥१३॥ तिथिसंख्यफणाहाद्रमध्ये मोलिस
रोरुहे। तत्रस्थैर्वैस्वपीठे तत्र नित्यकलां भजे ॥१४॥ तत्र कामेश्वरीपीठे निषण्णां तत्सधर्मिणी। आज्ञालोकत्र
येशानी ब्रह्मविष्णीशशासनीम् ॥१५॥ अकारादिक्षकारान्तवर्णावयवसुंदरी। मूलादिब्रह्मरंध्रान्तं विसतंतु
स्वरूपिणी ॥१६॥ उद्यद्भास्वत्समाभासां जपाकुसुमसंनिभां। सद्यःसंतप्तहेमाभां दाडिमीकुसुमोज्वलां।
१७॥ सुगंधोद्दामकुसुमपूर्णधम्मिल्लराजितां। तत्केतकसंराजन्नीलभ्रमरकुंतलां ॥१८॥ भंगरेखास्फुर

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
७०
70

न्मुक्तामाणिक्यतिलकोज्ज्वलां स्फुरद्रत्नावलीरम्यमुकुटोज्ज्वलकिंकिणीं॥२९॥ अलक्तकस्फुरच्चंद्रव
दनां विद्रुमाधरां। राजच्चंद्रकलास्फूर्त्तितिलकां चापमद्भुवं॥३०॥ कर्णोत्तुंगविस्फुरन्नीललोलालिक्षेपसुं
दरीं। हीरमुक्तावलीराजत्स्वर्णताटंकराजितां॥३१॥ कर्णभूषणतेजोभिः कपोलस्थलमंजरीं। मुखचंद्रोज्ज्व
लच्छत्राकारमौक्तिकनासिकां।३२। स्मितमाधुर्यविजितब्रह्मविद्यारसप्रभां। राजद्विद्रुमवल्लीभवा
हुवल्लीविराजितां।३३। रक्तोत्पलदलाकारसुकुमारकरांबुजां। करांबुजनखज्योत्स्नावितानितनभस्थलां
३४॥ सुवृत्तनिबिडोत्तुंगकुचभारालसां शिवां। नवमुक्तामहाहारपदकोन्नतवक्षसम्॥३५॥ शातोदरीं राम॰
निम्ननाभिं क्षामामध्यमसुंदरीं। अनर्घरत्नघटितमेखलालग्नकिंकिणीं।३६। नितंबबिंबसुभगां रोमराजि ७०

© Dharmartha Trust J&K. Digitized by eGangotri

विराजिताश्ररत्नकौस्तुभस्फुरत्तेजोव्याप्तत्रैलोक्यमंडलीं॥३६॥दिव्यकंचुकसंराजद्रत्नचित्रविचित्रितां॥का
ञ्चीलसितसत्नमस्तुक्कमारोत्तराजितां॥३८॥नवरत्नस्फुरत्तेजोमंजरीव्याप्तदेवतां॥ब्रह्मविष्णुमहेशा
नुस्फुरत्मौलिपदांबुजां॥३९॥कर्पूरशकलोन्मिश्रतांबूलाशरितानना॥प्रवालवल्लीघटितपाशांकुशो
मगुणान्वितां॥४०॥द्वितीयाचंद्ररेखांके ॥ ॥ स्ह ऐं माकर्षणक्षमां॥सद्दीप्तामामरीश्रतगुणामिक्षुश
रासनं॥४१॥कमलाकारसंराजच्चंचवाणांश्च मै मौ ह्रूं स्थितं मत्ता मृगमदोदारकुंकुमारुणविग्रहां॥४२
सर्वाभरणशोभाढ्यांसर्वालंकारराजितां॥सर्वदेवम यी देवी सर्वसत्त्वस्यरूपिणी॥४३॥सर्वसौभाग्यजननीं
सर्वसौभाग्यसुंदरी॥एवंध्यायन्महादेवीकदंबवनमध्यगां— ४४ डीपुट द्वारेणागतांचिंतयेत्ततः॥कामे

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ श्वरशिवस्यांके स्थापयेत् कुलसुंदरी ॥४४॥ विद्यायाद्ध्यानरूपिणी मुद्रयाचततः शिये। मुद्राः संदर्शयेद्दि
७१ द्यांस्तर्प्पणं च विधाय जेत् ॥४५॥ सर्वोपचारैराध्यमानमेः प्रकटैः शुभैः धूपदीपनिवेद्यांतैः पुनर्मुद्राः स्त
दर्शयेत् ॥४६॥ सर्वोपुनः संतर्प्य देवेशी तिथि नित्यांश्च पूजयेत्। एतस्मिन् समये देवि तत्तन्नित्यमयीं पजेत्।
४७ प्रतिपत्पोएमीसंतमेके कां पूजयेत् उपः। सौभाग्यं लभते मंत्री महदैश्वर्यमाप्नुयात् ॥४८॥ एकादिकृष्ण
हान्याच दर्शांतं क्रमतो यजेत्। विमाद्य च महाद्यस्त्र स्वरैः पंचदशात्मकैः ॥४९॥ पंचपंचविभेदेन सर्वांत्यंम
ध्यमं यजेत्। मध्ये देवीमयीं देवी महानित्यांश्च पूजयेत् ॥५०॥ कामेश्वर्यादिका नित्या विचित्रांताः क्रमाद्यजेत्। एम॰
विमलाजयिनीमध्ये पूजयेद्गुरुमंडलं ॥५१॥ पराख्यादिव्यगुरवः सिद्धादेविपरापराः। अपरामानवाज्ञेयाश्च ७१

© Dharmartha Trust J&K. Digitized by eGangotri

निवेदाष्टसंख्यया ॥५२॥ आनंदनाथशब्दांताः उत्तघाः परिकीर्त्तिताः ॥ अंबांता गुरवो ज्ञेया स्त्रीलिंगाः परमेश्वरि
॥५३॥ कामराजस्य गुरवः कथ्यंते शृणु सुंदरि । परप्रकाशसंज्ञश्च ततः परशिवो गुरुः ॥५४॥ परशक्तिश्च कौलेशः
शुक्लादेव्यंबिका तथा । कुलेश्वरी तथा देविकामेश्वर्यंबिका गुरुः ॥५५॥ अथ भोगस्तथा क्लिंगः सहजः समयस्त
था । गगनो विश्वविमलो मदनो भुवनो गुरुः ॥५६॥ लीलः स्वात्मप्रियो देवि क्रमेण परिकीर्त्तिता । लोपामुद्रागस्त्यपो
श्रुपारं पर्य्यः समो भवेत् ॥५७॥ परमाद्याशिवः पश्चात्का मे —— श्वर्यंबिका ततः । दिव्यौघश्च महौघश्च सर्वश्च गुरु
वः क्रमात् ।५८। प्रज्ञादेवी प्रकाशश्च दिव्यौघसहतैं दिव्याश्चित्तश्च कैवल्यादेव्यंबा च महोदयः ॥५९॥ विद्धि श्वशक्तिश्च
रकः कमलोत्थश्च मनोह श्च स्वा स ध्व स्तदंदं प्रतिमो ष्टोत्तमा नवे ॥६०॥ अन्यासां सर्वविद्यानां समाना गुरवः क्रमात् ।

म   परमस्तथा १   क्रमा २२

© Dharmartha Trust J&K. Digitized by eGangotri

अथो परस्त्र काश्चैरोपस्त दिविमृशस्तथा ॥६१॥ तृतीया परमेशानी कामेश्वर्यं विका ततः। मोक्तृस्था मृतसंज्ञश्च पुरुषै
घोरैरवच ६२॥ अथवामः सद्गुरुश्च सिद्धो बश्चांतिमः क्रमात्। उड्डवः परमश्चैव सर्वज्ञः स्वच्छ एव च॥६३॥
सिद्ध स्तथा च गोविंदः शंकरो मानवौघकाः। अलित्रयावसाने त्वस्य गुरुत्रितयं यजेत्॥६४॥ यदा द्वादश सं
ख्याता गुरवस्तु भवंति हि। मानवौघाश्च कांतेऽत्र पुष्पं संकोचयेत्तदा॥६५॥ गुरुत्रयं तदा योज्यमन्यथा नष्टसंत
तिः। ज्ञाता मंत्री तदा देवि पंक्तिपर्हो न भवत्यसौ॥६६॥ अन्यथा गुरुसंकोचो न कर्तव्यः कदाचन। पारंपर्यविहीना
ये ज्ञानमात्रेण गर्विताः॥६७॥ तेषां समयलोके न किंचित् कुर्वंति मरीचिपः। गुरुं विना क्रमयष्कं कुरुते परमेश्वरि॥६८
महाहानिस्तस्य देवि जायते नात्र संशयः। अलित्रयेण गुरवः संपूज्याः सिद्धिहेतवे॥६९॥ गुरुमंत्रेण नाम्नापि निजं

© Dharmartha Trust J&K. Digitized by eGangotri

संपूजयेद्गुरुं ॥७०॥ ॥इति श्रीदक्षिणामूर्तिसंहितायां ध्यानादियजनविधिर्नाम षड्विंशः पटलः॥ ॥ईश्व
र उवाच॥ अथ वक्ष्ये महेशानि श्रीविद्याक्रममुत्तमं। अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनं॥१॥ स्वस्वमुद्राक्र
मेणैव पूजयेन्मन्त्रवित्तमः। अथ वै षोडशारं च वसुपत्रं क्रमेण च॥२॥ सृष्टिचक्रं भवेत्तत्र पूजनं कथ्यते शिवे। श्री
परं ज्योति राकाशं सर्वाः संपूजयेत्क्रमात्॥३॥ मन्वस्रं दशकोणं च द्वितीयं दशकोणकं। स्थितिचक्रं पूजनं
तु विभेदेन यजेत्तथा॥४॥ अष्टकोणं त्रिकोणं च वैन्दवं संहृतिर्भवेत्। तृतीयाः सकला पूज्या अनाख्यं सक
लं भवेत्॥५॥ तुर्या विद्यास्तु सकलाः पूजयेत्क्रमतः सुधीः। अनेनैव प्रकारेण विद्यां हृदये प्रपूजयेत्॥६॥ श्री
कोशं सिंहासनगं तथा कल्पलतात्मकं। तथा रत्नात्मकं देवि चतुरायतनात्मकम्॥७॥ चतुरन्वयगंभीरं स

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं. र्वसंस्वजयेत्सुधीः त्रैलोक्यमोहनेचक्रेपंचाशद्वर्णविग्रहे ॥८॥ अकारास्तत्रसंस्थ्याःसिद्धयेदशसुंदरीः सिद्ध
७२ संतप्तहेमाभाः सिद्धयेदशसुंदरीः ॥९॥ सर्वाःसंतप्तहेमाभाःपाशांकुशधराःप्रिये। महामांडाररत्नानिसस्तु
73 वर्णानिवैनिधीन्॥ अयच्छंत्यःसाधकेभ्यःपद्महस्तास्समस्त्वजये ॥१०॥ अणिमालघिमासिद्धिर्महिमेशित्वरू
पिका। वशित्वसिद्धिःप्राकाम्याभुक्तिरिच्छाष्टमीभवेत् ॥११॥ प्राप्तिसिद्धिःसर्वकामासिद्धयःप्रकटायजेत्।
द्वारदक्षिणभागेषुतथाकोणेषुचक्रमात् ॥१२॥ अतऊर्ध्वंक्रमात्संस्थ्याःपश्चिमादिषुदेशिकः। ब्राह्मीमा
हेश्वरीचैवतथेन्द्राणीतृतीयके ॥१३॥ कौमारीवैष्णवीचैवषष्ठीवाराहिकाभवेत्। चामुंडाचमहालक्ष्मी राम०
रपरेणचभागतः ॥१४॥ पाशांकुशधराःसर्वाःक्रमेणदधतीःस्मरेत्। विद्यांत्रिशूलंवज्रंचशक्तिंचक्रंगदां ७२

© Dharmartha Trust J&K. Digitized by eGangotri

ततः ॥१६॥ वैवर्त्यमालिकापञ्चक्रमेण परमेश्वरि । सर्वाभरणसंपन्नाः संस्मरेत्तत्सिद्धिहेतवे ॥१७॥ पश्चिमादि
क्रमेणैव प्रकटाश्च त्वरस्त्वके । सर्वाशापूरके चक्रे कला स्वरविजृंभिते ॥१८॥ पश्चिमादिविलोमेन गुप्ताः संस्मृ
येत्क्रमात् । कामाद्याकर्षिणी नित्यां बुद्ध्याकर्षणिकां तथा ॥१८॥ अहंकाराकर्षिणी च शब्दाकर्षणिकां
तथा । स्पर्शाकर्षिणीकां तद्वद्रूपाकर्षणिकां तथा ॥१९॥ रसाकर्षणिकां देवि गन्धाकर्षणिकां ततः । चित्ता
कर्षणिकां तद्वद्धैर्याकर्षणिकां प्रिये ॥२०॥ नाम्याकर्षणिकां चैव बीजाकर्षणिकां तथा । अमृताकर्षणीं चै
वस्मृत्याकर्षणिकां प्रिये ॥२१॥ शरीराकर्षणी नित्यामात्माकर्षणिकां ततः । एता नित्याः कलादेवि चंद्रमंड
लमध्यगाः ॥२२॥ स्वरलग्नाः स्मरेन्नित्यं स्मरद्रूपीयूषवर्षिणीः । पाशांकुशस्तुधाः शोणाः काश्मीरद्रवदानन्दाः ॥२३॥

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ सर्वसंक्षोभणेचक्रेकादिलक्षांतवर्गिणी।देवियुग्मतराःश्ज्यावंश्कञ्जकास्तुमप्रभा॥२४॥पाशांकुशस्फुरच्चाल
७४ नीलोत्पलकरास्मरेत्।पूर्वादिक्षुचतुर्दिक्षुकोणेष्वग्न्यादिक्षुक्रमात्॥२५॥अनंगकुसुमाचैवतथानंगादिमेख
74 लां।तथानंगादिमदनामनंगमदनातुरां॥२६॥अनंगरेखावानंगवेगांचानंगपूर्विकाम्।अंकुशांचतथानंग
मालिनीपरमेश्वरी॥२७॥महासौभाग्यदेचक्रेकादवर्णीविराजिते।संप्रदायाख्यायोगिन्यःसर्वाभरणभूषिताः॥
२८॥पाशांकुशौदर्पणंचपानपात्रंसुधामयम्।विभ्रत्यःसर्वशुभ्राःपश्चिमादिविलोमतः॥२९॥शक्तीः
प्रश्नयेदृविसंप्रदायेनसिद्धये।सर्वसंक्षोभिणीशक्तिःसर्वविद्राविणीततः॥३०॥सर्वाकर्षिणिकाशक्तिः राम॰
सर्वाल्हादकरीप्रिये।सर्वसंमोहिनीशक्तिःसर्वस्तंभनकारिणी॥३१॥सर्वजंभनिकानामशक्तिःसर्ववशं ७४

© Dharmartha Trust J&K. Digitized by eGangotri

करी।सर्वार्थरंजनीशक्तिःसर्वोन्मादनकारिणी॥३१॥सर्वार्थसाधकीशक्तिःसर्व [illegible] संपद्विस्तर
की।सर्वमंत्रमयीशक्तिःसर्वद्वंद्वक्षयंकरी॥३३॥सर्वार्थसाधकेचक्रेणमवर्णविशोभिते।जपाकुसुमसंका
शस्फुरद्रत्नमणिविभूषिताः॥३४॥महासौभाग्यगंभीरापीनवृत्तघनस्तनीः।रत्नपेटीविनिक्षिप्तसाधकेप्सितभूष
णाढ्या॥३५॥नानारत्नमयाशुद्दिव्याद्र।दधतीर्हसितानना।पाशांकुशौचदधतीःसंस्मरेत्तत्रयोगिनीः॥३६॥
पश्चिमादिविलोमेनपूजयेत्सर्वसिद्धिदाः।सर्वसिद्धिप्रदादेवीसर्वसंपत्प्रदाततः॥३७॥सर्वप्रियंकरीचैवसर्वमं
गलकारिणी।सर्वकामप्रदादेवीसर्वदुःखप्रमोचनी॥३८॥सर्वमृत्युप्रशमनीसर्वविघ्ननिवारिणी।सर्वांगसुं
दरीदेवीसर्वसौभाग्यदायिनी॥३९॥सर्वरक्षाकरेचक्रेमक्षवर्णविराजिते।पश्चिमादिविलोमेननिगर्भयो

द॰सं॰ गिनीर्यजेत्॥४०॥उद्यद्भास्वत्सहस्राभामाउक्तालंकारभूषिताः।पाशटंकाउधज्ञानमुक्तावरदसत्कराः॥४१॥
७५ देवीषट्कंजपेदेतान्यथेप्सितफलप्रदाः।सर्वज्ञासर्वशक्तिश्चसर्वैश्वर्यप्रदातथा॥४२॥सर्वज्ञानमयीदेवीसर्व(
75 व्याधिविनाशिनी।सर्वाधारस्वरूपाचसर्वपापहरातथा॥४३॥सर्वानंदमयीदेवीसर्वरक्षास्वरूपिणी।सर्वेप्सि
तार्थफलदादशमीपरमेश्वरी॥४४॥सर्वरोगहरेचक्रेवर्गाष्टकविजृंभिते॥पश्चिमादिविलोमेनरहस्यायो
गिनीर्यजेत॥४५॥श्रीपीठंपरितोयस्ताद्दाडिमीकुसुमप्रभाः।रक्तवस्त्रपरिधानारक्तगंधानुलेपनाः॥४६
रक्तपुष्पार्चितैःसम्यक्पूजयेत्सर्वसिद्धिदाः।नानाभरणगंभीराःपंचबाणधनुर्धराः॥४७॥पुस्तकंवरदा राम॰
नंचदधतीर्वर्गसंस्थिताः।वर्गाष्टकमहावर्णाबिंदुनादांकितालिखेत॥४८॥अवर्गांतेरेफवत्क्षावाम ७५

© Dharmartha Trust J&K. Digitized by eGangotri

कौंड्डुबिंडुमत्।देवीवा।देवताऽज्यावशिनीनामसुंदरी॥४९॥कवर्गांतिकलडुतांपरांकमेश्वरींलिखेत्।
चवर्गांतेनचक्रमाद्यंवामनेत्रशशीशमत्॥५०॥अनेनमोदिनीऽज्याटवर्गांतितमःपरं।वायुक्रमावामकौंड्डु
बिंडुमद्विमलांयजेत्॥५१॥तवर्गांतेजकालस्मावामाक्रीडकलात्मकं।अरुणांऽजयेद्देविपवर्गांतिथक
थ्यते॥५२॥व्योमबीजमहीनीरवायुचंद्रेशभूषितं।अनेनजयनीऽज्यापवर्गांतिथलिख्यते॥५३॥म्रेरेफ
कालपवनघ्राणवांकेनऽजयेत्।सर्वेश्वरीलवर्गांतेक्रमवज्रीशबिंडुमत्॥५४॥अनेनकौलिनींदेविऽज
येदष्टमींबुधः।अष्टकांतेमहेशानीरेतावादेवतायजेत्॥५५॥सर्वसिद्धिप्रदेचक्रेत्वकथैश्वसहाह्रौंरेः।त्रि
खागर्भशोभाद्येसमस्ताणविद्धंभिते॥५६॥परापररहस्याख्यायोगिनीःऽजयेत्क्रमात्।पश्चिमादिक्र

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
७६
76

मेरोर्वसुग्मसुग्मविभेदतः ॥५७॥ कामेशस्य चक्रमारव्यावाणाः साधारणाः प्रिये। तत्तु पर्य्यंतद्वितीयं च वि
न्दुनादांकितं क्रमात् ॥५८॥ कामेश्वरस्य कामेशपाश्वापयुग्मं पञ्जेतरश्रिये। अनंतो बिंदुनादाढ्यो हल्लेखा पाश
युग्मकम् ॥५९॥ कामेश्वरस्य कामेशपाः क्रमेण परमेश्वरि। अंकुशस्य क्रमस्मनः स्याद्भयोः प्रजपेत्सुधीः ॥६०॥
चतुर्दिक्षु विशोभाद्याः स्वस्वायुधधराः क्रमात्। जंभमोहवशस्तंभपदमंत्रान्विताः शुभा ॥६१॥ त्र्यंगावरण
वाह्ये तु आयुधाष्टकमर्चयेत्। कोणत्रये तु संपूज्याः स्त्रिस्त्रः क्षटत्रयान्विताः ॥६२॥ कामेश्वरी वज्रेशी
तृतीया भगमालिनी। कामेश्वरी शुक्लवर्णा शुक्लमाल्यानुलेपना ॥६३॥ मुक्ताफलस्फुरद्भूषा नानाभरण राम॰
भूषिता। उस्तकं चारुहस्तं च वरदं चाभयं क्रमात् ॥६४॥ दधती चायतः पूज्या रुद्रशक्तिः प्रकीर्तिता। वज्रेश्व ७६

© Dharmartha Trust J&K. Digitized by eGangotri

रीकुंकुमाभाभास्कररत्नविभूषिता॥६५॥बालार्कवसनानीलकाणीकुंचितलोचना।इक्षुकोदंडपुष्पेषुवरदा
भयशोभिता॥६६॥वज्रेश्वरीदक्षभागेविष्णुशक्तिर्महेश्वरी।उत्तरेभगमालांवामस्थःसंततहेमप्रभा॥६७॥त्रि
नर्घ्यरत्नरचितभूषणा।भुवनेश्वरी।पाशांकुशज्ञानमुद्रावरदानकरांबुजा॥६८॥ब्रह्मशक्तिर्महेशानीता
प पत्रैर्निकृंतिनी।सर्वानंदमयेनादरूपेशब्दातिगोचरे॥६९॥परापररहस्यास्त्वायोगिनीरतिपूर्विकाः।त्रि
कोणयात्तुसंपूज्यमहात्रिपुरसुंदरीम्॥७०॥श्रीविद्यांपूजयेद्देविचिन्मयींब्रह्मरूपिणीं।तर्पणान्निवृत्तेर्दद्या
द्गंधपुष्पाद्यैस्तैर्यजेत्॥७१॥मानसैःप्रकटैर्देविपूजयेदूर्मिभिःप्रिये।मुद्राःसंदर्शयेन्मंत्रीवंशूकाकारमप्रभा
ः॥७२॥नानालंकारसुभगास्त्रैलोक्यवशकारिणी।स्वस्वमुद्राकराःसर्वाःश्रीविद्याःसम्मुखाःस्मरेत्॥७३॥

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
७१

पतिचक्रांतउपुद्धास्त्वाक्रमाच्चक्रेश्वरीयजेत॥तन्नचक्रासमध्येतुस्वाधश्रृज्यायतःश्रिये॥७४॥त्रिपुरास्फटिका
भासामुक्तारत्नविभूषिता॥पुस्तकंचाक्षमालांचकलशंपद्मसुत्तमं॥७५॥दधतीचिंतयेन्नित्यंमहापातक
नाशिनीं॥त्रिपुरेशीसुर्वरूपासुंदरीकुंकुमप्रभा॥७६॥सर्वालंकारसंपन्नापुस्तकंचाक्षमालिका॥वराभ
येचदधतीसामर्थ्यहसिताननां॥७७॥अनयासदृशीदेवीध्येयात्रिपुरवासिनी॥आरक्तलोचनांशांतमह
मदविघूर्णितां॥७८॥त्रिपुरश्रीमहेशानीपीनतुङ्गघनस्तनी॥उद्यद्भास्वत्सहस्राभांदिव्यालंकारमंडितां
७९॥पुस्तकंजपमालांचवरदंचाभयंकरैः॥दधतीसकलानंदामालिनीकथ्यतेधुना॥८०॥इंद्रगोपप्रभा
देवीपाशांकुशकपालिनी॥महाभीतिहरासम्पक्साधकानांकृपादियं॥८१॥सिद्धांवापरमेशानीध्या

राम॰
७१

© Dharmartha Trust J&K. Digitized by eGangotri

येद्भयविनाशिनी । संपत्प्रदा भैरवी च महासिद्धिप्रदायिनी ।। ८२ ।। चक्रेण सिद्धिसहिता इति चक्राधिदेवता । श्री
ति गह्वरमेवेदं ज्ञात्वा चक्रं समर्चयेत् ।। ८३ ।। पादुकां पूजयामीति नमस्कारोथवा भवेत् । स्वाहा होमे तर्प्पणे तु
तर्प्पयामीति संस्मरेत् ।। ८४ ।। अथवा रश्मयः सर्वा देवीरूपेण चिंतयेत् । श्रीचक्रे परमेशानि स्वतंत्रे स्वस्वसंनिभाः
८५ ।। गोपितव्यं त्वया भद्रे स्वयोनिरिव पार्वति ।। ।। इति श्रीदक्षिणामूर्त्तिसंहितायां श्रीविद्याक्रमविवरणं
नाम सप्तविंशः पटलः ।। ।। ईश्वर उवाच ।। ।। नैवेद्यं षड्रसोपेतं कामधेनुपवित्रितं । दत्वा कर्पूरसहितं तांबूलं
परशक्तये ।। १ ।। नित्यहोमं प्रकुर्वीत पूर्वोक्तविधिना प्रिये । यथाशक्ति जपं कुर्यात्स्तुतिं च परमेश्वरि ।। २ ।। आद्य
श्लोकद्वयेनापि नत्वा सौभाग्यदेवतां । सौवर्णरौप्यकांशपादिपात्रे वसुदलं लिखेत् ।। ३ ।। गंधेन चरुकं मध्ये तु

© Dharmartha Trust J&K. Digitized by eGangotri

दु॰सं॰ उकंतत्रविन्यसेत् । वस्तुपत्रेषुवाज्येनपूरितान्नवदीपकान् ॥४॥ भ्रामयेद्दत्तविद्याभिर्धृत्वातुमस्तके । स्थलेन
७८ वास्मरेदंतेसर्वविघ्नोपशांतये ॥५॥ समस्तचक्रेशियुक्ते देविनवात्मिके । आरात्रिकमिदं देवि गृहाणममसिद्ध
78 ये ॥६॥ मंडलंवामतःकुर्यात्साधकोधुविजानुमान् । वहस्तेनहस्ताभ्यांमंडलंद्वारलक्षणं ॥७॥ वज्रस्त्रे
व्योमचक्रंमंत्रेणानेनप्रजपेत् । तारंचभुवनेशानीव्यापकादिचमंडलं ॥८॥ ॐतंवाग्भवहृन्मंत्रोमन्तुः
सूर्याक्षरोभवेत् । अन्नोदमिश्रंभागेनसाधारंडुष्पपूजितं ॥९॥ संस्थाप्यपात्रंतत्रैवकलार्णेनबलिंहरेत् ।
तारंपरासर्वविघ्नकृद्रूपःसर्वंवशलिखेत् ॥१०॥ तेभ्योऽद्भवह्निजायाचत्रिवारोच्चारणाद्बलिः । सर्वोक्तबलि राम॰
[illegible] दानंचकुर्याद्विघ्नोपशांतये ॥११॥ चतुर्द्धाबलिदानंतत्त्रिषुलोकेषुदुर्लभं । ततःकुमारीं ७८

© Dharmartha Trust J&K. Digitized by eGangotri

संतर्प्यत्रिपुरेशानंयथावा॥१२॥मद्भूषापरमेश्वर्यासंभाव्यमन्त्रवित्तमः।खेचर्याशक्तिचक्रस्यस्वामिनीं
संविदंपरां॥१३॥योजयेदात्मविज्ञानगहनेक्षपयागुरोः।शिवकोणेशेषिकाभ्यांनिर्माल्यंसिद्धयेक्षिपेत्
१४॥अर्घ्यपात्रंततोदेविगुरवेयुक्तमंत्रवित्।नाममंत्रेणचस्वस्थस्तर्पयेद्गुपदेशतः॥१५॥वाममार्गेणदेवे
शिनत्वागुद्धाधरःशुचिः।पुनराधारतांकुर्यादाचरेद्दीपमङ्गणं॥१६॥आरात्रिकसमर्थ्यस्यमूलेनेव
त्रभक्तपेत्।कामालिन्याथवापिपात्रंनान्यथावामसमुद्धरेत्॥१७॥द्वितीयंतत्त्वपादस्केसंयोगेनैवपार्व
ति।तत्त्वत्रयेणसंयोगात्तर्प्पयेत्स्वांतवासिनीं॥१८॥प्रथमंब्रह्मरूपंतुद्वितीयंसर्वमंत्रवित्।तृतीय
मीशरूपंचविज्ञेयंमन्त्रवित्तमैः॥१९॥किंचिदुल्लासमुद्राभिःपंचभिःपरमेश्वरि।गुरोराज्ञयादेविस

© Dharmartha Trust J&K. Digitized by eGangotri

स्वयंश्रीत्रिपुराभवेत्॥२०॥अथोत्तरवानिसर्वासांस्रूपाणिपंचोशतिष्ठयेत्।आकृष्यमंत्रांस्तत्रस्थांश्छो
षिकाभ्योऽन्नादिकं॥२१॥दत्वातुपरमेशानिसुखीक्ष्यात्रसंशयः।अनिर्वाच्यमपिह्येतयमद्दैरैःकथि
तंमया॥२२॥जलाद्भारेणन्यायेनचंद्रपीठेनचप्रिये।गोपितव्यंत्वयाभद्रेजननीजारगर्भवत्॥२३॥॥
इतिश्रीदक्षिणामूर्त्तिसंहितायांबलियजनविधिर्नामाष्टविंशतिमःपटलः॥ ॥पार्वत्युवाच॥होमादि
स्त्वचितंदेवसम्पाद्यित्वापरितंनहि।साधकानांहितायमत्संसिद्ध्यर्थंकथयप्रभो॥१॥ईश्वरउवाच॥ ॥
शृणुदेविप्रवक्ष्यामिश्रीविद्यामंत्रसाधनं।शमीदूर्वांकुराश्वत्थपल्लवैरर्कसंभवैः॥२॥श्रीचक्रंप्रजये

देविमासमात्रंसमाहितः।सहस्रजन्मजंपापंहंतिमासेनदेशिकः॥३॥पश्चिमाभिमुखंलिंगंदृष्टू

© Dharmartha Trust J&K. Digitized by eGangotri

न्यमथापिवा। स्वयंभुवाणदेशेवाशैवस्थाने महेश्वरि॥४॥ तत्रस्थित्वाजपेन्मंत्रं प्रवालान्रुद्रजाथवा।
मुक्तारुद्राक्षपद्माक्षस्फटिकोद्भयाथवा॥५॥ माणिक्यपद्मरागादिमनोहर्यजिपेद्बुधः। जपेल्लक्षैक
मात्रं तु भ्रुवर्यैविघ्नकारकाः॥६॥ तासामपियदानासौ क्षोभंयातिमनागपि। तदालक्षत्रयंकुर्यान्नियमे
नस्तुचिद्बुधः॥७॥ मानसेनाथवा वाचोपांशुना वा जपेत्सुधीः। मानसोच्चारणंदेवि जपकोटिफलप्रदं॥८॥
उपांशूच्चारणंदेवि वाचिकाच्छतधा भवेत्। वाचिकंतु स्वमात्रंस्यात् श्रीगुरोराज्ञयाप्रिये॥९॥ तद्दशांशेन
होमः स्यात्कुसुमैर्हृद्यैः प्रिये। कुसुमपुष्पैर्नैद्रूयान्मधुरान्वितयाहुतैः॥१०॥ तस्माद्भवति विद्येयम
विद्याध्वंसिनीसतां। यो निकुंडेभगाकारे स्वन्तुलिंहृद्ययोः प्रिये॥११॥ नवत्रिकोणचक्रेवा चतुरस्रेथवस्त्वरे

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ८०

वाक्पतीर्योनिकुंडेतुभगेवाकर्षणंभवेत॥१२॥वन्हिलिंश्रीपदंदेविवशपार्थेतुत्रयंभवेत।नवत्रिकोणेम
हतीखेचरीसिद्धिभाग्भवेत॥१३॥चतुर्स्रेतुसकलंशुभजातंभवेत्सदा।शांतिकंपौष्टिकंलक्ष्मीरारोग्यं
वस्तुरवादिकं॥१४॥पद्मांकेदशसिद्धीस्स्यान्नाशयेन्नात्रसंशयः।मल्लिकामालतीमिश्रात्रिमध्वक्तैर्वाचस्प
तिः॥१५॥करवीरजपाउष्पैःसघृतैर्भुवनत्रये।योषिद्वश्यंततोदेविकर्पूरंकुंकुमंमदं॥१६॥मृगस्यामि
श्रितंकृत्वाकापसोभाग्यभाग्भवेत।चंपैयैःपाटलैरन्यैराश्रैरन्यफलैर्हुनेत॥१७॥सन्नाहंमासमात्रं
वालक्ष्मीःप्राप्नोतिमंत्रिणं।श्रीखंडमगरुंदेविकर्पूरंगुग्गुलंहुनेत॥१८॥समयस्तुरसंदर्योवशपास्तस्य राम॰
भवंतिहि।हुनेत्पलंत्रिमध्वक्तंखेचरत्वंचतुष्पथे॥१९॥दधिक्षीरमधुक्षिप्तालाजैर्हुत्वानकालभाक् ८०

© Dharmartha Trust J&K. Digitized by eGangotri

।अथवानवलक्षंतुजपेद्विद्यांसमाहितः॥१०॥तद्दशांशेनहोमन्तुपूर्वोक्तविधिनायजेत्।साधयेत्स्वर्गभूलो
कपातालतलवासिनः॥११॥राजिकालवणाभ्यांतुक्षोभयेज्जगतीमिमां।दध्नाशताष्टकंहुत्वाकालमृत्युं
विनाशयेत्॥१२॥घृतक्षीरद्वयाद्वातुस्ततोष्टशतकंहुनेत्।मध्वाज्यगुग्गुलैर्नैवराजेन्द्रंवशमानयेत्॥१३॥आ
रोग्यंघृतदूर्वाभ्यांहवनेनशताष्टकं।त्रिमधुक्तैरक्तवर्णैःकरवीरैःसगुग्गुलैः॥१४॥हुनेल्लक्षंवशीकुर्याद्द्वि
शांतिं।धरणीभुजां।मधुक्तकरवीरैस्तुसांगंक्ष्मपंवशंनयेत्॥१५॥सप्तरात्रेणराजेन्द्रनशशिनःसर्ववशंनयेत्।
पाटलैर्यूथिकाकुन्दैर्जातीभिःशतपत्रकैः॥१६॥मालतीनवमल्लीभिर्मल्लिकापद्मकिंशुकैः।स्वजनाह्व
नाह्वापिमिश्रितैर्वाप्यमिश्रितैः॥१७॥सर्वसौभाग्यमाप्नोतिध्यात्वाक्यातिरुच्यते।सुवृत्तकुन्दैर्बिल्वपत्रफले

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ रसितनीरजैः॥२८॥तगरैराजचंपैश्चसिद्धयोष्टौभवंतिहि॥नारिकेलैश्चखर्जूरैर्द्राक्षाभिश्चूतपल्लवैः॥२९॥म
८१ नसाचिंतितंकार्यंसाधकस्यात्रहोमतः॥इक्षुजेनचहोमेनश्रीविद्यांपरितोषयेत्॥३०॥चरुंविकीर्यसर्वत्रकु
मारीपूजनादिभिः॥सर्वांकृवलिदानेनगुरुंसंतोष्यचक्रमात्॥३१॥सुवासिनीश्चसंपूज्यदद्याद्भूरिधनंस
ता॥समयंज्ञास्तुमंहोमेकूष्मांडवकूधाज्जुहेत्॥३२॥नारिकेलांतरफलैःसकलैश्चमनःप्रियैः॥समग्रेणैवचू
तस्यफलेनवर्द्धरंतथा॥३३॥पनसीफलगर्भस्थैर्गौरैर्वीजैः॥सितैर्जुहेत्॥जंबूफलंसमग्रंस्याद्द्राक्षाश्चैवतथा
जुहेत्॥३४॥रंभाफलंमनोभागंलघुचेतरखंडितंनहि॥फलंलघुसमग्रंस्यात्कस्तूरीकुंकुमंशशि॥३५॥गुंजा राम॰
मात्रंजुहेद्देवितिलराजीशतंजुहेत्॥तथैवलवणंलाजामुष्टिमात्रंजुहेद्बुधः॥३६॥अन्नंतुयासमात्रंहिपक्वान्नं ८१

© Dharmartha Trust J&K. Digitized by eGangotri

श्वतथाङ्गुलेन तु । उपरं तु कर्तु कार्द्धेण श्रीखंडं कुण्डकाकृति ॥३७॥ तथागरुं ऽङ्गुलेन दातव्यं मनःसंतोषकारिव । तच्च
तुर्गुणभेदेन दधिडुग्धेङ्गुलेन सदा ॥३८॥ सर्वासामाकृतीनां तु मानं देवि मनःप्रियं । कुण्डस्य पश्चिजनं वक्ष्ये महाविघ्न
विनाशनं ॥३९॥ चतुर्विंशतिसंख्याभिरंगुलीभिः सुविस्तृतं । खातं चरचयेत्कुण्डं सर्वत्र सुमनोहरं ॥४०॥ चतु
रस्रं सर्वनेत्रस्तु भगं मेखला ततः । सर्वत्रैकाङ्गुलं स्पष्टाकृतिस्तः कार्या सुशोभनाः ॥४१॥ आदित्यवस्तुवेदानां सं
ख्याङ्गुलमितत्वता । चतुरङ्गुलविस्तारास्तिस्रोपि परमेश्वरि ॥४२॥ कुण्डस्य पश्चिमे भागे योनिं कुर्यात्सुशोभनां ॥
षड्ङ्गुलिसुविस्तारां वसुङ्गुलिसुविस्तृतीं ॥४३॥ मध्ये षडङ्गुलां देवि द्व्यङ्गुलोच्चां मनोरमां । लक्षणं चतुरस्रस्य
कथितं तव सुंदरि ॥४४॥ एतस्मिन्मातियज्ञाव्यतदन्येषु यथा भवेत् । तेन मानेन सर्वाणि कुण्डानि रचयेद्बुधः ।

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं. ४५॥ गोमयोदकसंलिप्ते ऽश्वर्वात पश्चिमदिग्गताः दक्षिणाद्युत्तरांतं तु तिस्त्रस्तिस्त्रश्च कारयेत॥४६॥ प्रणवेन
८१ भुस्समध्ये कल्पयेद्यागविस्तरं। शर्करां विकिरेत्तत्र त्रिकोणं तत्र तं लिखेत॥४७॥ तद्बहिर्वस्तु पात्रं च ततोऽष्टमंडलं
लिखेत। उपर्युपरि भेदेन पीठं तत्सर्वमर्चयेत॥४८॥ मंडूकं च तथा रुद्रं कालाग्न्याद्यं ततः परं। आधारशक्तिं कू
र्मं च ततोऽनंतं वराहकं॥४९॥ पृथिवीं च तथा कंदं नालं पद्मं च कर्णिकां। पत्राणि केसराण्येवं ततस्थानेषु च पूज
येत॥५०॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं पीठदिक्षु च। नञर्थास्ते च कोणेषु पीठस्य परिपूजयेत॥५१॥ उनस्तारेण
संपूज्य यागविष्टरकं यजेत। मध्ये मातृमंत्री विश्वमातरं वै स्मात्टकां॥५२॥ पुरुषाराधितां ध्यात्वा तयोर्नौ संपु राम॰
टस्थितं। वह्निं कुंडे परिभ्राम्य किंचिदंगारकं त्यजेत॥५३॥ अस्त्रमंत्रेण सकलान्भूतान्संत्रासयेत्सुधीः॥५४॥ ८१

© Dharmartha Trust J&K. Digitized by eGangotri

सञ्ज्वलयेद्वह्निंसंक्रमप्यतुदीपकं॥५४॥दीपाद्दीपांतरंयावत्स्फुरंतंसर्वतोमुखं।श्वासमार्गेणमन्त्रविद्योनिमार्गेण
संक्षिपेत॥५५॥कुंडत्रिकोणमध्येतुतत्रञ्ज्वालयेच्छुचिं।आहौव्याहृतिभिःपश्चाद्वह्निमंत्रेणचक्रमात॥५६॥चि
त्पिंगलहनदहदहदहहंपचेहिधा।सर्वज्ञाज्ञापयस्वाहामत्रुनाप्रार्थयेत्ततः॥५७॥अग्निंप्रज्वलितंवंदेजातवेदं
हुताशनं।सुवर्णवर्णमनलंसमृद्धंविश्वतोमुखं॥५८॥उपस्थानंविधायेत्थंजिह्वांगानिप्रविन्यसेत।शषसा
वलरायश्चततश्चाप्यस्वरयान्विताः॥५९॥विन्दुनादांकिताःसप्तजिह्वार्णाःपरिकीर्तिताः।पद्मरागासुवर्णा
चतृतीयाभद्रलोहिता॥६०॥लोहितावतथाश्वेताधूम्रिकाचकरालिका।क्रमेणपोजयेद्बीजैर्विन्यसेत्परमे
श्वरि॥६१॥सलिंगगुदरंध्रांसनासालिंगेषुचक्रमात।स्तराश्चपितरश्चैतेस्मर्तव्यास्त्रासुसप्तसु॥६२॥॥

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ८३ 83

सहस्रार्चिःस्वस्तिपूर्णश्चोत्तिष्ठपुरुषस्तथा॥धूमव्यापीसप्तजिह्वोधनुर्द्धरश्चतीरिताः॥६३॥ॐहृदंतैःषडंगानि
ततोऽस्त्राष्टकंन्यसेत।जातवेदाःसप्तजिह्वोहव्यवाहनएवच।६४॥विश्वोदरस्ततश्चार्थस्याद्वैश्वानरउमेततः।षष्ठः
कौमारतेजाश्चविश्वदेवमुखस्तोन्यसेत।६५।मूर्द्धासपार्श्वकुक्षिपृष्ठकटिपार्श्वांसकेषुच।ॐतास्तुसकलाज्ञेया
अग्नितुल्यांगकाःक्रमात॥६६॥एवंविन्यस्तदेहःसन्पर्युक्ष्यार्घ्यजलेनच।दिक्षुदर्भैःपरिस्तीर्य्यततस्तुपरि
षिंचयेत॥६७॥वैश्वानरततोजातवेदपश्चाद्धुताशनः।लोहिताश्वचसर्वांतिकर्माण्यथचसाधय॥६८॥स्वाहां
तोऽग्रयंतावच्चक्रेचितिपिंगलेतिच।अनेनवह्निमभ्यर्च्यततोजिह्वाःसमर्चयेत॥६९॥मध्येचकोणषट्केचततो राम॰
ङ्गानिप्रपूजयेत।मूर्त्तयोवसुपत्रेषुशक्र्याद्यादिगीश्वराः॥७०॥पुनर्वैश्वानरंपश्चात्त्रिनेत्रमरुणप्रभं।सुक्लांवरध ८३

© Dharmartha Trust J&K. Digitized by eGangotri

रंरत्नभूषणंपद्मसंस्थितं॥७१॥वरंशक्तिंस्वस्तिकंचभीतिहारिचबिभ्रतीं।अनेकहेममालाभिरंकितंसंस्मरेत्त
तः॥७२॥अर्घोदकेनपात्राणिप्रोक्षयेच्छुद्धयेततः।उन्मुखीकृत्यसर्वाणितत्तत्रविनिक्षिपेत्॥७३॥त्राणिंता
प्रोक्षणीयुग्मेजलंस्थाल्यांघृतंतथा।अन्यसर्वंचपात्रेषुहोमद्रव्याणिसंक्षिपेत्॥७४॥स्रुक्पात्रेचस्रुवंपात्रेचपु
तपुष्पंविनिक्षिपेत्।स्थालींदुर्वांचितांकुर्यात्सर्वतोऽश्ममयेनश्रिये॥७५॥मेखलासुचसर्वासुवेष्टयेद्दीपमालिका
:त्रिपंचयावाभितःकुंडंततोव्याहृतिभिर्हुनेत्॥७६॥ब्रह्माणंदक्षिणेभ्यर्च्यहुनेद्वैश्वानरायनं॥गर्भाधाना
दिसंस्कारांश्चिंतयेत्सर्वसिद्धये॥७७॥अनेनविधिनाभ्यर्च्यश्रीचक्रंतत्रचिंतयेत्।तदंतरेसमावाह्यमहात्रिपुर
सुंदरीं॥७८॥समस्तचक्रचक्रेशीसहितांहोमयेत्ततः।दशांश्याहुतिभिःपश्चात्पूजनादिक्रमेणच॥७९॥स

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
८४
84

मस्तचक्रचक्रेशीघ्रकदाघास्त्वयोगिनीः।होमयेच्च घृतैर्नैवचैकैकामाहुतिं क्रमात्॥८०॥ततः सर्वोत्क्रिस्तद्रव्यै
र्हेमयेत्स्तम्भगां परां।हवनं पद्मरागायां सर्वसिद्धिप्रदं भवेत्॥८१॥स्फुरत्क्रांश्रुवर्यायसर्वकामफलाप्तये।लो
हिताचतयोः शांतिः स्तम्भनं चक्रमाद्भवेत्॥८२॥उच्चाटनंत्वश्मिन्यां करालिन्यां च मारणं।इतिते कथितं दिव्यं हो
मलक्षणमुत्तमं॥८३॥कृताविघ्नोपशमनी नान्यथा वरवर्णिनी।दीपस्थानं समाश्रित्य जपहोमौ समारभेत्।
८४॥वस्तुकोष्ठं लिखेत्कूर्मं मध्ये स्थानं प्रकल्पयेत्।स्वराश्च द्वंद्वविभागेन सर्वादिक्क्रमतो लिखेत्॥८५॥का
द्यावर्गास्क्रमसंस्थेते सर्वादिक्क्रमतो लिखेत्।लक्षवर्गोष्टमे योज्यः कूर्मचक्रमिदं भवेत्॥८६॥स्थानाक्षरं यत्र राम॰
देवि सिद्धिस्तत्र न संशयः।स्थानाक्षरं ध्रुवं ज्ञेयं पार्श्वयोस्तस्य वै करौ॥८७॥तत्रस्थन्यं फलं मध्यकोष्ठयुग्मं तु ८४

© Dharmartha Trust J&K. Digitized by eGangotri

शत्रुदं। उदरंकच्छपस्येतत्पादौतत्पश्चिमेक्रमात्॥८८॥रोगहानिकरंप्रोक्तंतयोर्मध्यगतंभवेत्। दारिद्र्यदुः
खदंचैवतस्मादङ्कंसमाश्रयेत्॥८९॥तत्रैवसिद्धिर्नान्यत्रश्रीगुरोराज्ञयाप्रिये। देशंवाकल्पयेत्स्थानंनगरं
ग्राममेववा॥९०॥ दीपेवासोपिकर्तव्यःकिंतुनर्वनंजपः॥ ॥इतिश्रीदक्षिणाम्नायसंहितायांहोमजप
ल क्ष सं नामैकोनविंशःपटलः॥ ॥ईश्वरउवाच॥ ॥अथातःसंप्रवक्ष्यामिचक्रराजस्यसाधनं। एवं
संसिद्धविद्यायाविनियोगक्रमंशृणु॥१॥ कृत्वासिंदूररजसाचक्रंतत्रविचिंतयेत्। साध्यप्रतिकृतिंनामले
खनंकाष्ठभांततः॥२॥ ज्वलंतीतत्क्षणादेवमोहिताभयवर्जिता। यतस्तत्रजासमायातितथाच्यत्कोथ्यतेशि
वे॥३॥तन्मध्यसंस्थितोमंत्रीचिंतयेदरुणप्रभं। आत्मानंचतथासाध्यंतदासोभागपसुंदरः॥४॥अरुणेनरूपवा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ रैरक्तसृज्यते भुर्द्धौ याभृतः। यस्य नाम्ना भृतः सम्यक् स समवेद्दास एव हि॥ ५॥ अदृष्टस्त्रीनामवर्णाश्चक्रमध्ये
८५ विलिख्य तु। यो निशुद्धाधरोऽभूत्वा वेगादाकर्षणं भवेत्॥ ६॥ देवकन्यां राजकन्यां नागकन्यामथापि वा।
84 गोरोचनाकुंकुमाभ्यां समभागं च चंदनं॥ ७॥ अष्टोत्तरशताहूत्या तिलकं सर्वमोहनं। पुष्पं फलं जलं वा अं-
धं वस्त्रं च तत्क्षणं॥ ८॥ तांबूलं जपस्पर्शं च यस्मै संप्रेक्षते स तु। अंगनावीक्षणाद्देवदासी चास्य भवेत् प्रिये
९॥ करवीरैरक्तवर्णैस्त्रिमधत्तैः सहस्रं जपेत्। चिंतयेन्मासमात्रं हि सा ध्यात्वा लललनां ततः॥ १०॥ इति कृ-
त्वा महेशानी प्रजयेद्दरूणप्रभां। सिंदूररचिते चक्रराजे संमोहयेत्क्षणात्॥ ११॥ त्रैलोक्यदुर्लभां चापि रं- द॰सं॰
भां चाकर्षयेद्धठात्। चितागारेण चक्रं तु निखेद्क्रोद्धवेण हि॥ १२॥ वध्वा वाहा वथ का पि ज्वरं नाशयति ८५

© Dharmartha Trust J&K. Digitized by eGangotri

कुणात्॥ अर्कनिंबद्रुदाभ्यां तु लेखन्यार्कस्य संलिखेत्॥१३॥ द्वयोर्नाममध्यवा ह्यदेशे वक्रस्य संलिखेत्। गोमूत्रेस्था
पयेत्तच्च भवेद्विद्वेषणं कुणात्॥१४॥ शपयेच्चं दत्नं रात्रौ वक्षवा धारयेत्ततः। अश्ठोतरजपाद्दत्पा होमयेद्भुवनत्रयं॥१५॥
लिप्ते गोमयपंक्षेमोतु लिखेद्रोचनया ततः। स्वरूपां शतिमां रम्यं क्षषाद्यां परि चिंतयेत्॥१६॥ तद्बालगलहस्ता भिजन्म
मंडलयोजितां। जन्मनाममहाविद्यामंत्रशांतर्विदर्भितां॥१७॥ सर्वांगसंधिसंलीनां कामक्रूटं समालिखेत्। सा
ध्याशाभिमुखो भूत्वा श्रीविद्याध्यानविग्रहः॥१८॥ क्षोभिणीमुद्रया विद्यां साध्यगष्टशतं जपेत्। योजयेत्तां काम
गेहे चंद्रसूर्यकलात्मके॥१९॥ मातुरागातुविकला कामसाधकपीडिता। त्रैलोक्यसुंदरी वा पि क्षणादायाति
मोहिता॥२०॥ अथवा मातृकाचक्रेषाह्येसंवेष्ट्यमंत्रवित्। तच्चक्रंस्तजपेत्सम्यग्विद्यां सर्णं च धारयेत्॥२१॥ अव

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
८६
96

ध्यः सर्वभूतानां व्याघ्रादीनां न संशयः ॥ श्रीखंडागरुकस्तूरीकर्पूरैः स्वसकुंकुमैः ॥ २२ ॥ स्वनामकर्मतो लेख्यं सर्व
वन्मातृकां लिखेत् ॥ तेनाजरामरत्वं च साधकस्य न संशयः ॥ २३ ॥ अनेनैव प्रकारेण गोरोचनागरुकुंकुमैः ॥ चक्रं विलि
ख्य साध्यार्णसाधकांतर्विदर्भितं ॥ २४ ॥ त्रैलोक्यमोहनो मंत्री भवत्येव न संशयः ॥ कामकूटेन देवेशि संदर्भ्य पृथग
क्षरं ॥ २५ ॥ साध्यनाम त्रिकोणांतं मातृकां वेष्टयेद्बहिः ॥ स्वर्णमध्यगतं धार्यं शिखायां यत्र कुत्रचित् ॥ २६ ॥ लो
कपालाश्च राजानो दुष्टास्त्रैलोक्यसंस्थिताः ॥ ते सर्वे वशमायांति संनिपातादयो ज्वराः ॥ २७ ॥ अनेन विधिना नाम
उरा संदर्भ्य संक्षिपेत् ॥ चतुष्पथे मध्यदेशे दिक्षु पूर्वादिषु क्रमात् ॥ २८ ॥ तस्य सौभाग्यमायांति राजानः किंकराः
सदा ॥ स्फुरत्तेजोमयीं पृथ्वीं प्रज्वलंतीं चराचरां ॥ २९ ॥ चक्रांतश्चिंतयेन्नित्यं मासषट्कं ततो नरः ॥ तेन कंदर्प्प

एम॰
८६

© Dharmartha Trust J&K. Digitized by eGangotri

स्तम्भगोलोकेभवतिनिश्चयात्॥३०॥दृष्ट्वावाकर्षतेलोकंविषंनाशयतिज्वरान्॥तथाविषंचहरतिदृष्ट्वावश्यं
करोतिच॥३१॥राज्ञोसिंदूरलिखितंस्पृजयेदेकचित्ततः॥यदातदेवलोकोयंवश्यो भवतिनान्यथा॥३२॥करो
त्याकर्षणंज्ञाघोजनानांशतादपि॥अखंडदिक्कोणेषुक्रमेणपरिस्पृजयेत्॥३३॥यदातदेवलोकोयंवश्यो
भवतिनान्यथा॥भूर्जपत्रेलिखेच्चक्रंरोचनागरुकुंकुमैः॥३४॥स्वनामदर्भितंकुर्याद्देशंवाउठभेदनं॥मंड
लंविषमस्थानस्थंमौचक्रंनिधापयेत्॥३५॥धारयेद्धाततोमंत्रीडरंज्ञोभयतिक्षणात्॥ॐमन्त्रसलाक्षार्क
क्षीरकुंकुमरोचनाः॥३६॥कस्तूर्यलक्तसहिताएकीकृत्यतुसंलिखेत्॥पन्नामातस्यदेवेशिचोरजंव्या
घ्रजंभयं॥३७॥ग्रहजंव्याधिजंचैवारिडजंसिंहजंभयं॥अहिजंवाजिजंनास्तिसर्वाश्मोहयतिक्षणात्॥३८

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ८७

तु२

रोचनाकुंकुमाभ्यांतुमध्यगंसंलिखेद्बुधः।त्रिकोणेभयगंचैवसाध्यनामांकितामधः॥३९॥तच्चक्रंधा
रयेत्तस्मात्सप्तहाकिंकरोभवेत्॥पीतद्रव्येणवक्रांतर्लिखेद्विद्वानधस्ततः॥४०॥साध्यनामविलिख्येत
त्सर्वस्यांदिशिसंक्षिपेत्।तस्माद्वस्मापिजीवोपिसर्वज्ञोमूकतांव्रजेत्॥४१॥अनेनविधिनानीलीरसेनविलि
खेच्चतत्।दक्षिणाभिमुखोमंत्रीवक्रौदग्ध्वारिपुंदहेत्॥४२॥महिषाश्वपुरीषेणगोमूत्रेणचसंलिखेत्।
आरनालस्थितंकुर्याद्विद्वेषणंक्षणात्॥४३॥साध्यनामलिखेन्मध्येकाकपक्षेणलंवयेत्।संलि
ख्येद्रोचनाद्यैर्वैराकाशेदृष्टिगंतथा॥४४॥शत्रुमुच्चाटयेदाशुहठाच्चाटोयमीरितः।महानीलीरसोद्भिन्न राम॰
रोचनादुग्धमिश्रितैः॥४५॥लाक्षारसैर्लिखेच्चक्रंचतुर्वर्णान्वशंनयेत्।अनेनविधिनानीरेस्थापयेत्तज्ज ८७

© Dharmartha Trust J&K. Digitized by eGangotri

लेनतु ॥४६॥ सौभाग्यं महदाप्नोति स्नानपानान्नसंशयः। पीतं चक्रं यजेत्सूर्वं स्तंभयेत्सर्ववादिनः ॥४७॥
सिंदूरलिखितं चक्रमुत्तरे लोकवश्यकृत। पश्चिमे श्रजितं चक्रं गैरिकालिखितं ततः ॥४८॥ मंत्रिणो देवता
वश्याः किंपुनर्योषितः स्त्रिये। तथैव दक्षिणास्यस्काक्तं चक्रं समर्चयेत् ॥४९॥ साध्यस्य मंत्रहानिः स्यान्म
रणं च विशेषतः। क्रमाद्दिगंतरास्यस्कवह्निकोणादिषुक्रमात् ॥५०॥ स्तंभनं विद्वेषणं व्याधिमुच्चाटं कुरुते
नरः। दुग्धे वश्यकरं क्षिप्रं रोचनालिखितं हठात् ॥५१॥ दग्ध्वा तदाक्षिमध्यस्थं सर्वशत्रून्विनाशयेत्। गोमूत्र
मध्यगं चैतद्भवेदुच्चाटनं रिपोः ॥५२॥ विद्वेषणं भवेत्तत्रैतेनैव परमेश्वरि। सिंदूरेणालिखेच्चक्रं निर्जने चचतुष्प
थे ॥५३॥ सर्ववाह्यांतमारभ्य मध्यांतं मातृकां लिखेत्। कुलाचारक्रमेणैव रात्रौ संप्रजपेत्क्रमं ॥५४॥ सा

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰ ८८ ध्वकः खेचरो देवि जायते नात्र संशयः। चतुर्दश्यां निशि स्वस्थो रुद्रश्मो प्रजपेत्॥५५॥षण्मासं संख्यया
तेन साक्षाद्रुद्र इवापरः। अंजनं विवरं सिद्धिगुटिकां पादुकां जयं॥५६॥खड्गवेतालसो भाग्यं यक्षिणीं चेट
कादिकं। सकलं सिद्धिसमयं मंत्री प्राप्नोति नान्यथा॥५७॥चतुर्दश्यां चतुर्दश्यां अत्पष्टम्यां समाहितः। एक
विंशतिरात्रं तु निशि येत्तस्मातले॥५८॥श्रीचक्रपूजनात् हुत स्वरपूज्य स्कम साधकः। पाशांकुशधनुर्वा
णैः पौरुषेये महेश्वरि॥५९॥कामो भूत्वा स्वर्गभूमिपातालतलयोषितां। हर्त्ता कर्त्ता स्वयं चैतन्महदाक
र्षणं भवेत्॥६०॥तद्वत्कामेश्वरी शक्ते ईर्यात्मा भुवनत्रये। पुरुषाकर्षणं चैतद्राजानः किंकराः स्त्रिये॥ राम॰
६१॥एतत्कामकला स्थाने कथितं बीजभेदतः। वाग्भवाराधनाद्देवि विज्ञानं सारस्वतं लभेत्॥६२॥श्वेताम्बर ८८

© Dharmartha Trust J&K. Digitized by eGangotri

णवस्त्राप्या" श्वेतपुष्पैः समर्चयेत्। अनेनविधिनादेविवाग्भवाराधनंभवेत्॥ ६३॥ अथकामकलाकाम

सामर्थ्यंशृणुपार्वति। काममन्मथकंदर्पामकरध्वजएवच॥ ६४॥ महाकामश्चसर्वोक्ताः पंचकामाः क्रमेण

तु। कामंमन्मथमध्यस्थंदेवंकंदर्पवेश्मनं॥ ६५॥ तत्तदस्थंमीनकेतुंमहाकामेशमस्तकं। अनेनकामतत्वे

नमोहयेज्जगतामिमां॥ ६६॥ मूलादिसृष्टिसंहारविसतंतुतनीयसी। तस्मात्कुंडलिनीशक्तिःशक्ति

कूटेमहेश्वरि॥ ६७॥ त्रिकूटात्रिपुरादेवीसर्वसिद्धिप्रदाभवेत्। चतुःषष्ठिर्यतःकोट्यायोगिनीनांमहोज

सां॥ ६८॥ चक्रमेतत्समाश्रित्यसतांसिद्धिप्रदाःसदा॥ ॥इतिश्रीदक्षिणामूर्तिश्रीविद्यात्रयोगबीज

साधनंनामत्रिंशःपटलः॥ ॥ईश्वरउवाच॥ ॥अथदीक्षाविधिंवक्ष्येकुर्लभंभुवनत्रये। वसुकोणंद्वादश।

© Dharmartha Trust J&K. Digitized by eGangotri

रंषोडशारंततःपरं ॥२॥ द्विर्दशारंस्तन्नयुक्तंततोष्टदलमालिखेत् ॥३॥ बिंबंचततोमध्येश्रजयेत्त्रिपुरांपरां
श ॥ आद्यावंगानिसंश्रज्यत्रिकोणेषुरतित्रयं । मातरःपरपत्रेषुवामाद्यारवियोनिषु ॥३॥ नित्यानिरंजना
क्लिन्नाक्लेदिनीमदनातुरा । मदद्रवाद्राविणीद्रवद्रविणारागवत्यपि ॥४॥ कामेश्वरीतथाकामदीपि
नीकामकेसरी । लालिताक्षोभिणीमद्रास्वछंदललिताक्रमात् ॥५॥ कलाभ्योनिषुसंश्रज्यततोविं
शतियोनिषु । मायावतीमहाक्षीवततःसर्वविशंकरी ॥६॥ भुंकारीभीमरावावकमलाकमलेश्व
री । नीलग्रीवाविशालाक्षीश्रुंडडामरेश्वरी ॥७॥ समयासमयेशानीनित्यानंदामहोदया । सर्वसौ
भाग्यदानंदाचंडिकाचंद्रशेखरा ॥८॥ सर्वेश्वरीवसंश्रज्यपीठानिवसुपत्रके । श्रयरहेत्रिपुरेशीवदीक्षा

© Dharmartha Trust J&K. Digitized by eGangotri

योन्यंकितंयजेत॥९॥एतद्दयेतुधान्येश्चसाधारंकलशंक्षिपेत॥विशेषगंधपुष्पैश्चस्वर्णरत्नैःप्रपूजयेत
१०॥समीपेचक्रराजंचसम्यगभ्यर्च्यदेशिकः॥आद्यक्षरेणमलयंसुंदरंनामकल्पयेत॥११॥आत्मानंयोज
यित्वाथगुरुभिर्मानवैस्ततः॥स्मर्तव्यायुरुपैःसर्वैःसम्यक्क्षणतिश्चर्वकं॥१२॥क्ष्मोलिखित्वाविद्यांवसम्य
क्पुष्पादिभिर्यजेत॥शिष्यायदर्शयेद्विद्यांजपनाशभयात्प्रिये॥१३॥यदिस्यान्महतीप्रीतिःशिष्यस्यप्राण
दस्यतु॥तदेकोच्चारमात्रेणदक्षकार्णेजपेत्परां॥१४॥षोडशार्णांपरांविद्यांनदद्यात्कस्यचित्प्रिये॥राज्ञे
राज्यप्रदायापिपुत्रायप्राणदायवा॥१५॥शांभवाज्ञांप्रकुर्वीतदद्यात्खेचरसंज्ञिकां॥अनिर्वाच्योपदेशस्य
स्पर्शनाद्ब्रह्मणोभवेत॥१६॥कलशस्थैःपल्लवैश्चत्रिवारंप्रोक्षयेत्ततः॥भवेत्पट्टाभिषिक्तस्तदासौदेशि

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
९०
90

कायणीः ॥१७॥ गंडूषमुखसंयुक्तास्तदाहेयिंशिवार्चणे। अन्यथा नैव सिद्धिस्यात्सविकल्पस्तुपार्वति। ए
गंडूषदानेशिष्यस्य विकल्पोयदिजायते। न सिद्धिस्तस्य कुत्रापि श्रीविद्यायां पराङ्करवी ॥१९॥ मुखे दीयते
सर्वमन्त्रानंदाल्पते पिचात्तस्माद्दीक्षेयमाख्याता मंत्रसिद्धिकरी प्रिये ॥२०॥ दीक्षितः सन्महेशानि इष्टीया
गं समाचरेत्। विशेषार्घ्यविधिं कृत्वा पात्यस्वाइष्टीं समानयेत् ॥२१॥ समयाचारविधिना मंडितां सुंदराननां।
अष्टदेवकुलोद्भूतां तरुणीं चारुलोचनां ॥२२॥ आनंदेनोद्वेषिणीं व्रतं चारिणीं। वर्जयेत्परमेशानि स्वैर्वी
क्षाचेत्सुलोचने ॥२४॥ भगमालां समुद्धार्य्य तस्यायोनिं प्रपूजयेत्। श्रीविद्यां पूजयेत्तत्र नवचक्रमोदि राम॰
तां ॥२५॥ तद्योनौ पूजयेद्देवि श्रीविद्यां षोडशाक्षरीं। कामेश्वरस्वरूपा च कामशास्त्रैर्विराजितां ॥२६॥ का ९०

३+ मुदितायाह्या विरूपां विकृताननां। व्यंगांहृष्टांचविधवां विविक्तां भक्तिवर्जिताम् ॥२३॥ कुमारीकुत्सितांखि+३

© Dharmartha Trust J&K. Digitized by eGangotri

मिश्वरंशवत्सामितंत्रभेदेनस्तुंदरिवेदादिपीठसंराजत्परांपीठनिवासिनी॥२७॥त्रिकूटांहृत्कलांदेविशि
वायचयजेन्मंत्रं।स्वाधिष्ठानंदशार्णेननवचक्रेश्वरेणहि॥२८॥प्रजपेत्कामरूपःसन्कामृशास्त्रोचितैः
प्रियैः।सीत्कारःप्रणवोदेविभाषणंजपउच्यते॥२९॥तत्वानंदस्तुवनंस्यात्कुचमर्द्दःशिवार्चनं।नखदंतक्ष
तादीनिपुष्पमालादिराजतं॥३०॥ताडनंहवनंसिद्धिर्वीर्यशुद्धिर्विसर्जनं।वीर्यरेतःसमादायविशेषार्घ्यनि
धापयेत्॥३१॥तेनामृतेनश्रीदेवींतर्पयेत्कुलमार्गतः।अतिप्रमथनाद्देविसंमूढेस्त्रीरजस्तथा॥३२॥न
खास्थिरेतोपुरव्याणिकुलद्रव्याणिभागतः।भैरवोपदिसंजातःसिद्धिस्तस्यनसंशयः॥३३॥निर्विकल्पस्त्व
मंत्रज्ञोब्रह्मसाक्षान्नसंशयः।काम्यंनैमित्तिकंज्ञात्वाश्रीविद्यांपरितोयजेत्॥३४॥दीक्षितस्याधिकारोत्रना

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं. न्यस्यपरमेश्वरिपुस्तकेलिखितंदृष्ट्वास्वयंज्ञात्वाकरोतियः॥३५॥ब्रह्महत्यासुरापानस्वर्णस्तेयादिपा
९१ तकैः॥लिप्यतेनात्रसंदेहोनरकेनिवसत्यसौ॥३६॥ ॥इतिश्रीदक्षिणामूर्त्तिसंहितायांदीक्षाद्वतीयजनवि
91 वरणंनामैकत्रिंशःपटलः॥ ॥ईश्वरउवाच॥ ॥अथवक्ष्येमहेशानिपवित्रारोपणंमहत्॥यस्मिन्कृते
कृतंसर्वमन्यथाश्रन्यमुच्यते॥१॥गतसंवत्सरेयस्तुनकरोतिपवित्रकं॥एकीकृत्यफलंतस्यनीयतेदुर्ग
णैर्बलात्॥२॥आषाढउत्तमोमासःश्रावणोमध्यमःप्रिये॥हीनोभाद्रपदोमासःपक्षोशितशितेतरौ
३॥षशस्तःशुक्लपक्षस्तुतदलाभेशितेतरः॥चतुर्द्दशपष्टमीपौर्णमासीतिथिषुवैयजेत्॥४॥पदस्त्रं रम.
विशिष्टंतुकार्पाससंजनितंचवा॥त्रिगुणंत्रिगुणीकृत्यपञ्चाल्पामलवारिणीं॥५॥पश्चिमास्योक्तमनु ९१

© Dharmartha Trust J&K. Digitized by eGangotri

मा३

भिर्दक्षिणैः शोधयेत्ततः। मंत्रैरथ पवित्राणि मनोरम्याणि कारयेत्॥ ६॥ अष्टोत्तरशतं ज्येष्ठं तद

र्द्धं मध्यमं प्रिये। तदर्द्धं च कनिष्ठं स्याद्यथाशक्त्यथ वा प्रिये॥ ७॥ उत्तरास्योदितैर्मंत्रैर्दशग्रंथैस्तु का

रयेत्। विचित्रया पवित्रयेत्ताः ॐ ओंकाभिरद्विजे॥ ८॥ पवित्रदानदिवसः पूर्वेद्युरधिवासनं। सद्योधिवा

सनं वापि कुर्यात्त्वं परमेश्वरि॥ ९॥ रात्रौ समाधिभिः सार्द्धं निस्तमपूजाद्यनंतरं। ऊर्ध्वं सिंहासने मंत्रैः

स्तत्र पात्रं तु वा मतः॥ १०॥ स्नापयित्वा स्ववर्माभ्यां स्नात्वा रक्षावगुंठने। दंतकाष्ठं तथा गंधभस्मचंदनमृ

त्तिकाः॥ ११॥ सिद्धार्थांश्च तथा धात्रीफलं सक्तुसमष्टिस्तु। सर्वादिदिक्क्रमतः परितः स्तत्र भाजनाः

१२॥ अश्वत्थपत्रपात्रेषु प्रक्षिपेत् सिद्धिहेतवे। ॐकारहोमः स्वाहेशब्रह्मनागाशिखिध्वजाः॥ १३॥

© Dharmartha Trust J&K. Digitized by eGangotri

द॰सं॰
९२

९२

स्वर्य्यः सदाशिवः सर्वादेवतास्तुर्नवामराः। स्त्रेत्रेषु प्रजयेद्ब्रह्मविष्णुशांस्त्रिस्त्रके॥ १४॥ क्रियाच
पौरुषीवीरागायत्रीचापराजिता। विजयाचजयादेविमुक्तिदाचसदाशिवा॥ १५॥ मनोन्मनीचनवमी
दशमीसर्वतोमुखी। ग्रंथिस्थादेवताः पूज्या उपचारैः समर्चयेत॥ १६॥ मूलमंत्रेणचामंत्र्यपवित्रेषुक
लापयेत। नित्यापोडशदेवेशिश्रीविद्यांचस्मरेत्प्रिये॥ १७॥ अधिवासविधिः प्रोक्तः पश्चादाराधनं
भवेत। नित्यार्चणानंतरंतुनैमित्तिकमिदंभवेत॥ १८॥ समस्तेभ्यः पवित्राणिकन्यकाभ्यः सभोज
नं। स्वगुरुं पूजयेत्पश्चाद्वस्त्रालंकारगोधनैः॥ १९॥ यथाशक्तिनमस्कृत्यदेवीरूपेणचिंतयेत॥
आरोपयेत्पवित्रंतुचित्तशाठ्यविवर्जितं॥ २०॥ गुरुः संपूज्यतेयत्रततकर्मसफलंवहु। सचेन्नष्ट

राम॰
९२

© Dharmartha Trust J&K. Digitized by eGangotri

ज्यतेयत्रक्रियासानिष्फलासदा ॥२१॥ गुरोरभावेतत्पुत्रंपुत्राभावेतदंगनाम् ॥ तदभावेचतत्पौत्रंदेहि
त्रंतदसंभवे ॥२२॥ सर्वाभावेर्चयेद्दन्यंगुरुगोत्रसमुद्भवं ॥ पूज्यतेस्वगुरुर्यत्रतत्रैताःसफलाःक्रिया ॥२३॥
नपूज्यतेनिष्फलास्ताभवंतिपरमेश्वरि । कृत्वापूर्णाहुतिंपश्चाद्दद्योद्द्यात्पवित्रकम् ॥२४॥ [redacted]
श्रीचक्रमध्यसिद्धायैश्रीविद्यायैनिवेदयेत् ॥ पर्वैतन्नकरोत्येवंतस्यपूजातिनिष्फला ॥२५॥ ॥इतिश्री
दक्षिणामूर्तिसंहितायांपवित्रारोपणविधिर्नाममहाविंशतिमःपटलः ॥ ॥ईश्वरउवाच ॥ ॥अथवक्ष्ये
महेशानिदमनारोपणक्रियां ॥ पवित्रपर्ववत्सापिकर्त्तव्यासाधकैःप्रिये ॥१॥ चैत्रादयस्त्रयोमासाःप
क्षौसितसितेतरौ । एतेषांसर्वसर्वस्त्रकालःसर्वत्रमोभवेत् ॥२॥ अष्टम्यांवचतुर्दश्यांपौर्णमास्यामथ्या

© Dharmartha Trust J&K. Digitized by eGangotri

द०सं० पिबा।शर्वराज्ञोभक्तवीतसघोवाविनिवासनं॥३॥आमंत्र्यदमनंवाघंचाठःकल्यालतादिभिः॥
९३ शिवप्रसादसंक्षतत्वत्रसंनिहितोभव॥४॥शिवाकार्यसतुद्दिश्यनेतव्योसिशिवाज्ञया।इत्यामंत्र्यार
93 तिकामंतत्रसंक्षजयेत्सुधीः॥५॥स्ववधत्तस्याधदमनंसम्यलंपल्लवैर्युतं।आनीतमथवान्येनमोल्पाद
नीतमीश्वरि॥६॥वामतस्थापयेद्देविसर्वतोभद्रगंतुजे।वस्त्रवेदामनंपात्रंस्थापयेत्पूजयेन्ततः॥७॥
प्रणवंभुवनेशानींरतयेनमस्त्यपि।मंत्राभ्यांपूजयेत्तत्रदमनकर्णिकागतं॥८॥ततस्तदापूर्वादि
दलेषुपूटिकान्यसेत्।अष्टस्वष्टाष्टभिर्मंत्रैरष्टद्रव्ययुताःक्रमात्॥९॥कामोभस्मशरीरश्चतथा राम०
नंगश्चमन्मथः।वसंतसखनामाचस्मरइक्षुधनुर्धरः॥१०॥पुष्पबाणश्चताराद्याङोहृदंताःप्रकी ९३

© Dharmartha Trust J&K. Digitized by eGangotri

र्त्रिताः ॥ कर्पूरं रोचनां पुष्पमेकस्तूरीं च ततः शिवे ॥ ११ ॥ अगरुं कुंकुमं धात्रीफलं चंदनमेव च ॥ सुगं
धपुष्पनिकरमष्टद्रव्याणि पार्वति ॥ १२ ॥ संपूज्य दमनं सम्यग् गंधपुष्पाक्षतादिभिः ॥ जपेदनंगगा
यत्रीं यथाशक्त्या प्रसन्नधीः ॥ १३ ॥ विद्महे मन्मथायांते कामदेवाय धीमहि । लिखित्वा च ततो देवि त
न्नोनंगः प्रचोदयात् ॥ १४ ॥ नमोस्तु पुष्पबाणाय जगदाल्हादकारिणे । मन्मथाय जगन्नेत्रे रतिप्रीति
प्रियाय च ॥ १५ ॥ अनेन मनुना देवि नमस्कुर्यान्मनोभवं । अथ विज्ञापनं कुर्याद्देवेदमनपाणिपुष्का ।
१६ ॥ आमंत्रितासि देवेशि मधः काले मया शिवे । कर्तव्यं तु यथालाभं पूर्णपर्व तवाज्ञया ॥ १७ ॥ विज्ञा
पनाख्यमंत्रेण त्रिपुरां परितोषयेत् । ततः संपूज्य देवेशीं गंधपुष्पाक्षतादिभिः ॥ १८ ॥ नैवेद्यं विविधं द

© Dharmartha Trust J&K. Digitized by eGangotri

द.सं. त्वाश्रीविद्यांचार्घ्ययेत्ततः।षोडशार्णेजगन्मातर्वांछितार्थफलप्रदे॥१९॥हृत्स्थान्सूर्यमेदेविकामाख्का

९४ मेश्वरेश्वरि।अनेनचार्घ्ययेद्देविकामाख्कामेश्वरेश्वरि॥२०॥वर्माचतुर्थिकांकुर्याद्देसेत्रणापिचराक्षितं।त

94 तोजागरणंकुर्याद्याघायेजागरोनहि॥२१॥अथप्रातःसमुत्थायकुर्याद्दैनित्यमर्जनं।तेनैवमहतीपूजा

मध्येसतुष्पमिश्रितां॥२२॥मनोहरांचविधिवत्कृत्वानैवेद्यमुत्तमं।स्वर्णकुंभंचताम्बूलंदद्यात्संप्रार्थयन्न(

तः॥२३॥समस्तंचक्रंचक्रेशिसर्वविद्याशरीरिणी।वेदमातर्ममैतत्तत्भवत्विष्टंममाज्ञया॥२४॥न

तःकुर्यात्सार्वसमाधिभिःस्तुरवात।अन्नदानंचकुर्वीतरसैःषड्भिःसमन्वितं॥२६॥एवंयःकुरुते(एम०

विद्वान्दमनारोपणंक्रमात्।तस्यासंवत्सरीपूजाश्रीविद्याधिष्ठिताभवेत्॥२७॥ ॥इतिश्रीदक्षि ९४

१+स्वगुरुमभ्यर्च्यवस्त्रभूषाचरादिभिः।दत्वाद्दमनकंतस्मैनमस्कृत्यप्रसादयेत्॥२५॥जलकेलिंततः+२

© Dharmartha Trust J&K. Digitized by eGangotri

द०सं०
९५

णाम्रुत्विंसिंहितायांदमनकारोपणंनैमित्तिकविधानंनामत्रयस्त्रिंशःपटलः॥ ॥समाप्तोयंग्रंथः॥
मंगलंलेखकानांचपाठकानांचमंगलं॥ मंगलंसर्वलोकानांक्षमोक्षपतिमंगलं॥॥ ॥शुभमस्तु॥॥
संवत १७३८समय पोषशुद्धत्रयोदश्यांलिखितमिदंपुस्तकंजडारामस्तुकुंदपुर॥॥ ॥श्रीरस्तु॥॥

दम०
९५

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ४८५४

95

श्रीमन्महाराजकुमारश्रीबाबूभावसिंहस्येदंदक्षिणामूर्तिसंहितापुस्तकं॥ पत्र ९५

पुस्तकमिदं वैद्यनाथपाठकस्य पत्राणि ९५

© Dharmartha Trust J&K. Digitized by eGangotri